In Public domain. Digitization Muthulakshmi Research Academy

(13) वीरागमः (Aechuveli, Ceylon)

वीरागमः

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

T 30

श्रीः

वीरागमः

(Acchuveli, Ceyl

विषयानुक्रमणिका

पटल नाम		पुटसंख्या
2	तन्त्रावतारः	1
3	पञ्चाक्षर विधिः	19
4	मन्त्रोद्धार विधिः	26
5	पुष्पलक्षण विधिः	46
6	कर्षण विधिः	54
7	आचार्यलक्षणम्	69
8	दीक्षामण्डल विधिः	80
9	दीक्षा विधिः	105
10	अभिषेक विधिः	126
11	अग्निमुख विधिः, ऋतुसंगमन विधिश्च	137
12	गर्भाधान विधिः	144
13	पुंसवन विधिः	145
14	सीमन्त विधिः	148
15	विष्णुबलिः	150
16	जातकर्म विधिः	152
17	नामकरण विधिः	155
18	उपनिष्क्रमणम्	157
19	अन्नप्राशनम्	159
20	चौलकर्म विधिः	161
21	उपनयन विधिः	164
22	उपाकर्म विधिः	172

In Public domain. Digitization Muthulakshmi Research Academy

पटल नाम	पुटसंख्या
23 शुक्रियव्रतपटलः	173
24 व्रतसमावर्तनम्	174
25 विवाहविधिः	177
26 प्रेतसंस्कारः	183
27 तृणसंस्कारः	185
28 गर्भिणीसंस्कारः	186
29 अष्टकाविधिः	188
30 सपिण्डीकरणविधिः	190
31 अवान्तरशौचाचारः	193
32 ग्रहाभिषेकविधिः	195
33 मुद्रालक्षणविधिः	198
34 नैवेद्यविधिः	207
35 शौचाचमनस्नानविधिः	221
36 भस्मस्नानविधिः	229
37 मन्त्रन्यास पटलः	237
38 शिवार्चनपटलः	251
39 अग्निकार्यविधिः	284
40 नित्योत्सवविधिः	301
41 परिवारलक्षणविधिः	315
42 रक्षादीपविधिः	322
43 अङ्कुरार्पणपटलः	332
44 उत्सवविधिः or ध्वजारोहणविधिः	343
45 भेरीताडनविधिः	373
46 यागमण्टपलक्षणम्	380
47 अधिवासनविधिः, बलिविधिश्च	386
48 यात्राकौतुकबन्धनविधिः	403
49 चूर्णोत्सवविधिः	406
50 तीर्थविधिपटलः	409

In Public domain. Digitization Muthulakshmi Research Academy

पटलनाम — पुटसंख्या

81 एकाशीति स्नपन विधिः 752

82 एकोनपञ्चाशत्स्नपनविधिः 758

83 पञ्चविंशति स्नपन विधिः 764

84 षोडश कलश स्नपन विधिः 769

85 नव कलश स्नपन विधिः 772

86 शीतकुम्भ विधिः 776

87 अद्भुतशान्ति पटलः 782

88 कृत्तिका दीपविधिः 792

89 अन्नप्राशन विधिः 796

90 बालस्थापन विधिः (असमग्रः). 803

91 नागप्रतिष्ठाविधिः 807

92 कूपप्रतिष्ठाविधिः (प्रारम्भ एव). 818.

In Public domain. Digitization Muthulakshmi Research Academy

पटलनाम	पुटसंख्या
51 ध्वजावरोहण विधिः	412
52 प्रायश्चित्त विधिः	417
53 क्षीराभिषेकविधिः	436
54 कुण्डलक्षण विधिः	443
55 शान्तिहोम विधिः	461
56 दिशामूर्ति वास्तुहोमविधिः	463
57 सकलाराधन विधिः	471
58 विघ्नेशस्थापनार्चनोत्सवस्नपनविधिः	480
59 ब्रह्मोद्धार विधिः	510
60 विजयमण्डल विधिः	515
61 लिङ्गलक्षणम्, चललिङ्गप्रतिष्ठाविधिश्च	524
62 सृष्टिमूर्तिप्रतिष्ठा विधिः	546
63 स्थितिमूर्ति प्रतिष्ठा विधिः	574
64 संहार मूर्ति प्रतिष्ठा विधिः	589
65 गौरीस्थापन विधिः	599
66 पादुकास्थापन विधिः	612
67 चित्र प्रतिष्ठा विधिः	625
68 विमान स्थापन विधिः	631
69 मानुष स्थापन विधिः	640
70 पिण्डिका स्थापन विधिः	649
71 जलसंप्रोक्षण विधिः	662
72 वृषभ स्थापन विधिः	674
73 अग्नि प्रतिष्ठा विधिः	680
74 मातृ स्थापन विधिः	686
75 कुमार प्रतिष्ठा विधिः	694
76 ज्येष्ठा स्थापन विधिः	703
77 सहस्रकलश स्नपन विधिः	711
78 पञ्चशत स्नपन विधिः	727
79 पञ्चाशद्द्विशत स्नपनविधिः	734
80 अष्टोत्तर शत स्नपन विधिः	740

In Public domain. Digitization Muthulakshmi Research Academy

Virāgama

The Virāgama manuscript from Acchuveli, Ceylon is of size 13" x 8" containing 238 pages. There are about 35 lines per page. In all, there are 90 patalas [from 2. to 91] and 4085 slokas.

The total pages of the transcript are 818.

T. Ramanujam

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain, Digitization Muthulakshmi Research Academy

[पटल: 2]
P. 3

श्रीः

हरिः ओं

वीरागमः

तन्त्रावतारपटलः

प्रणम्य भगवन्तं हि परिपृच्छत् पितामहम्।
तन्त्राणामुद्भवं किञ्चित् तत्सर्वं ब्रूहि मे प्रभो॥ 1

ईश्वरोवाच —

तत् सर्वमखिलं वक्ष्ये शृणुष्व कमलासन
तनोति विपुलानर्थ तत्त्वमन्त्रसमाश्रितान्॥ 2

त्राणं च कुरुते पुंसां तेन भूतमिति स्मृतम्।
कामिकं योगजं चिन्त्यं कारणं त्वजितं तथा॥ 3

दीप्तं सूक्ष्मं सहस्रं च अंशुमान् सुप्रभेदकम्।
विजयं चैव निश्वासं 4

. . . .
. . . . 5

In Public domain. Digitization Muthulakshmi Research Academy

पटल. 2

सिद्धं सन्तान शर्वोक्तं . . . . ।

. . . . ॥ 6

कामिकादीनि तन्त्राणि तेषां भेदं तत(ः)शृणु ।

. . . . 7

. . . . ॥

चिन्त्यं च षड्विधा प्रोक्तं सप्तधा कारणं भवेत् । 8

अजितं तु विशेषेण चतुर्णां भेदमुच्यते ॥

दीप्तं चैव तु विप्रेन्द्र नवधा भेदमुच्यते । 9

सूक्ष्ममेकैव तन्त्रं स्यात् सहस्रं दशधा भवेत् ॥

अंशुमान् द्वादशं भेदं प्रोच्यते कमलासन । 10

In Public domain. Digitization Muthulakshmi Research Academy

प. २:

सुप्रभेदं च विख्यातं भेदमन्यं न विद्यते।
शिवभेदं मया प्रोक्तं रुद्रभेदं शृणुष्वथ॥ ॥
विमलं च विशेषेण अंशुमान् सुप्रभेदकम्।
विजयं चैव निश्वासं स्वायंभुवमथानलम्॥ 12
वीरंच रौरवं चैव मकुटं विमलं तथा।
चन्द्रज्ञानं च बिम्बंच शेषाणां भेदमुच्यते॥ 13
स्वायंभुवं विशेषेण तद्विधेन प्रवक्ष्यते।
आग्नेयमेकरुद्रं तु भेदमन्यन्न विद्यते॥ 14
वीरतन्त्रं च विप्रेन्द्र त्रयोदशं भेदमुच्यते।
रौरवं षट्सुभेदेन प्रोच्यते सकलं मया॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

प. २

मकुटाख्यं महातन्त्रं द्विविधेन विधीयते।

P. 4. विमलाख्यं महातन्त्रं चतुर्दश विधं भवेत्॥ 16

चन्द्रज्ञानं च बिम्बं च चतुर्दशविधं भवेत्।

मुखबिम्बं च विप्रेन्द्र भेदं पञ्चदशं भवेत्॥ 17

प्रोतगीताख्य महातन्त्रं षोडशं भेदमुच्यते।

ललिताख्यं महातन्त्रं त्रिधा भेदेन चोच्यते॥ 18

सिद्धतन्त्रं च विप्रेन्द्र चतुर्विधेन चोच्यते।

सन्तानाख्यं महातन्त्रं सप्तभेदेन चोच्यते॥ 19

शार्वोक्तं तु महातन्त्रं पञ्चभेदेन चोच्यते।

पारमेश्वर तन्त्रं तु सप्तभेदेन वक्ष्यते॥ 20

In Public domain. Digitization Muthulakshmi Research Academy

प.२

किरणाख्यं महातन्त्रं नवधा भेदमुच्यते ।

वातुळं तु महातन्त्रं भेदद्वादशमुच्यते ॥ २१

तन्त्रकायं प्रवक्ष्यामि तव स्नेहात् विशेषतः ।

द्विहस्तौ च पादौ च ऋज्वागात स्थितं भवेत् ॥ २२

जटामकुट संयुक्तं देववन्मुखमुच्यते ।

शुक्लवस्त्र परीधानं शुक्लयज्ञोपवीतिनम् ॥ २३

मुखं प्रति त्रिणेत्रं स्यात् सर्वाङ्ग लक्षणैर्युतम् ।

पद्ममध्ये स्थितं देवं सर्वाभरणभूषितम् ॥ २४

तन्त्रकायं मया प्रोक्तं सर्वकामार्थसाधनम् ।

२६

In Public domain. Digitization Muthulakshmi Research Academy

प-२

P.5

पुस्तकप्रमाणम्

पुस्तकस्य प्रमाणं च शृणुष्व कमलासन ।

चतुर्दशाङ्गुलं वापि पञ्चदश्यङ्गुलं तु वा ॥ 27

षोडशाङ्गुलमेवं वा सप्तदशाङ्गुलं तु वा ।

अष्टादशाङ्गुलं वापि . . . . ॥ 28

अथवा विंशतिर्वापि एकविंशतिरेव वा ।

द्वाविंशतिर्वा विप्रेन्द्र कारयेद्देशिकोत्तमः ॥ 29

एवं प्र . . . . ।

इक्ष्ये धञ्चाष्टधा कृत्वा एकांशं चैव विस्तरम् ॥ 30

विस्तारार्धं घनं प्रोक्तं पार्श्वौ कम्पद्वयौ न्यसेत् ।

त्रिभागं चतुर्भागं मध्ये शुषिरमुच्यते ॥ 31

In Public domain. Digitization Muthulakshmi Research Academy

प.२ ऽवं पुस्तकमानं तु आयव्याय(ा)दिकं शृणु ।
लब्धोच्चं चैव विप्रेन्द्र मानाङ्गुलेन भाजयेत् ॥ ३२
ऽकाङ्गुलपदं प्रोक्तं हीनाङ्गुलं च वर्जयेत् ।
समं चेत् तत् परिग्राह्य मायव्ययमिहोच्यते ॥ ३३
वसुभि र्यणितन्त -- राशिभिश्च हरेत्ततः ।
शेषमायाममिति प्रोक्तं गुणैरेव विवर्जयेत् ॥ ३४
हरेच्चतुर्दशे ----- शेषाख्य मिहोच्यते ।
पदं प्रति गुणे वृद्धि रविषृभि ह्रासयेत्ततः ॥ ३५
शेषयोनिरिति ख्यातमष्टाभिर्वृद्धितं पदम् ।
सप्तविंशतिभि र्ह्रासं लब्धमिष्टमिति स्मृतम् ॥ ३६

In Public domain. Digitization Muthulakshmi Research Academy

प.२

शेषं नक्षत्रमेवोक्तमष्टाभिर्वृद्धितं पदम्।

त्रिंशत्भिर्ह्रासयेत्तानि शेषतिथिरिहोच्यते॥ ३७

अष्टाभिर्वृद्ध्य तंच्चैव सप्तभिर्ह्रासयेत्ततः।

शेषा वारमिति प्रोक्तमायव्ययञ्च योनि च॥ ३८

आयुष्यं चैव नक्षत्र तिथिवारमुदाहृतम्।

आयाधिकं व्ययं हीनं संपत्करमिहोच्यते॥ ३९

आयहीने व्ययाधिक्ये दोषाकरमिहोच्यते।

तस्मात् सर्वप्रयत्नेन आय ह . . . . कारयेत्॥ ४०

ध्वज सिंहञ्च वृषभो हस्ति चे ध्वाङ्क्षनाय च।

धूम्रं श्वा गर्दभं काको दोषाण्येतानि वर्जयेत्॥ ४१

In Public domain. Digitization Muthulakshmi Research Academy

प.३

यजमानस्य ऋक्षेण नक्षत्रं चानुकूलकम्।

एवं परीक्ष्य बहुधा कर्तव्यं पुस्तकं परम्॥ 42

ऋषि छन्दोऽधि देवानां लके ष्य तु कमलासनः।

विश्वामित्रोऽथ वल्मीकी काश्यपश्चाङ्गिरं तथा॥ 43

P. 6. गौतमौ मुत गालवौ गार्ग वसिष्ठश्चोशना तथा।

चतुर्दशाङ्गुलादीनि क्रमाद्विन्यस्य देहिनः॥ 44

त्रिषु चैत्लान्‌ प्रकृति .... विकृतिस्तथा।

जगती शक्वरी चैव अतिशक्वरिरेव च॥ 45

उक्त मन्यत्तमेवन्तु छन्दसा..ना विधीयते।

ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरशिव एव च॥ 46

In Public domain. Digitization Muthulakshmi Research Academy

प॰ २

कालरुद्रो नीलरुद्रः प्रवक्ष्यामि सदाशिव ।

चतुर्दशाङ्गुलादीनि देवानामि··चोच्यते ॥ 47

मषीणा लेखयेद्वापि स्ववर्णे नैव तु लेखयेत् ।

षट्पङ्क्तिर्वाथ पञ्चैर्वा लेखयेत पुस्तकं ततः ॥ 48

ऋषिश्च वसवश्चैव ग्रह दीत्वेकरुद्रकम् ।

पङ्क्तिरेवं समाख्याता न्तक ऋग्यागाधिदेवता ॥ 49

एवं लक्षणसंयुक्तं राजराष्ट्राभिवृद्धिदम् ।

ऋषीणा··· पत्रे तु लेखयेत्तु द्विजोत्तमः ॥ 50

स्वर्णया तालपत्रे तु लेखयेद्देशिकस्सदा ।

In Public domain. Digitization Muthulakshmi Research Academy

प.2

॥ पुस्तकप्रतिष्ठा? ॥

द्वौ पाशान्तकं पुण्यं युक्तौ पुस्तकायाम तत्समम। 51
प्रतिष्ठाविधिं प्रवक्ष्यामि लक्षणेन समन्वितम॥
शिवाग्रे मण्डपं कुर्यात ईशाने दक्षिणेऽपि वा। 52
मण्डपं तु त्रिधा मध्ये वेदीं कृत्वा विचक्षणः॥
वेदिबाह्ये तु परितः पञ्च कुण्डानि कारयेत। 53
वृत्तं वा चतुरश्रं वा कुण्डान्येतानि कारयेत॥
स्थण्डिलं वा प्रकर्तव्यं लक्षणेन समन्वितम। 54
मण्डपे नैर्ऋते भागे शालिना स्थण्डिलं कुरु॥
यथांकुरार्पणं कुर्यात पञ्चाहे न्त्येहे पि वा। 55
सोमकुम्भं च तन्मध्ये सवस्त्रं सापिधानकम॥

In Public domain. Digitization Muthulakshmi Research Academy

प.२

सहिरण्यं सकूर्चं च सोमराजाधिदैवतम्। 56

कृत्वा न पदं तत्र मध्यमे सोमकुम्भकम्॥

विन्यसेत्तु विशेषेण पालिका चाष्टदिक्षु वै। 57

माषमुद्ग कुलुत्थं च सर्षपं चैव (वि) वापयेत्॥

हृदयेन तु मन्त्रेण बीजानी विन्यसेत्ततः। 57

सोमाधिदैवतात् कुम्भानभिषिच्य ततो जलम्॥

स् गऽप्तदेशे समुत्थाप्य पालिका स्थापयेत्ततः। 58

पुण्याहं वाचयेत्तत्र पवमानेन प्रोक्षयेत्॥

स्वर्णेन तन्तुना विप्र कौतुकं बन्धयेद्दृढा। 59

P.T. ऽलाल्लवङ्ग तक्कोलमुशीरं चन्दनैर्युतम्॥

In Public domain. Digitization Muthulakshmi Research Academy

प.२ लेपयेत् पुस्तकं तत्र शायने शाययेत्ततः। 60
शालिनापि करे चेदं पद्ममष्टदलं लिखेत्॥
शाल्यर्धं तण्डुलं न्यस्य तण्डुलार्धं तिलान् न्यसेत्। 61
पञ्चधा शयनं कल्प्य शाययेत् पुस्तकं तथा॥
तत्तदागमबीजेन शाययेच्छयनोपरि। 62
ह्रस्वं ब्रह्म समाख्यातं दीर्घाभ्यङ्गानि चोच्यते॥
आद्याक्षर(र) समायुक्तं अनुस्वारसमन्वितम्। 63
ब्रह्माङ्गमिति -- प्रोक्तं सर्वेषां च विधीयते॥
वस्त्रेणावेष्टयेत्तत्र पुस्तकं च विशेषतः। 64
दक्षिणं चैव विप्रेन्द्र ऽावमेव क्रमेण तु॥

In Public domain. Digitization Muthulakshmi Research Academy

प.३

सरस्वतीं न्यसेत्तत्र पुस्तकस्य तु मध्यमे। 65
पुस्तकस्यैकदिग्भागे विन्यसेत् कुम्भमेव च॥
शुद्धोदकेन संपूर्य सकूर्चां सापिधान्तकम्। 66
सवस्त्रं सहिरण्यञ्च सरस्वतीं न्यसेत्ततः॥
मूलमन्त्रेण विन्यस्य अर्चयेत्तु विशेषतः। 67
पूर्वादीशानपर्यन्तं विन्यसेद्धर्धनीष्टं च॥
सवस्त्रान् सहिरण्यांश्च सकूर्चादीनि विन्यसेत्। 68
वामी ज्येष्ठी च रौद्री च काली कलविकर्णी तथा॥
बलविकरणीं बलप्रमथनीं सर्वभूतमनोन्मनीम्। 69
पूर्वादीनि विन्यस्य पुस्तके च मनोन्मनीम्॥

In Public domain. Digitization Muthulakshmi Research Academy

प.२

हृदयादीषसंगैश्च पूजयेत्तु विधानतः। 70

हविर्निवेदयेत्तत्र पश्चाद्धोमं समाचरेत्॥

पलाशः पूर्वतो भागे अश्वत्थं दक्षिणे तथा। 71

पश्चिमे बिल्वमेवं तु अपामार्गं तथोत्तरे॥

उदुम्बरं तथैशान्यां पलाशैर्वापि हूयते। 72

समिदाज्यचरू लाजान् सर्षपांश्च यवाँस्तिलान्॥

समी सद्य मन्त्रेण ईशानेनाज्यमेव च। 73

चरुं वै हृदयेनैव लाजा वामेन चैव हि॥

सर्षपं सत्य(द्य?)मन्त्रेण नेत्रेण तु यवांस्तथा। 74

कवचेन तिलान् हुत्वा सप्तद्रव्यमिहोच्यते॥

In Public domain. Digitization Muthulakshmi Research Academy

प.२ सहस्रं वा तदर्धं वा तदर्धं वापि हूयते । 75
अष्टोत्तरशतं वापि पञ्चाशत् पञ्चविंशतिः ॥
द्रव्यान्ते व्याहृतिं हुत्वा पुस्तकं स्पर्शयेत्तदा । 76
सर्वद्रव्यसमायुक्तं हव्यवाहं समुच्चरन् ॥
P. 8. स्विष्टमग्नेन्नि मन्त्रेण जुहुयात्तदनन्तरे । 77
ततः प्रभाते विमले पूर्णाहुतिर्विशेषतः ॥
तत्तदागमबीजेन प्रोक्षयेद्वर्धनीं ततः । 78
सन्निधौ दर्पणं न्यस्य अभिषेकं तु कारयेत् ॥
हविर्निवेदयेत् पश्चात् ताम्बूलं दापयेत्ततः । 79
आचार्यं पूजयेत् पश्चात् वस्त्रहेमाङ्गुलीयकैः ॥

In Public domain. Digitization Muthulakshmi Research Academy

प.2 ब्राह्मणान् भोजयेत्तत्र सप्तकन्यांश्च पूजयेत्। ४०
बौद्धमार्हतं चैव शैवं (वामं) पाशुपतं तथा॥
कापालं पाञ्चरात्रं च षडेते वर्ज्ये स्मृताः। ४१
एतेषां संकरं चैव तन्त्रसंकरमुच्यते॥
तन्त्रसंकरदोषेण राजराष्ट्रं विनश्यति। ४२
तस्मात्सर्वप्रयत्नेन संकरं नैव कारयेत्॥
अष्टाविंशतिभेदेन शैवभेदं विधीयते। ४३
एतेषां संकरं चैव न दोषाय प्रकल्पयेत्॥
दीक्षितस्य सुधीरस्य शिवभक्तिरतस्य च। ४४
तस्मै देयं ततो ग्राह्यं नैव मृण्य मिहोच्यते॥

In Public domain. Digitization Muthulakshmi Research Academy

प-२

अदीक्षितन्न श्रोतव्यन्न देयं यस्य कस्यचित्। 85

एवं यः कुरुते मर्त्य शिवल्लोकमवाप्नुयात्॥

तन्त्रावतारमेवोक्तं पञ्चाक्षरं ततश्शृणु। 86

इति वीरतन्त्रे षट्सहस्रसंहितायां

तन्त्रावतार द्वितीयपटलः॥

In Public domain. Digitization Muthulakshmi Research Academy

(पटलः 3) ॥ पञ्चाक्षरविधिपटलः ॥

पितामह उवाच ——

नमस्कृत्य जगन्नाथं पर्यपृच्छत् पितामह ।
श्रीपञ्चाक्षरकल्पंच तत् सर्वं वद मे प्रभो ॥ 1

ईश्वरः ——
तत्सर्वमखिलं वक्ष्ये श्रृणुष्व चतुरानन ।
नमस्कारेण संयुक्तं शिव इत्यक्षरद्वयम् ॥ 2
आदिवर्गचतुर्थ्यान्तं यवर्गश्च द्वितीयकम् ।
तद्वर्गान्तं सप्तमं स्यात् पञ्चाक्षरमिति स्मृतम् ॥ 3
ऽाकमन्त्रमनुस्मृत्य बिन्दुनादसमायुतम् ।
चतुर्थ्या तु समायुक्तं पञ्चाक्षरमिति स्मृतम् ॥ 4
(ऋग्वेदो जायते विप्र)
नकारश्च मकारश्च शिकारश्च वकारकः ।
यकारेण समायुक्तं पञ्चाक्षरमिहोच्यते ॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प.3
प्रणवेन समायुक्तं वक्षुमक्षरमीरितम् ।
ऋग्वेदो जायते विप्र नकाराक्षरमुच्यते ॥ 6
मकारन्तु यजुर्वेदो शिकारं सामवेदकम् ।
अथर्ववेदो वाकारं यकार मितिहा मतभासके ॥ 7
P.9. नकारं पृथिवी ज्ञेयं मकारश्चाप ग येव च ।
शिकार तेजमायुक्तं वाकारं वायुरेव च ॥ 8
यकारं व्योमसंभूतमेतत् भूतेषु संस्थितम् ।
नकारं श्वेतवर्णं तु ईश्वरेण समायुतम् ॥ 9
सावित्रीच्छन्दसा युक्तं गौतमेन समायुतम् ।
स्थानं सद्यमुखं चैव नकाराक्षरमुच्यते ॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प.3

मकारं पीतवर्णं तु ब्रह्मस्तत्राधिदैवताम्।

अनुष्टुप्छन्दसा युक्त मन्त्रिणा च समायुतम्॥ 11

स्थानं च वामदेवं स्या मकाराक्षरमुच्यते।

शिकार श्यामवर्णं तु विष्णुस्तत्राधिदैवतम्॥ 12

त्रिष्टुप्छन्दसमायुक्तं विश्वामित्र समन्वितम्।

स्थानं घोरंश्च वक्त्रं स्यात् शिकाराक्षरमुच्यते॥ 13

वकारं रक्तवर्णं तु स्कन्दस्तत्राधिदैवतम्।

बृहतीछन्दसमायुक्तं मङ्गिरा च समन्वितम्॥ 14

पुरुषस्य मुखं स्थानं वकाराक्षरमुच्यते।

यकारं शुक्लवर्णं तु विघ्नेशस्तत्र देवता॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

प.३

सावित्रीच्छन्दसा युक्तं भारद्वाजेन संयुतम्।
ईशानस्य मुखं स्थानं यकाराक्षरमुच्यते॥ 16
पञ्चाक्षरमिति प्रोक्तं प्रणवं शृणु तत्त्वतः।
अकारश्च उकारश्च मकारश्च त्रिधा भवेत्॥ 17
अकारं ब्रह्मदैवत्यमुकारं विष्णुदैवतम्।
मकारं महेश्वरस्तत्र अधिदेवाः प्रकीर्तिताः॥ 18
ऋग्वेदं तु अकारस्य यजुर्वेदमुकारकम्।
मकारं सामवेदं तु इदमन्यच्छृणुष्व तु॥ 19
अकारं श्वेतवर्णं स्यात् उकारं रक्तवर्णकम्।
मकारं पीतवर्णं स्यादेवमेव क्रमेण तु॥ 20

In Public domain. Digitization Muthulakshmi Research Academy

प.3 गुणेन सन्धिकारं स्यादोंकारं शिवमुच्यते ।
ओंकारेण समायुक्तं षडक्षरमिहोच्यते ॥ 21
रुद्राक्षेण जपं कुर्यात् पञ्चाक्षरसमायुतम् ।
अङ्गुल्या प्र(ग्र)जपेदेकं पञ्चधा मृन्मयं भवेत् ॥ 22
रेखादष्टगुणं प्रोक्तं बीजैर्दशगुणं भवेत् ।
शतशंखैस्तु विज्ञेयं प्रवालैस्तु सहस्रकम् ॥ 23
स्फटिकैर्दशसाहस्रं मौक्तिकैर्लक्षमेव च ।
पद्माक्षैः कोटिगुणितं सौवर्णैर्दशकोटिकम् ॥ 24
शतकोटि कुशग्रन्थ्या रुद्राक्षैः स्यादनन्तकः ।
P. 10. न्यासं कुर्यात्ततो मन्त्री श्रीपञ्चाक्षरमिहोच्यते ॥ 25

In Public domain. Digitization Muthulakshmi Research Academy

प.३

अङ्गुल्यादि कनिष्ठान्तं सृष्टिन्यासमुदाहृतम् ।
कनिष्ठाद्यङ्गुल्यान्तं तु संहारन्यासमुदाहृतम् ॥ २६
यकारं करतले ... न्यासं कुर्यात्ततो बुधः ।
करन्यासं पुरा कृत्वा अङ्गन्यासं ततः शृणु ॥ २७
यकारं शिरसि न्यस्य वकारं तु ललाटके ।
शिकारं कर्णदेशे तु मकारं हृदये न्यसेत् ॥ २८
नकारं नाभिदेशे तु विन्यसेच्च विशेषतः ।
सर्वाङ्गेषु च विप्रेन्द्र ओंकारं विन्यसेत्ततः ॥ २९
सहस्रं वा तदर्धं वा अष्टोत्तरशतं तु वा ।
पञ्चाशत्पञ्चविंशैर्वा जपं कुर्याद्विशेषतः ॥ ३०

In Public domain. Digitization Muthulakshmi Research Academy

प.3

प्रासादेन तु मन्त्रेण हृदयेन समन्वितम् ।
जपं कुर्याच्च विप्रेन्द्र प्रणवेन समायुतम् ॥ 31
गृहेषु फलमेकं स्यात् गोष्ठे दशगुणं भवेत् ।
नदीतीरे शतं विद्यात् सहस्रं देवतालये ॥ 32
जप्त्वा विंशतिभिर्लक्षैः स्वयंभूपदमवाप्नुयात् ।
पञ्चविंशत्ततो लक्षैः वैष्णवं पदमवाप्नुयात् ॥ 33
लक्षलक्षस्ततो जप्त्वा रौद्रं पदमवाप्नुयात् ।
प्रविशेच्छिवदीशानन्त्यक्त्वा संसारसागरात् ॥ 34
श्रीपञ्चाक्षरमेवोक्तं मन्त्रोद्धारं ततः शृणु ।

इति वीरतन्त्रे षट्सहस्रसंहितायां
श्रीपञ्चाक्षरविधिस्तृतीयः पटलः

=

In Public domain. Digitization Muthulakshmi Research Academy

॥ मन्त्रोद्धारविधिपटलः ॥

[पटलः 4]

ज्ञानार्णवमग्नानां सर्वेषां प्राणिनामयम् ।
सर्वपापविशुद्धार्थं मन्त्रोद्धारं कथं भवेत् ॥ 1

ईश्वरोवाच —

मन्त्रोद्धारं प्रवक्ष्यामि शृणुष्व कमलासन ! ।
मननं सर्वमन्त्राणां त्राणं संसारसागरात् ॥ 2
मननत्राणधर्मित्वा( ) मन्त्रमित्यभिधीयते ।
महेन्द्रे मलये चैव सह्ये विन्ध्ये तथैव च ॥ 3
केतारे निर्मदे चैव गयो वापि विशेषतः ।
गङ्गाकूले समुद्रे वा प्रासादे वा विशेषतः ॥ 4
गवां कोष्ठे विशेषेण नद्यां वापि तटाकके ।
अन्येषु शुद्धदेशेषु मन्त्रमुद्धारयेत् क्रमात् ॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प.4

हस्तमात्रं खनित्वा तु पूरयेत्तेन पांसुना।

P.11

॥ एकाक्षरम् ॥

स्नानं कृत्वा तु विप्रेन्द्र तत्स्थाने मन्त्रमुद्धरेत्॥ 6

पुण्याहं वाचयेत्तत्र पवमानं समुच्चरन्॥

आचार्यश्शुचिर्भूत्वा कृतोपवाससंयुतम्। 7

पूर्वरात्राधिवासैश्च प्रभाते मन्त्रमुच्चरन्॥

रक्तेन धातुना विप्र अक्षरं लेखयेद्बुधः। 8

शिवतत्त्वे परे सूक्ष्मे बिन्दुरुत्पद्यते तथा॥

बिन्दोर्नादस्समुत्पन्नस्तस्माच्छक्तिरजायते। 9

शक्तेस्तु वाक्भवो जाता वाक् षोडशाः कलाः॥

In Public domain. Digitization Muthulakshmi Research Academy

प.4

कलायां व्यञ्जनं जातं व्यञ्जनात् सर्वतन्त्रकः। 10
सान्तं सर्वगतं सून्यं शिवरूपमिति स्मृतम्॥
अवर्गंच कवर्गंच चवर्गंच टवर्गकम्। 11
तवर्गंच पवर्गंच यवर्गंच शवर्गकम्॥
आदिवर्गेषु ऋॠच चतुरक्षर वर्जयेत्। 12
वर्जयेचैव विप्रेन्द्र अवर्गंच दशाक्षरम्॥
पूर्वं ह्रस्वं समाख्यातं परं दीर्घमिहोच्यते। 13
ह्रस्वा ब्रह्म समाख्याता दीर्घाङ्गानि चोच्यते॥
सद्योजातं तु गोक्षीर सदृशा वर्णमुच्यते। 14
जपापुष्पनिभा वाममघोरमञ्जन प्रभम्॥

In Public domain. Digitization Muthulakshmi Research Academy

प.५

पुरुषं कुङ्कुमप्रख्यमीशानं स्फटिकं भवेत्। १५

ब्रह्मवर्णास्समाख्याता रूपं वक्ष्यामि तेऽधुना॥

द्विनेत्रां चारुवदनां सुस्तनां च सुयौवनाम्। १६

द्विपादं च द्विहस्तं च पञ्चब्रह्ममिहोच्यते॥

षडङ्गं संप्रवक्ष्यामि हृदयं च शिरस्तथा। १७

शिखा कवचनेत्रं च अस्त्रमन्त्रेण संयुतम्॥

इन्द्रधूमं सुवर्णं च किञ्चिद्धूम्रं तथैव च। १८

रवेर्णाहं युगान्तानि संप्रख्यं पितामह॥

षडङ्गानां च सर्वेषां मन्त्रवर्णं विचिन्तयेत्। १९

द्विनेत्रां च द्विहस्तां च द्विपादेन समन्विताः॥

In Public domain. Digitization Muthulakshmi Research Academy

प.५ जटामकुटसंयुक्तां यज्ञोपवीतसंयुताः। 20
शुक्लवस्त्रसमायुक्तां षडङ्गानामिहोच्यते॥
स्त्रीरूपं भावयेत ब्रह्म षडङ्गं पुरुषो भवेत। 21
जपाकुसुमसंकाशं कुन्दपुष्पनिभं भवेत॥
अतसीपुष्पसंकाशं पद्मपुष्पसमं भवेत। 22
नीलजीमूतसमप्रख्यं कुङ्कुमप्रभमेव च॥
रक्तपङ्कजसंयुक्तं भिन्नाञ्जनसमप्रभम॥ 23
P.12, विद्येश्वराणां वर्णं च तव स्नेहात प्रकाशितम॥
अक्षरस्यादिसंयुक्तं बिन्दुश्चैव समप्रभम॥ 24
अष्टवर्गामृतीयं तु षष्ठस्वरसमन्वितम॥

In Public domain. Digitization Muthulakshmi Research Academy

प.4

शिवविष्णुसमारूढं प्रथमं चाष्टवर्गके। 25
आदिवर्गतृतीयं तु बिन्दुनादसमन्वितम्॥
प्रथमस्यैकादं संगृह्य शिवाविष्णुसमायुतम्। 26
पञ्चमस्य प्रथमं स्याद्द्वितीयं सप्तमस्य च॥
प्रथमस्य द्वितीयं तु शिवविष्णुसमायुतम्। 27
अष्टमस्यादिसंयुक्तं मायानलसमन्वितम्॥
शिवविष्णुसमारूढमष्टमस्यादिशं युतम्। 28
प्रथमस्य द्वितीयं तु बिन्दुनादसमन्वितम्॥
विद्येश्वराणां बीजानि क्रमशो ~~क्रमशो~~ वक्ष्यतेऽधुना। 29
गणाम्बिका च चण्डेशो नन्दीशश्च तथैव च॥

In Public domain. Digitization Muthulakshmi Research Academy

प.५

महाकालश्च वृषभो विघ्नेशश्च तथैव च। 30

भृङ्गीशश्च महासेन स्वनामाद्यक्षरैर्युतम्॥

इन्द्रश्चाग्निर्यमश्चैव निर्ऋतिर्वरुणस्तथा। 31

वायु सोमस्तथैशानो ब्रह्मा विष्णुश्च संयुतम्॥

स्वनामाद्येन बीजेन बिन्दुनादसमन्वितम्। 32

वज्रं शक्तिं च दण्डं च खड्गं पाशं तथाङ्कुशम्॥

गदा त्रिशूलं चक्रं च पद्मं चैव दशायुधम्। 33

स्वनामाद्येन बीजेन बिन्दुनादसमन्वितम्॥

षष्ठवर्गा द्वितीयं तु चतुर्त्यादेन संयुतम्। 34

द्वितीये पश्चिमे चैव आद्याक्षरसमायुतम्॥

In Public domain. Digitization Muthulakshmi Research Academy

प.4

विसर्गेण समायुक्तं पाशुपतास्त्रमुच्यते। 35

ओं ची चिरि छ्लि कृश्चैव क्षुरिकास्त्रमिहोच्यते॥

बिन्दुनाद समायुक्तं आचार्यं बीजमुच्यते। 36

भूतानां च पिशाचानां गन्धर्वा यक्षरी विरा॥

मात्राणां राक्षसानां च हृन्न वा गणामय। 37

स्वनामाद्यक्षरां विप्रा बिन्दुनादसमन्वितम्॥

मूर्तिपानां च शिष्याणामेवमेव क्रमेण तु। 38

अकारादि पञ्च वर्गं तु पञ्चाक्षरमिहोच्यते॥

P.13. यकारादिद्वयं वर्गं चतुरक्षरमुच्यते। 39

वकारद्वयन्ताद्वस्य बिन्दुनादसमन्वितम्॥

In Public domain. Digitization Muthulakshmi Research Academy

पा-५

अनन्तासनं तु विप्रेन्द्र योगासनं तथैव च । 40

सिंहासनं तथैव स्यात् पद्मासनमतः परम् ॥

विमलासनन्तु विप्रेन्द्र स्वनामाद्यक्षरैर्युतम् । 41

बिन्दुनादसमायुक्त तत्त मन्त्रमिहोच्यते ॥

आग्नेयमण्डलं चैव विन्यसेच्च विशेषतः । 42

तत्त्वाख्यमण्डलं चैव रजोमण्डलमेव च ॥

ततो मण्डलमेवोक्तं स्वनामाद्यक्षरैर्युतम् । 43

बिन्दुनादसमायुक्तं तत्त मन्त्रमिहोच्यते ॥

व्योमव्यापि महामन्त्रं षण्णवत्यक्षरैर्युतम् । 44

अस्मिन् तन्त्रे तु विप्रेन्द्र कथयामि तवाखिलम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

प.५

द्वादशस्य.. पद्मस्य बहिस्य द्विविथा पुनम्। 45

चतुरावरणै या रक्तमं ‌भ्य नरादी वाह्यकम॥

मन्त्रमुद्धार्यते विप्र सर्वकाममवाप्नुयात। 46

भूतान्तश्चैव भूतानां भूतभूतान्तमेव च॥

शिव विष्णु समारूढं शिवमन्त्रमिहोच्यते। 47

चक्रमध्ये स्थितं विप्र सर्वलोकहिताय च॥

व्योमश्च रूपाश्च वश्चैवं रूपायश्च त ऽाव च। 48

घोरश्च देश्च तश्चेम श्चराश्च त ऽाव च॥

तश्च यश्चैव वायश्च पुश्च अश्च ङमश्च च। 49

व्योमश्च योश्च ईशश्च मूश्च ञजयश्च च॥

दृश्च पाश्च विनेरश्च मेश्च तिश्च ऽाव च। 50

ऽाश्च नश्च विकारश्च क्राश्च वायश्च ऽाव च॥

In Public domain. Digitization Muthulakshmi Research Academy

प.५

एवं क्रमेण विप्रेन्द्र विन्यसेदस्त्रमन्त्रवित्। ५१
वश्च तश्च समूधिश्च विश्चैव दं व च॥
निश्च यश्च धीपश्चैव श्चैव क्रमाश्च जातश्च गाश्च त। ५२
गणश्च सनरोगाश्च तश्च नश्च इभा एव च॥
व्योश्च श्चैव येयोश्च ओंश्च श्च यश्च एव च। ५३
अयश्च यो येश्च मो श्चैपश्च सश्च स एव च॥
ओंग्रश्च जश्चेति रिश्चा वाय निश्च एव च। ५४
प्रदक्षिणे क्रमेणैव विन्यसेद्देशिकस्सदा॥
एवं क्रमेण विन्यासं सर्वकाममवाप्नुयात्। ५५
व्योमव्यापिरितं मन्त्र ऋषिश्छन्दो देवतां शृणु॥

In Public domain. Digitization Muthulakshmi Research Academy

प. ५

अगस्त्येन समायुक्तं जगतीश्छन्दसंयुतम्। 56

P.14. ईश्वरेणं समायुक्तं व्योमव्यापिमिहोच्यते॥

वसिष्ठेन समायुक्तं प्रकृतिश्छन्दसंयुतम्। 57

शिवरूपेण संयुक्तं शिवमन्त्रमिहोच्यते॥

आचार्यस्य बीजस्य च ऋषिश्छन्दो देवतात्। 58

भृगु कौशिकं काश्यपश्चैव भारद्वाजश्च गौतमः॥

अत्रिणा च समायुक्तं पञ्चवक्त्रेषु दीक्षिता। 59

तत्तत्कुलेषु जातानां तत्तत्त्रभृषिकदाहृतम्॥

जगती शक्वरी चैव अनुष्टुप त्रष्टुपेव च। 60

प्रकृतीश्चैव विप्रेन्द्र छन्दसानामिहोच्यते॥

In Public domain. Digitization Muthulakshmi Research Academy

प.५

आगमस्यैव बीजानि प्रवक्ष्यामि नु पूर्वश । 61
द्वितीयस्यादि संयुक्तं द्वितीय स्वरसंयुतम् ॥
द्वितीयं तु · · · - - - · · बिन्दुनाद विभूषितम् । 62
कामिकाक्षरमेवोक्तं योगजं च शृणुष्वथ ॥
सप्तमस्यादि संयुक्तमेकादश समन्वितम् । 63
बिन्दुनाद समायुक्तं योगजाक्षरमुच्यते ॥
तृतीस्यादिमं गृह्य सप्तमस्य तृतीयकम् । 64
अष्टमस्य चतुर्थ्यं तु बिन्दुनाद समन्वितम् ॥
चिन्त्याक्षरमिदं प्रोक्तं द्वितीयस्यादि संयुतम् । 65
सप्तमस्य द्वितीयं तु बिन्दुनाद समन्वितम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

प.4

कारणाख्यमिदं प्रोक्तं प्रथमस्यादिसंयुतम्। 66
आकाशबीजसंयुक्तं सप्तमस्य द्वितीयकम्॥
बिन्दुनादसमायुक्तमजितञ्च मिहोच्यते। 67
पञ्चमस्य तृतीयं तु सप्तमस्यादिसंयुतम्॥
द्वादशाक्षरसंयुक्तं बिन्दुनादसमन्वितम्। 68
दीप्तबीजमिदं प्रोक्तमष्टवर्ग तृतीयकम्॥
द्वादशस्वरसंयुक्तं बिन्दुनादसमन्वितम्। 69
सूक्ष्मे बीजमिदं प्रोक्तं अष्टवर्गतृतीयकम्॥
सप्तमस्य द्वितीयं तु मायाबीजेन संयुतम्। 70
बिन्दुनादसमायुक्तं सहस्रं चोच्यते मया॥

In Public domain. Digitization Muthulakshmi Research Academy

पृ.4

अन्त्याक्षरसमायुक्त माद्याक्षरसमन्वितम्। 71

बिन्दुनादसमायुक्तमंश्ऽमानक्षरं भवेत्॥

अष्टवर्ग तृतीयं तु अनलेन समायुतः। 72

पञ्चमस्वर संयुक्तं बिन्दुनाद समन्वितम्॥

सुप्रभेदाक्षरं प्रोक्तं सप्तवर्गस्य चादिकम्। 73

तृतीयन्तु स्वरसंयुक्तं बिन्दुनादसमन्वितम्॥

P.15 विजयं चैव विप्रेन्द्र पञ्चमस्यान्तसंयुतम्। 74

मायानलसमायुक्तं बिन्दुनादसमन्वितम्॥

निश्वास तन्त्र मेवोक्त मष्टवर्गा तृतीयकः। 75

सप्तमस्य चतुर्थ्यन्तु मायाबीजसमन्वितम्॥

In Public domain. Digitization Muthulakshmi Research Academy

प.५

बिन्दुनादसमायुक्तं वीरतन्त्रमिहोच्यते। 76

सप्तमस्यादिमं बीजं मायानलसमन्वितम्॥

(बिन्दुनादसमायुक्तम्)

सप्तमस्य द्वितीयं तु द्वादशस्वरभूषितम्। 77

आकाशबीजसंयुक्तं बिन्दुनादसमन्वितम्॥

अक्षराणां परं श्रेष्ठं रौरवं प्रोच्यते मया। 78

षष्ठमस्यान्तिकं बीजमन्त्याक्षरसमायुतम्॥

मायानलसमायुक्तं मकुटाक्षरमुच्यते। 79

सप्तमस्यादिमं बीजं मायानलसमन्वितम्॥

बिन्दुनादसमायुक्तं विमलं चैव कथ्यते। 80

तृतीयस्यादिकं प्रोक्तं मायानलसमन्वितम्॥

In Public domain. Digitization Muthulakshmi Research Academy

प.५ बिन्दुनादसमायुक्तं चन्द्रज्ञानमिहोच्यते । ८१
षष्ठवर्गतृतीयं तु द्वादशस्वरभूषितम् ॥

बिन्दुनादसमायुक्तं बिम्बस्याक्षरमुच्यते । ८२
अष्टवर्गादिमं बीजं द्वादशौरनलो भवेत् ॥

बिन्दुनादसमायुक्तं प्रोत्‍गीतञ्च मिहोच्यते । ८३
सप्तमस्य तृतीयं तु ऽकादशेन संयुतम् ॥

बिन्दुनादसमायुक्तं लक्षितस्य तु मन्त्रकम् । ८४
अष्टवर्गतृतीयं तु सप्तस्वरसमायुतम् ॥

अनलेन समायुक्तं सिद्धतन्त्र मिहोच्यते । ८५
अष्टवर्गतृतीयं तु अष्टमस्वरभूषितम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

प.५

सप्तमस्य द्वितीयेन बिन्दुनादसमान्वितम्। 86

सन्तानस्य तु मन्त्रोऽयंमष्टवर्गादिसंयुतम्॥

द्वादशस्वरसंयुक्तं बिन्दुनादसमन्वितम्। 87

नौ?
सर्पी त्वीतमिदं प्रोक्तं षष्ठवर्गादिसंयुतम्॥

मायानलसमायुक्तं बिन्दुनादसमन्वितम्। 88

पारमेश्वरमेवोक्तं द्वितीयस्यादिमं युतम्॥

द्वादशस्वरसंयुक्तं बिन्दुनादसमन्वितम्। 89

किरणस्याक्षरं प्रोक्तं सप्तमस्य चतुर्थकम्॥

मायानलसमायुक्तं बिन्दुनादसमन्वितम्। 90

वातुलस्य तु मन्त्रोऽयमष्टाविंशतिभेदकम्॥

In Public domain. Digitization Muthulakshmi Research Academy

प.4

P.16 ऋषिश्छन्दो देवताश्च वक्ष्ये आगमानां विशेषतः। 91

वसिष्ठेन समायुक्तं चत्वरीच्छन्दसंयुतम्॥

नव रूपेण संयुक्तं कामिकादीनि सप्त च। 92

सहस्रादीनि सप्तैते व्यासेनैव समायुतम्॥

जगतीच्छन्दसा युक्तं विष्णुस्तत्राधिदैवतम्। 93

एवमेव क्रमेणैव मन्त्राणां प्रोच्यते मया॥

अदीक्षितन्न श्रोतव्यन्न देवन्न प्रकाशतः। 94

शिष्याणां चैव दातव्यं समासात् कथयामि ते॥

अष्टवर्गा तृतीयान्ता आद्यक्षरसमायुतम्। 95

- - - - - - - - - - - - ......॥

In Public domain. Digitization Muthulakshmi Research Academy

प.५ शक्तिबीजमिदं प्रोक्तौ सर्वकामार्थसाधनम् । 96
सदाशिवस्य रूपं तु वक्ष्यामि शृणु तत्त्वतः ॥

॥ सदाशिव ध्यानम् ॥

शुद्धस्फटिकसंकाश - - - - दशभुजैर्युतम् । 97
पञ्चवक्त्रयुतं देवं जटामकुटमण्डितम् ॥
दिव्याम्बरधरं देवं सर्वाभरणभूषितम् । 98
परशु खड्गं च वज्रं च अभयं दक्षिणे करे ॥
पाशाङ्कुशं च घण्टा च नागवन्यक्ष वामके । 99
पद्मासनसमासीनो नेत्रैः पञ्चदशै र्युतम् ॥
एतत् सकलमाख्यातं धर्मकामार्थमोक्षकम् । 10.
मन्त्रोद्धारं मया प्रोक्तं पुष्पाणां च शृणुष्वथ ॥

इति वीरतन्त्रे षट्सहस्रसंहितायां
मन्त्रोद्धारविधिः चतुर्थ पटलः ॥

In Public domain. Digitization Muthulakshmi Research Academy

[पटलः 5] ॥ अथ पुष्पलक्षणविधिपटलः ॥

पुष्पाणां चैव सर्वेषां पत्राणां च तथैव च ।
विशेषं श्रोतुमिच्छामि तन्मे ब्रूहि महेश्वर ॥ 1
यस्मात् पुष्पस्य संख्यानि पूजनायोग्यमेव च ॥
अयोग्यं हि च पुष्पाणां तावच्छृणु तपोधनः ॥ 2
अर्कपुष्पसहस्रेभ्यः करवीरं विशिष्यते ॥
करवीरसहस्रेभ्यो बिल्वपत्रं विशिष्यते ॥ 3
बिल्वपत्रसहस्रेभ्यो पद्ममेकं विशिष्यते ।
पद्मपुष्पसहस्रेभ्यो पुण्डरीकं विशिष्यते ॥ 4
पुण्डरीकसहस्रेभ्यो शतपत्रं विशिष्यते ।
शतपत्रसहस्रेभ्यः सहस्रपर्णं विशिष्यते ॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. ५

P.17- सहस्रपर्णी सहस्रेभ्यो बकपुष्पं विशिष्यते।
बकपुष्पसहस्रेभ्यो धूर्धूरक विशिष्यते॥ 6
धूर्धूरकसहस्रेभ्यो द्रोणपुष्पं विशिष्यते।
द्रोणपुष्पसहस्रेभ्यो अपामार्गं विशिष्यते॥ 7
अपामार्गसहस्रेभ्यो कुशपुष्पं विशिष्यते।
कुशपुष्पसहस्रेभ्यो शमीपुष्पं विशिष्यते॥ 8
शमीपुष्पसहस्रेभ्यो व्याघातं तु विशिष्यते।
व्याघातसहस्रेभ्यः शङ्खपुष्पं विशिष्यते॥ 9
शङ्खपुष्पसहस्रेभ्यो व्याघ्रपुष्पं विशिष्यते।
व्याघ्रपुष्पंसहस्रेभ्यस्सदा भद्रं विशिष्यते॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प.5

सदाभद्रसहस्रेभ्य कृष्णगुण्डिका . . . ।

द्विप्रन्नह्मत पुष्पं . . . . ॥ 11

. . — . . ---- --- — . ----।

बृहत्पुष्पसहस्रेभ्यः स्सश्वेतार्क विशिष्यते ॥ 12

श्वेतार्कन्तु सहस्रेभ्यो बृहद्द्रोणं विशिष्यते ॥

बृहद्द्रोणसहस्रेभ्यो नीलोत्पलं विशिष्यते ॥ 13

स्वर्णक्षूरपुष्पं तु नीलोत्पलसमुद्भवो ॥

प्रक्षाल्य पञ्चगव्येन नीलोत्पलं तु काञ्चनम् ॥ 14

पुनः पूज्याः प्रकर्तव्यं सर्वलोकहिताय च ॥

जपापुष्पकदम्बं च पुन्नागं चैव डाव हि ॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

प-5

द्रोणपुष्पसहस्रेभ्यो ज्ञेयं विष्णुक्रान्तिश्चपस्तथा।

अजायं मल्लिका जाति - - - - - - - ॥ 16

धुर्द्धूरसम ज्ञेयश्चम्पकन्तु कटस्तथा ।

बिल्वपत्रसम ज्ञेयं - - - - - - ॥ 17

केरभजं मालती चैव करवीरसमं भवेत्।

पद्मपुष्पसमं ज्ञेयं वकुळं प - - - - - ॥ 18

अशोकश्वेतमन्दारं व्याघातस्सममुच्यते।

श्वेतं कुसुमरक्तोत्पलमपामार्गं भवेत् ॥ 19

पट्टीकाश वेदसि)

सेजकालोत्पलश्चैव कल्पारं कुन्तकन्तथा।

In Public domain. Digitization Muthulakshmi Research Academy

प.5

पटीका रक्त कस्या च व्याघ्रपुष्पं समं भवेत् । 20

गन्धपुष्पागन्धपुष्पा पद्मपुष्प समं भवेत् ॥

इन्द्रवल्ली तुलसी अर्कपुष्प समं भवेत् । 21

कोरण्डकरी पुष्पं च अपामार्ग समं भवेत् ॥

नीलनीलञ्च पुष्पञ्च अपामार्गसमं भवेत् । 22

धुर्द्धूर करसमा ज्ञाया महाभद्र नृणामपि ॥

P.18 वज्रं च पद्मरागं च मरकतं मौक्तिकानि च । 23

मुसली पलाश पुष्पं च द्रोणपुष्प समं भवेत् ॥

केशपुष्प समं ज्ञेय अंबिक अत शींशुप । 24

सूर्यावर्तं च नागं च . . . . . मेव च ॥

In Public domain. Digitization Muthulakshmi Research Academy

प.5

इन्द्रनीलं महानीलं वैडूर्यञ्च प्रवालकम्। 25

नीलोत्पला समाज्ञेया सर्वरत्नानि चैव हि॥

सिंके परिपालञ्च . . . . मेवच। 26

अङ्कोल सकरञ्चैव प्रियङ्गुश्चम्बकेव च॥

अर्कपुष्पसमायुक्तं पूजयेत्तु विशेषतः। 27

पलाशपुष्पं विप्रेन्द्र रविरश्मि समायुतम्॥

नवभाण्डे परिग्राह्य षण्मासं पूजयेच्छिवम्। 28

यवगोधूम नीवर व्रीहि वैणवकानि च॥

निष्पावमाषश्यामञ्च नीलमुद्गकाश्च च। 29

अङ्कुराणि प्रकर्तव्यं पूजा च्छिवमादरात्॥

In Public domain. Digitization Muthulakshmi Research Academy

प.5

०याघ्रातसममेवं तु इदमन्यच्छृणुष्वधः। 30

कदम्बार्जुनसिन्दूरं कुसुमं कुसुमानि च॥

श्वेतस्तु गिरिकर्णीच नन्द्यावर्तञ्च शारिबा। 31

कदलीपुष्पपुन्नागनागनन्दि तथैव च॥

गिरिवेरिञ्च पत्रञ्च करवीरसमं भवेत्। 32

मधूकधूतपुष्पं च करपाद्धि र्द्धानि वा॥

पत्रञ्चैव विप्रेन्द्र पद्मपुष्पसमं भवेत्। 33

गिरिरागककौ गिरिकर्णीच धुद्धूरकसमं भवेत्॥

निर्गन्धान्युत्गृह गन्धानि कुसुमानि विवर्जयेत्। 34

पुष्पाणामप्यलाभे तु फलानां पूजयेत्ततः॥

In Public domain. Digitization Muthulakshmi Research Academy

प.५

फलानामप्यलाभे मूलेनैव तु पूजयेत्। 35

मूलानामप्यलाभे तु भक्त्या चैव तु पूजयेत्॥

एवमेव क्रमेणैव पूजयेद्देवकर्माणि। 36

केदकी माधवीं पद्मयंध्री पूजयेत् सदा॥ (वर्ज)

शिरीष सर्ज बन्धूकी किंशुकन्धुनिभन्तथा। 37

नीलकर्णी चमेवञ्च तलपोटकमेव च॥

मत्स्याक्षी रूक्षैव शीग्रञ्च वर्जयेल्लिङ्ककर्मणि। 38

एवमेव क्रमेणैव यो नरः पूजयेत् सदा॥

स मुक्तस्सर्वपापेभ्यो रुद्रलोकं स गच्छति। 39

पुष्पाध्यायमिदं प्रोक्तं कर्षणस्य विधिं शृणु॥

इति वीरतन्त्रे —

पुष्पलक्षण पञ्चम पटलः॥

In Public domain. Digitization Muthulakshmi Research Academy

(पटल: 6) ॥कर्षणविधिपटलः॥

कर्षणं कीदृशं देव वास्तुलक्षणमेव च।

ऽतत् सर्वं समासेन ब्रूहि मे परमेश्वर॥ 1

कर्षणस्य विधिं यावत् तावत् शृणु तपोधनः।

पुष्यमासादि षण्मासं देवतानां दिवा भवेत्॥ 2

आषाढादि षण्मासं रात्रिरित्यभिधीयते।

दिवामासञ्च गृह्णीयाद्रात्रिमासं च वर्जयेत्॥ 3

प्राजापत्यञ्च युत् सौम्य हस्त पौष्णन्तिरुत्तराः।

मैत्रादित्य मघा स्वादि त्वष्ट्र श्रवणन्त्व(श्व) भा॥ 4

ऽषामेव दिनं श्रेष्ठं धनधान्यविवर्धनम्।

द्वितीयामा तृतीयामाः पञ्चमी षष्ठीं सप्तमी॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प.6

दशम्येकादशे वापि शुक्लपक्षे त्रयोदशी।

प्रतिपत्पौर्णमास्यां वा कारयेत्तु शिवद्विजः॥ 6

राशयश्चरा वर्ज्याश्च ग्राह्या 'धनुरशोभनम्'

सोमभार्गवसौम्यायां वारश्रेष्ठतम स्मृता॥ 7

प्रायामेवोदयशस्तन्तत्र सोमोदयं विना।

अष्टमस्था ग्रहास्सर्वे कर्तुः कुर्वन्तु दुःस्थितम्॥ 8

खण्डस्थ ग्रान्त नक्षत्रे गुळिकाविष्ट यस्यजेत्।

ग्रहणे बिन्दुवे चैव अयने व्यतिपादके॥ 9

षडशीतिमुखे वापि कृतं कार्यं विनश्यति।

एवं परीक्षा कर्तव्य सर्वसंपत्कराय च॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प.6 अथ भूमिं परीक्ष्येवा पश्चात् कर्षणमारभेत्।
मौषरं कुकुर्मिभि दुष्ट वमीकाद्यञ्च वर्जयेत्॥ 11
श्वेतं तु ब्रह्मभूमीति रक्तं वै क्षत्रियस्य तु।
पीता वैश्या इति प्रोक्ता कृष्णा शूद्रा इति स्मृता॥ 12
हस्तमात्रं खनित्वा तु पूरयेत्तेन पांसुना।
अधिकञ्चोत्तमज्ञेयं अधमं न्यूनमेव च॥ 13
समञ्च स--स्यत् वर्जयेत् शिवमन्त्रतः।
एवं परीक्ष्य बहुधा कुर्यात्कर्षणमुत्तमम्॥ 14
नाङ्गहीनवृषौ ग्राह्य श्वेतौ वा रक्तकापिला।
सर्वलक्षणसंयुक्तो बलवा मध्यमो वरः॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

प-6

आराध्य वृषमन्त्रेण हेमश्रृङ्गारूप्यरान्वितौ।
क्षीरवृक्षयुगं बद्ध्वा गोचर्मणैव बन्धयेत्॥ 16
आसनं खदिरं वाथ हलं कृत्वाथ लोहकम्।
आचार्यस्सकलीकृत्य नववस्त्रेण वेष्टयेत्॥ 17

P-20 सर्वाभरणैस्संपूज्यमर्चयेत शिवमन्त्रतः।
"ओं तीक्ष्णशृङ्गाय विद्महे वेदपादाय धीमहि
तन्नो वृषः प्रचोदयात्"
अभ्यर्च्य वृषभं तत्र कर्षयेच्छिवमन्त्रतः॥ 18
प्रागुदक्कर्षयेत्तत्र आचार्यं पूजयेत्ततः।
शालिमुद्गौ कुलुत्थञ्च भूतले विन्यसेत्ततः॥ 19

In Public domain. Digitization Muthulakshmi Research Academy

प.६

आचार्याय प्रदातव्यं सहस्रगौ वृषभौ तथा।

तेषु पक्वेषु कालेषु गोगणान्निवेदयेत॥ २०

शल्यं विमोचयेत्तत्र लक्षणेन समन्वितम्।

पुण्याहं वाचयेत्तत्र प्रोक्षयेच्छिवमन्त्रतः॥ २१

पूजान्ते स्पर्शयन् कर्तावि॑ङ्गस्तन्निरीक्षयेत्।

वास्तुदेहे व तत्रैव शल्यबूथोन्यथाक्रमम्॥ २२

अस्थिशल्या शिरस्पर्शात्तद्धिस्तत्र्य द्वयमानतः।

कर्णस्पर्शे गले ताद्भत् प्रत्यस्तत्रयमानतः॥ २३

त्रिहस्ते श्रृंगलालयमु स्पर्शात्तु देशिकः।

हस्तमात्रे करस्पर्शात् खलापादिं समादिशेत्॥ २४

In Public domain. Digitization Muthulakshmi Research Academy

प-6

....रकमिहस्ते तु बाहुस्पर्शनमुच्यते।

? बड्ल्फेन पादि निर्दिष्टं वितस्ति प्रमाणन..दे.

. कर्णांगमुच्यते॥ 25

कनिष्ठाङ्गुल्यो स्पर्शा अकरत्येकाङ्गमुच्यते।

कटस्पर्शात्तु लोहं च करद्वय प्रमाणतः॥

नाभि कोर्परं हस्तैश्च जानु स्पर्शमेव च। 26

एवं परीक्ष्य बहुधा शल्यमुद्धरते क्रमात्॥

घनं कृत्वा तु विप्रेन्द्र गोमयेनानुलेपयेत्। 27

पुण्याहं वाचयेत्तत्र बण्णवत्य तु प्रोक्षयेत्॥

अश्वात्थादुम्बरं वाथ शङ्कुं वै ग्राहयेत्ततः। 28

आयामद्वादशाङ्गुल्यं नाहं स्यात्तु षडङ्गुलः॥

In Public domain. Digitization Muthulakshmi Research Academy

प.६ तत्र मध्ये स्थितं शङ्कुं मानेन तु भ्रामयेत्। २९
सूत्रद्वयन्ते . . . . नैवर्णमाततः॥
पूर्वाह्णे च पराह्णे च शङ्कुच्छायाच्च द्विलाञ्जयत्। ३०
तत्र सूत्रे द्वयं प्रातं पातयेच्छङ्कुमध्यमे॥
प्रागितत् तत्र मानेन मद्धुयस्तेनैव कारयेत्। ३१
उदक् सूत्रं भवेदत्र कृत्वा तु चतुरश्रकम्॥
पञ्चगव्येन संप्रोक्ष्य वण्णवत्त्येन मन्त्रतः। ३२
वास्तुदेवान् समभ्यर्च्य पुरुषं पूजयेत्ततः॥
असुराणां हितार्थाय शङ्कु कृत्वा महातपः। ३३
P.21 महास्तपसि संपूतां भूताकारं महाबलम्॥

In Public domain. Digitization Muthulakshmi Research Academy

प.६

भूम्यां मथो मुखस्तन्तु तद्वास्तुपुरुषो भवेत्। 34
ऽवमेव क्रमं कृत्वा वास्तुं तत्रैव कल्पयेत्॥
दशसूत्रांश्च प्रागग्रा उदगग्रान्तथैव च। 35
ऽकाशीतिपदं कृत्वा वास्तुदेवान् प्रकल्पयेत्॥
मध्ये नवपदं ब्रह्मा चतुर्दिक्षु च विन्यसेत्। 36
ब्रह्माणं पूर्वतो भागे स्मर्यकन्तु षट्पदम्॥
दक्षिणे तु विवस्वांश्च षट्पदं चैव इज्यते। 37
मित्रश्चैव तु विप्रेन्द्र पश्चिमे षट्पदस्तथा॥
उत्तरे षट्पदम ·· न्ते पृथिवीधर ऽव च। 38
आपश्चैव पवत्शश्च ऽशान्य तु पदद्वयो ॥

In Public domain. Digitization Muthulakshmi Research Academy

प-६

सवित्र सावित्र्याश्चैव आग्नेयान्तु पदद्वये। 39
इन्द्रश्चैन्द्र जयश्चैव नैर्ऋत्यां तु पदद्वये।।
रुन्द्रो रुद्रजयश्चैव वायव्यां तु पदद्वये। 40
ईशाश्चैव पर्जन्यो जयन्तश्च महेन्द्रकः।।
आदित्यस्सत्यक भृश अन्तरिक्षश्च पूर्वशा। 41
अग्नि पूषाश्च वितथो गृहक्षत यमस्तथा।।
गन्धर्वो भृङ्गराजश्च भृङ्गश्चैव तु दक्षिणे। 42
पितृ दौवारिकश्चैव तथा सुग्रीव एव च।।
पुष्पदन्तश्च वरुण असुरश्च तथैव च। 43
शोषश्च पापयक्ष्मा च पश्चिमेषु व्यवस्थितः।।

In Public domain. Digitization Muthulakshmi Research Academy

प.6

उत्तरेषु तथा रोगान्नागो मुख्यस्तथैव च। 44
भल्लाटश्च तथा सोमो र्जगो दिति दितिस्तथा॥
पूतना नैर्ऋते चैव पापराक्षसि वायवे। 45
वास्तुपानां तु सर्वेषां ब्रह्माभिमुखमेव च॥
एवं विन्यस्य देवांश्च पुरुष प्रोच्यते मया। 46
चसंमरीयकेशारं विद्यात् भुजकायमथोच्यते॥
आपापवत्सके विप्र वामबाहुरिति स्मृतः। 47
सावित्री सविता चैव दक्षिणं बाहुरुच्यते॥
रुद्रो रुद्रजयश्चैव वामपादं प्रकीर्तिता। 48
इन्द्रो इन्द्रजयश्चैव दक्षिणं पादमुच्यते॥

In Public domain. Digitization Muthulakshmi Research Academy

प-6 मित्रश्चैव तु लिङ्गस्या वृषणं पृष्ठमेव च। 49
एवं वास्तुरिदं प्रोक्तं चरवास्तु शृणुष्वथ॥

॥ वास्तुपुरुषन् (:)? ॥

मासे भाद्रपदेष्वादि पूर्वशीर्ष मुच्यते। 50
P.22. मार्गशीर्षस्य मासादि त्रयो मासन्तु दक्षिणे॥
फल्गुन्यादि त्रयो मासं पश्चिमे शिर उच्यते। 51
ज्येष्ठमासादि विज्ञेया उत्तरे शीर्षन्तथा॥
पूर्वशीर्षं मध्याह्ने साये दक्षिणशीर्षकम्। 52
मध्यरात्रे तु विप्रेन्द्र पश्चिमे शिर उच्यते॥
उषाकाले तु सर्वेषु उत्तरे शिर उच्यते। 53
एवं पुष्पैश्च धूपैश्च दीपैश्चैव सुपूजयेत्॥

In Public domain. Digitization Muthulakshmi Research Academy

प-6

वक्ष्ये बलिविधिं यावत्तावत् श्रृणु तपोधनः। 54

बलि ता तव्यं   पायसान्नं घृतप्लुतम्॥

प्रदद्याश्च फलभक्ष्यँन्तु समर्यके विशेषतः। 55

तिलमष्टान्न संयुक्तं विवस्वाति बलिन्ततम्॥

पूर्वा वदिधि ? प   महिषक्षीरमेव च। 56

पर्जन्यश्चैव सर्पिश्च जयन्ते नवनीतकम्॥

महेन्द्र पिष्टमेवं तु - - - - मधुरुच्यते। 57

मधुश्चत्रे दरफलं   सद्ये बलिमिहोच्यते॥

कं · · त्वानश्चं वितथे बिम्बानच ग्रहक्षते। 58

कृसरं यममेवन्तु गन्धर्वे खिलमुच्यते॥

In Public domain. Digitization Muthulakshmi Research Academy

प-6

समुद्रतस्यं विप्रेन्द्र भृङ्गराजबलिं ततः। 59
दध्यान्नञ्च मृगे दद्यात् पितृ पिण्याकतैलकम्॥
दृष्टेव शतपिष्टे दौवारि सुग्रीवके। 60
पुष्पदन्ते च कुसुमं पायसं वरुणे तथा॥
असुरं मधुकं विद्या च्छोबेत तिलतण्डुलैः। 61
रोगोभि शुष्कं स्यं भी नागौ चाजबलिं तथा॥
मुख्येऽपि धान्यचूर्णन्तु दधिसंयुतमेवच। 62
भल्लाटे तु गुडान्नं स्यात् सोमे गुडान्नमेवच॥
त्रगवे ‥वे गुडञ्चैवादितिदैवस्तु मोदकैः। 63
दितौ च तिलभक्ष्येण क्षीरान्नं सर्पशीरिके॥

In Public domain. Digitization Muthulakshmi Research Academy

प-6

आपो तथा पवत्से च अजमांसं च मत्स्यकम् । 64

सविता सावित्रके चैव जंग गन्धोदनं ततः ॥

इन्द्रो बलिस्तथा दद्यादिन्द्रजये तु सातगकम् । 65

रुद्रे रुद्रे जये चैव मांसक्षीर बलिं ददेत् ॥

चरकी घृतमेवं तु वितारी लवणं तथा । 66

तिलापिष्टं पूतना चैव गुडमांसं पापराक्षसी ॥

स्फटिकतः कृतो पवासञ्च ग्रवमेव बलिं कुर्देत् । 67

देवतानामसंयुक्तञ्च चतुर्थ्यन्त समायुतम् ॥

P.23 नमस्कारान्त संयुक्तं बलि ... द्वि निर्दिशेत् । 68

आचार्यो बलिदातव्य वास्तुहोमादि कर्मसु ॥

In Public domain. Digitization Muthulakshmi Research Academy

प.६

शुद्धान्नं घृतसंयुक्तं माषमुद्ग समन्वितम्। 69
आचार्यश्च शुचिर्भूत्वा उपवास समन्वितम्॥
नववस्त्र परीधानं सोष्णीषं सोत्तरीयकम्। 70
प्रणवाद्येन संयुक्तं देवतानामसंयुतम्॥
नमस्कारान्त संयुक्तं बलिं दद्यात् शिवद्विजः। 71
आचार्यं पूजयित्वा तु वस्त्रधान्यादिकाञ्चनैः॥
एवमेवं महाशान्तिस्सर्वसंपत्कराय च। 72
एवं यः कुरुते मर्त्यो देवकर्माणि सारिणः॥
शिवलोकमवाप्नोति शिववन्मोदते सदा। 73
कर्षणस्य विधिः प्रोक्तमाचार्य लक्षणं शृणु॥

इति वीरतन्त्रे षट्सहस्रसंहितायां
कर्षणविधि षष्ठ पटलः॥

In Public domain. Digitization Muthulakshmi Research Academy

(पटलः ७) ॥ आचार्यलक्षणपटलः ॥

देशिकाः कीदृशा ज्ञेया शैवाः सप्तविधः[ाः] कथम्।

तस्मात्कुले तु संजात स्तत्सर्वं ब्रूहि मे प्रभो ॥ 1

साधु साधु महाप्राज्ञ यत्त्वया परिचोदितम्।

समासात् कथ[यि]मिष्यामि तन्मे निददि शृणु ॥ 2

देश आदिश्यते येन देशिकं सददाहृतः।

सर्वेषां तु गुरूंश्चैव गुरुरित्यभिधीयते ॥ 3

लिङ्गस्थापन योग्यत्वात् स्थापको नाम उच्यते।

अप्रमत्तो भवेन्नित्य नित्योवा गुरुपूजकः ॥ 4

एवं लक्षणसंयुक्त माचार्यस्समुदाहृता।

शैवास्सप्तविधा ज्ञेयास्तेषां भेदं शृणुष्वथ ॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प- ७

अनादिशैवः प्रथम आदिशैव द्वितीयकम् ।
तृतीयं तु महाशैवश्चतुर्थश्चनुशैवकः ॥ ६ 6
पञ्चमेवान्तरः शैव षष्ठे प्रवर उच्यते ।
सप्तमे वान्त्यशैवस्तु शैवनाममुच्यते ॥ ७ 7
अनादिशैवस्स शिव आदिशैवश्शिवद्विजः ।
महाशैवः केवलो विप्रक्षत्रियो वैश्य एवच ॥ ८ 8
अनुशैवौ समाख्यातौ शूद्रस्वान्तर स्मृतः ।
स्वर्णाम्बष्ठमध्यस्तौ कुलालौ पारवस्तथा ॥ ९
प्राचणश्चैव विप्रेन्द्र प्रोच्यते सकलं मया ।
अन्येषामेव जातीनामनुशैवमिहोच्यते ॥ १० 10

In Public domain. Digitization Muthulakshmi Research Academy

प-7

P. 24. आदावेव तु शैवत्वादादिशैव इति स्मृतः।

कौशिकः काश्यपश्चैव भारद्वाजास्त्रिरेव च॥ 11

गौतमश्चैव पञ्चैते पञ्चवक्त्रेषु दीक्षिताः।

शिवेन दीक्षिताश्चैव शिवब्राह्मण उच्यते॥ 12

शिवशिरवस्तथा ज्योति सावित्री व्योम एव च।

कौशिकस्योत्तरमुखं काश्यपश्चैव दक्षिणे॥ 13

भारद्वाजं पुरा ज्ञेया पश्चिमे गौतमस्तथा।

* कौशिकशिवभक्त्या स्तु काश्यपस्त्वीश्वरेण तु॥ 14

ईशानेन भरद्वाजो ब्रह्ममूर्तिस्तु गौतमः।

अत्रेस्सदाशिवेनैव उमामूर्तिस्तु दीक्षितः॥ 15

* अत्रिरूर्ध्वमुखं ज्ञेयमेवमेवेषु दीक्षिताः।

In Public domain. Digitization Muthulakshmi Research Academy

पृ.न

पञ्चगोचरशुद्धात्मा त्र्यजय: पञ्च उच्यते।

शिवदीक्षात् परञ्जात शिव ब्राह्मण उच्यते।। 16

कौशिकस्य महीक्षत्रं पाण्डरीकन्तु काश्यपे। ।१७।

गोकर्णन्तु भरद्वाजो नागरीकस्तु गौतमम्॥

अदनाधस्तु वरण्यो सममेतद्विनिर्दिशेत्। 18

शैवं पाशुपतं सोमं लाकुळन्तु चतुर्विधम्॥

शैवभेदमिति ज्ञेयं संकरं न समाचरेत्। 19

एतेषामपि तन्त्राणां नव त्वैकस्य तु संकरः॥

तन्त्र संकरमेवोक्तं न कुर्यात्तु तन्त्रसंयुतम्। 20

तन्त्रासंकर दोषेण राजराष्ट्रं विनश्यति॥

In Public domain. Digitization Muthulakshmi Research Academy

प.ग

अष्टाविंशतिभेदेन शैवभेदं विधीयते। 21

कामिकं योगजं चिन्त्यं कारणं त्वजितं तथा॥

दीप्तं सूक्ष्मं सहस्रं च अंशुमान् सुप्रभेदकम्। 22

विजयं चैव निश्वासं स्वायम्भुवमथानलम्॥

वीरं च रौरवं चैव मकुटं विमलं तथा। 23

चन्द्रज्ञानं च बिम्बं च प्रोत्कीत ललितं तथा॥

सिद्धं सन्तानशार्वोक्तं पारमेश्वरमेव च। 24

किरणं वातुलं त्वेता त्वष्टाविंशतिसंहिताः॥

एतेषां संकरं चैव न दोषाय प्रकल्पयेत्। 25

आचार्य। शिवमेवाहु शिवमाचार्य उच्यते॥

In Public domain. Digitization Muthulakshmi Research Academy

प-७

P. 25 अभेदं यो विजानाति ऽतत् भेदास्त मुच्यते । 26

सौभत्रो विषया ख्याता कौशलो मागधास्तथा ॥

माळवश्चैव पाञ्चाला कलिहे च पुळिन्दि च । 27

केरळाश्चार्यदेशश्च माळवश्च मरूणि च ॥

पञ्चराश्चैव केतुश्च सिंहळे दक्षिणासु च । 28

जोनका तुळुवाश्चैव कर्णटश्च देशताः ॥

विषयभेदस्समाख्यातं समाख्या कथयामि ते । 29

कुमारी हिमवन्मध्ये . . . . ॥

तस्मात्सर्व प्रयत्नेन स देश पुरुषोत्तमः । 30

सैंहळं बर्षरञ्चोन्यं वर्जयेल्लिङ्ग कर्मणि ॥

In Public domain. Digitization Muthulakshmi Research Academy

प.7

गृहस्थश्चोत्तमं विद्यादथवा ब्रह्मचारिणा। 31

आदिशैवकुले जातास्स तु वैदिकमुच्यते॥

शिखीवांच बद्धकेशी वा भस्मोद्धूलितविग्रहः॥ 32

दीक्षितस्य कुलो जातास्सर्वागम विशारदः॥

अप्रमत्तो भवेन्नित्यं देवातिगुरुपूजकः॥ 33

सर्वावयवसंपूर्णस्सर्वलक्षणसंयुतः॥

चा?
क्रियावान्निपुणस्सत्य शशुभायार समन्वितः॥ 34

क्रियादिज्ञानपर्यन्तन्तन्त्रज्ञोति विशेषतः॥

एवं लक्षणसंयुक्तं आचार्यास्समुदाहृताः। 35

सनाथी कृनवो - - - - बालो वृद्धस्तथैवच॥

In Public domain. Digitization Muthulakshmi Research Academy

पा॰ 1

निर्दयश्च निराहारो परापवादशीलवान्। 36

अतिदीर्घोऽतिह्रस्वश्च अतिधूयुस्स्थलकृशास्तथा॥

कपालं हा प्रतिश्चैव अन्येषां समयेव च। 37

नग्न प्रता तथा क्लीवा श्मश्रू ····· दिवर्जिता॥

- - - - - - - - - - लिंपौषाश्च मत्सरो गायनास्तिराः॥ 38

अनवद्याश्च विप्रेन्द्र न्त·· गणकाश्च तथैव च॥

- - - - - - - श्चैव विप्रेन्द्र काणश्चैव विवर्जयेत्॥ 39

व्यसनाः क्रूरकर्मणां पारदारी ····चोरिका॥

शिपिबिष्टा बहीकीर्णा द्विप ····· तथैव च। 40

कुष्ठीनाश्च्य क्षहीनाश्च बन्धिरा श्रुतिदुष्टका॥

In Public domain. Digitization Muthulakshmi Research Academy

प-৭ ण्भिस्तु लक्षणैर्युक्ता न कुरु स्थापनार्चनात्॥ 41

राजराष्ट्रं तु नश्यन्तु तस्मिन् देशे न वर्षति॥

तस्मात् सर्वप्रयत्नेन आचार्ये लक्षणान्विते। 42

आदिशैवेन कर्तव्यं प्रतिष्ठाद्यर्चनान्तकम्॥

कन्यया(ध्या?) विकारयेस्तु माभिचाराय चैव हि। 43

P.26 सगोत्रेण तु संबन्धं न कर्तव्यं कदाचन॥

तत्र यो जायमानस्तु तत्कुलं स्यान्नवर्तते। 44

ण्षां ऋषीणां विप्रेन्द्र जातानांच पुनःपुनः॥

शिवद्विजानां दीक्षाद्य न कुर्वीत कदाचन। 45

उपनयनकालान्ते मण्डले पूजयेच्छिवम्॥

In Public domain. Digitization Muthulakshmi Research Academy

प.ग

स्नपनं चाङ्कुरङ्क्षयर्थं कारयेत्तु शिवद्विजान् । 46
स्थिरलिङ्गं तु रुद्राणां स्पृश्यते व्यभिचारतः॥
अद्भुतं याति तद्देशं तदा देशक्षयो भवेत् । 47
आत्मार्थं पूजयेन्नित्यं सर्वेषां जातिरेवच॥
तस्मात् सर्वप्रयत्नेन देशिकेनैव कारयेत् । 48
आचार्यहस्त यो हम्यात् शिवलोकमवाप्नुयात्॥
*आचार्यवंश .... पदा हत्य षण्डकम् । 49
पतितं श्वान चण्डाल धूपदेशोत्तकं शिवम्॥
आरूढ पतित श्चैव सूतिकश्च विशेषतः। 50
ग्राम कुक्कुट मेवं तु संस्पृष्टा ग्निं तथैव च॥

* ऋषिरान्वयजातीना पात्रशेजादि सर्वश ।
शिवद्विजानि ... नां .. सर्वेन्न दोषाय प्रकल्पयेत्॥ 48A
ईश्वरार्थं ..... म्यादि सर्ववस्त द्विजोत्तमः।
आचार्यहस्ते ये दद्यात शिवलोके मवाप्नुयात्॥ 48B

In Public domain. Digitization Muthulakshmi Research Academy

प:7

भुञ्जानो यत्र दृष्टाश्चेत् विसृज्येवा भोजनम्। 51

स्नानं कृत्वा तु विप्रेन्द्र सप्रासादेन समन्वितम्॥

मानस्तोके स्तृभिर्जप्त्वा शुद्धं ··भवति ध्रुवम्। 52

त्र्यहं प्रातस्त्र्यहं सायं मद्यादय। ··र्चितम्॥

त्र्यहं परंतु यात प्राजापत्यं चरेन्नरः। 53

षोडशानां क्रियाणांच पूर्वमेवाच्चरेत्तथा॥

आचार्यल्लक्षणं प्रोक्तं दीक्षामण्डलं शृणु। 54

इति वीरतन्त्रे षट्सहस्रिकायां

आचार्यल्लक्षणस्सप्तमः पटलः।

==

In Public domain. Digitization Muthulakshmi Research Academy

[पटलः ४] ॥ दीक्षामण्डलविधिपटलः ॥

सर्वप्राणिहितार्थाय सर्वपापविमुक्तये।
मण्डलं कीदृशं देव तत् सर्वं ब्रूहि मे प्रभो॥ १
साधु साधु महाप्राज्ञ यत्त्वया परिचोदितम्।
तत्सर्वमखिलं वक्ष्ये शृणुष्व कमलासन॥ २
गङ्गाकूले समुद्रे वा नद्यां वापि तटाकके।
उद्याने चैव गोष्ठे वा महातटाक(कां तु तीरके)के॥ ३
P.27. देवालयसमीपे तु पुण्यनद्याश्च तीरके।
अथ शुद्धगृहे वापि कारयेन्मण्डपं ततः॥ ४
मण्डपं वापि कूटं वा कर्तव्यं तु प्रपा तथा।
श्रुतिहस्तं पञ्चहस्तं वा षड्ढस्तमधमत्रयम्॥ ५

In Public domain. Digitization Muthulakshmi Research Academy

पृ.8 सप्तहस्तावृहस्तं वा नवहस्तं तु मध्यमम्।
दशैकादशहस्तं तु द्वादशं चोत्तमं भवेत्॥ 6
एवमेव क्रमेणैव मात्राङ्गुलं तु कारयेत्।
षोडशस्तम्भसंयुक्तं पङ्क्तिमानमथोच्छ्रये॥ 7
जातीच जंपकं वापि खदिरस्तम्भमेव वा।
क्रमुकं वेणुदण्डं वा वकुली केतकी तथा॥ 8
याज्ञकेनैव वृक्षैर्वा नाहं विंशतिरङ्गुलम्।
नाळिकेरस्य पत्रेण विधेयमाच्छादनं ततः॥ 9
वस्त्रेण वेष्टयेद्गात्रं चतुस्तोरणभूषितम्।
दिव्यजैभ्य समायुक्तं वितानोपरि शोभितम्॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प.8

मुक्तादामैरलंकृत्य पुष्पदामैः प्रलम्बनम् ।

एवमेव क्रमेणैव पूर्वं भूमि परीक्ष्य जेत् ॥ ॥

ब्राह्मणस्य मही श्वेता रक्ता वै क्षत्रिया भवेत् ।

वैश्यस्य वसुधां पीता कृष्णां शूद्र इति स्मृता ॥ 12

मधुरा ब्राह्मणा भूमि कषाय क्षत्रियाय वै ।

वैश्यस्य षड्रसं ज्ञेया शूद्रस्तु कटुका स्मृता ॥ 13

आज्यगन्धं तु विप्रो च रक्तगन्धा नृपस्य तु ।

मूत्रगन्धा तु वैश्यस्य शूद्री पिष्ठानुगन्धिनी ॥ 14

वर्णगन्धरसाराञ्च तत्तज्जात्यर्हका भवेत् ।

हस्तमात्रं खनेद्भूमिं पूरयेत्तेन पांसुना ॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

प.४

मद्यमांसम् ?
अधिका चोत्तमं विद्यात् मक्ष्यमासम पांसुभिः।

हीना चाप्यधमं ज्ञेयं यमथञ्च विवर्जयेत॥ 16

? तस्मात् तस्मागन्तु षाशो हस्ती मूर्द्धरिते ततः।

पञ्चगव्येन संप्रोक्ष्य शिवमन्त्रेण देशिकः॥ 17

पञ्चरत्नं क्षिपेत्तत्र षण्णवत्येन मन्त्रतः।

पांसुभिश्छादयित्वा तु धिष्ण्यं सम्यक् प्रकल्पयेत्॥ 18

दर्पणोदरसंकाशं चतुरश्रं समन्ततः॥

पूर्वाग्रं सप्तसूत्रं स्यादुदगग्रं तथैव च॥ 19

कर्णसूत्रद्वयं कृत्वा तस्याग्रे मूलमुच्यते।

ईशो जयन्त आदित्यो सत्यकश्च भृशस्तथा॥ 20

In Public domain. Digitization Muthulakshmi Research Academy

प.४ अग्निश्च वितथश्चैव गृहक्षतयमस्तथा।

P.28. भृङ्गश्च पितृसुग्रीवो वरुणश्चासुरस्तथा॥ २१

रोगनाशश्च मुख्यश्च सोमश्चादितवेव च।

अर्धार्धद्विपदं भुङ्क्ते पूर्वेतु समरीयकः॥ २२

विवस्वान दक्षिणे चैव मित्रं चैव तु पश्चिमे॥

अर्धानर्ध द्विपदं भुङ्क्ते उत्तरे पृथिवीधरः॥ 23

अपापवत्स सावित्री इन्द्रजायस्तथैव च॥

रुद्रञ्जयश्च विप्रेन्द्रं ईशानेकपद स्थितः॥ 24

ब्रह्मश्चतुष्पदं भुङ्क्ते षट्त्रिंशं पदभागिना॥

चरकी चारकी चैव पूतना पापराक्षसी॥ 25

In Public domain. Digitization Muthulakshmi Research Academy

T. 30 प.8

चतुश्शूले न्यसेत्तत्र गन्धपुष्पादिनार्चयेत्।

पुरुषं पूर्वसंकल्प्य वमरीके शिरो भवेत्॥ 26

ब्रह्मकायदिति प्रोक्तं वामबाहु ... वत्सरे।

सावित्री द्वय विप्रेन्द्र दक्षीणां बहुरुच्यते॥ 27

रुद्रजायास्तथा चैव वामपादं प्रकीर्तिता।

इन्द्रजयस्तथैव स्याद्दक्षिणे पादमुच्यते॥ 28

मित्रश्चैव तु लिङ्गस्याद्‌थो मुखं तु कारयेत्।

गन्धैः पुष्पैश्च धूपैश्च वरुणश्चैव पूजितम्॥ 29

मण्डलं वर्धयेद्धीमान् पुण्याहं वाचयेत्ततः।

पूर्वे चतुष्पदे चैव अष्टा ... शन्तु भाजयेत्॥ 30

In Public domain. Digitization Muthulakshmi Research Academy

प-8

ऽाकांशं वर्त्तयेत्तत्र अन्त इक्ष्वयादि भावयेत् ।

ऽावमेव क्रमेणैव चतुर्दिक्षु च भ्रामयेत् ॥ 31

उक्ष्वयात् कर्णं परिगृह्य तदर्धेनैव भ्रामयेत् ॥

अभ्यन्तरकर्णपदे वर्त्तयेद्दलमेव च ॥ 32

ऽावमेव क्रमेणैव चत्वारे दन्तमुच्यते ।

बाह्यकर्णां पदे चाक्ष्वो वर्त्तयेत् वृक्षमेव च ॥ 33

अष्टाभिर्दलमेवं तु दलाग्रस्तत्र योजयेत् ।

प्रतिवारणरेखा च ऽाकाङ्गुलेन वर्त्तयेत् ॥ 34

अङ्गुलीत्रय बाह्ये तु शोभां चैव तु वर्त्तयेत् ।

अङ्गुलीनैव विप्रेन्द्र उपशोभां च वर्त्तयेत् ॥ 35

In Public domain. Digitization Muthulakshmi Research Academy

प.8

मध्यात् पूर्वदिगन्तं तु सीतयेत् केसरं ततः।

केशरं तु त्रिभागैकं कर्णिकाश्चैव वर्त्तयेत्॥ 36

एवमेव क्रमेणैव वर्त्तयेन्मण्डपं ततः।

मोक्षदं मण्डलं प्रोक्तं शान्तिकं च शृणुष्वथ॥ 37

पूर्वाग्रमुत्तराग्रञ्च स्तत्रित्रयं प्रसारयेत।

नैरृत्येशानकोणे वा वायव्याग्नेये चमेवच॥.38

P.29. सूत्रं प्रासारयेन्मन्त्रं मध्य शङ्कुं तथैवच।

खदिराश्शंखव: कार्या बिल्वचूतकदम्बके॥ 39

मधुकं देवदारुं वा याज्ञकं वृक्षमेव च।

अष्टाङ्गुल समुत्सेधं तदर्धं नाहमुच्यते॥ 40

In Public domain. Digitization Muthulakshmi Research Academy

प.४

कर्तव्याश्चतुरङ्गुलयं केसराश्च षडङ्गुलम्।

दलायामं च विप्रेन्द्र चतुर्दशाङ्गुलं भवेत्॥ 41

प्रतिवारणचाङ्गुलयं विधश्च त्रियाङ्गुलम्।

शोभावप्युपशोभाश्च वर्त्तयेदङ्गुलान्तरा॥ 42

एवमेव क्रमेणैव वर्त्तयेन्मण्डलं ततः।

मण्डलं संप्रवक्ष्यामि मुक्ताचूर्णेन संयुतम्॥ 43

शालिगोधूमपिष्टैश्च पद्मरागस्य चूर्णकैः।

गैरिकै बकचूर्णैश्च इन्द्रनीलस्य पूर्णकैः॥ 44

कृजांगारकचूर्णैश्च मरकतस्य च चूर्णकैः।

हरिद्राचूर्णसंयुक्त मण्डले विन्यसेत्ततः॥ 45

In Public domain. Digitization Muthulakshmi Research Academy

प.४

केसरस्य तु मूले तु शुक्लवर्णं प्रकीर्तितम्।

मध्यमे पीतवर्णं तु अग्रे श्वेतमिहोच्यते॥ 46

पूर्वायां तु दले चैव श्वेतवर्णमिति स्मृतम्।

आग्नेय्यां रक्तवर्णं च याम्ये कृष्णमिहोच्यते॥ 47

नैरृत्यां धूमवर्णं च वारुण्यां मौक्तिकं भवेत्।

वायव्यां श्यामवर्णं च सौमे तु रजनी भवेत्॥ 48

ऐशान्यां नीलमेवं तु दलं वर्णमिहोच्यते।

श्वेतवर्णेन विप्रेन्द्र विन्यसेत् प्रतिवारणे॥ 49

तदन्ते रजनी न्यस्या शालिपिष्टं तथैव च।

चतुर्द्वारसमायुक्तं लेखयेत्तु शिवद्विजः॥ 50

In Public domain. Digitization Muthulakshmi Research Academy

प.४

एकहस्तं द्विहस्तं वा चतुर्हस्तमथापि वा ।
अष्टौ वा द्वादशं हस्तं षोडशं विंशतिस्तु वा ॥ 51
हस्तौ त्रिंशतिर्वापि इत ऊर्ध्वं न कारयेत् ।
अष्टौ वा षोडशं वापि द्वात्रिंशं तु कमेव वा ॥ 52
अष्टोत्तरशतं वापि दल संख्या विधीयते ।
पटलः 30

।। सपिण्डीकरणविधिपटलः ।।

सपिण्डीकरणं वक्ष्ये द्वादशाहे तथैव च ।

चतुर्थे द्वादशे मासे सपिण्डीकरणं कुरु ।। 1

अग्निमुखं च संकल्प्य विश्वेदेवा समारभेत् ।

आयातु पितरा इति आवाह्य पितृपितामहान् ।। 2

यवपर्णीं वासमन्त्रेण दक्षिणाङ्गुष्ठ भीमृशेत् ।

पितॄणां रुद्रदेवानां स्वाहा नु जुहुयात्ततः ।। 3

चत्वारिंशञ्च शराबांश्च उदकेनैव पूरयेत् ।

शन्नो यवोसीति ··· आत्म ·· म ·· आहन्तुरेवच ।। 4

P. 58. तिला सन्त्रिसत्त्रश्चैव मधुवात मधुन्दुदेत् ।

वामस्यं त्विताक्ष्य --- तिरसनमुचेत्ततः ।। 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 30

स्वधाश्चैवाष्टदिक्षुश्च निरसनञ्च तथैव च।
गन्धैः पुष्पैस्तथा धूपै दीपैश्चैव समायुतम्॥ 6
पितृपितामहान् संविश्य तस्त तिलससंयुतम्।
अपहन्तेति मन्त्रेण विकिरेत्तत्र देशिकः॥ 7
ब्राह्मणं च समाहूय क्षणं कुर्वान्ति तत्र वै।
ये दिव्या आप इत्यर्घ्यं दद्यात्तु ··· तत्र वै॥ 8
हिरण्यकं सवासांश्च पञ्चब्रह्मेण तर्पयेत्।
यमे मातेति मन्त्रेण सप्ताज्याहुतिमेव च॥ 9
······
पितृणां भोजयेत्तत्र ततः पिण्डं समावहेत्॥
ओदनं तिलसंयुक्तं दधी च मधुसंयुतम्॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प- 30

पिण्डं कृत्वा तु विप्रेन्द्र प्रेतनामेन संयुतम्।

पृथिव्या द्येन मन्त्रेण दद्यात् पितृ पितामहान्॥ 11

समानीव क्रति मन्त्रेण प्रेत पितृ पात्रके।

उदकं विन्यसेत्तत्र मधुमानी च यान्तिभिः॥ 12

प्रेतं पितृणां पिण्डेषु नियतेत् सर्वमेव च।

प्रदक्षिण नमस्कारं कृत्वा चैव तु देशिक॥ 13

पितृभिश्च शिवे योज्य पावं हुत्वा विशेषतः।

आदिशैवान शैवांश्च - - - - - - सर्वशः॥ 14

देवोक्तेन च मन्त्रेण शैवाचारं समाचरेत्।

इति वीरतन्त्रे सपिण्डीकरण-

विधि त्रिंशत्पटलः॥

=

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 31

॥ अवान्तरशैवाचारम् ॥

अवान्तराणां शैवानां वक्ष्याम्याचारमुत्तमम् ।
हृदयेन तु मन्त्रेण महेश्चैव त्तवन्ततः ॥ 1
उदकोद्धे बलिं दद्यात् स्वस्वनामेन चैव हि ।
शोकाचेकान्तद्ध्वं दीपोत्सवं प्रकल्पयेत् ॥ 2
स्थालिके च शिवं पूज्य धारयेत् च्छिरसोपरि ।
द्विनेत्रं चतुर्भुजं चैव उपवीतसमन्वितम् ॥ 3
जटामकुटसंयुक्तं कृपापरशुधारिणम् ।
कुण्डलैः कर्णिकैर्हारैः कटिसूत्रोरबन्धनैः ॥ 4
यज्ञोपवीतसंयुक्तं दिव्याम्बरधरं शिवम् ।
पद्मासनस्थं विप्रेन्द्र ध्यात्वा वै देशिकस्तथा ॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प: 31

यच्चद्वयसि शैवानां यत्तु दीपं प्रयोजयेत्।

शङ्खभेर्यादि निर्घोष विधिर्य---ध्वनि शोभिते॥ 6

P. 59. ना··ना समायुक्तं शरल दीपैस्समायुतम्।

चित्रदीपसमायुक्तं दीपायान समन्वितम्॥ 7

ग्रामं नगरं वापि प्रदक्षिणमथाचरेत्।

निक्षिपेत्तत्र विप्रेन्द्र स्थितलिङ्ग समन्वितम्॥ 8

- - - - - - - - - नमस्कार शैवान् प्रकाशयेत्।

शैवान् समतो जनं योग्या दद्या च्छक्तिस्तु दक्षिणाम्॥ 9

इति अनान्तरशैवाचार विधि -

एकत्रिंशत् पटलः॥

=

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 32

॥ गृहाभिषेकम् ॥

गृहाभिषेकं वक्ष्येऽहं शृणुष्व कमलासन ।
शुचौ देशे समं कृत्वा गोमयेनानुलेपयेत् ॥ 1

शालिना स्थण्डिलं कृत्वा ततोपरि घटान् न्यसेत् ।
ससूत्रान् सापिधानांश्च सहिरण्यान् सवस्त्रकान् ॥ 2

कुम्भाद्दक्षिणपार्श्वे तु स्थापयेत्तु नवग्रहान् ।
आदित्य मध्यमे स्थाप्य शुक्रं पूर्वे तु विन्यसेत् ॥ 3

आग्नेय्याञ्चन्द्र दैवत्यमङ्गारकं तु दक्षिणे ।
- ॥ 4

- ।
मध्यादीशानपर्यन्तं स्थापयेत् कलशान्नवम् ॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 32

मध्यमे स्थापयेत्कुम्भं गन्धपुष्पादिनार्चयेत्।

केतुश्चैव तु वायव्यां मुत्तरे तु समन्वितम्॥ 6

ऐशान्यां बुधदेवंस्तु स्थापयेत्तु कुशैस्सह।

स्वस्वनामेन संयुक्तं हृदयेन समन्वितम्॥ 7

अर्चयेच्चैव विप्रेन्द्र हविन्निवेदयेत्ततः।

बिल्वपत्रं शिरीषं च दूर्वां चैव पलाशकम्॥ 8

विष्णुक्रान्ती शमीपत्रं पद्मपत्रं तथैव च।

बकुलार्कस्य पत्रञ्च अश्वत्थोदुम्बरन्तथा॥ 9

करवीरञ्च भृंकारं कुम्भे कुम्भे विनिक्षिपेत्।

गन्धपुष्पादिनाभ्यर्च्य पूर्वेद्युरधिवासयेत्॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प. 32

ततः प्रभाते विमले अभिषेकं तु कारयेत् ।

आपो हि ष्ठा मये चैव ताभ्य मन्त्रीय एव च ॥ 11

शुद्धपद्यादि मन्त्रेण अभिषेकं तु कारयेत् ।

एवमभ्यर्च्य विधिवत् गृ(ग्र?)ह पीडां व्यपोहतु ॥ 12

उपनयनादि कार्येण एवमेवाभिषेचयेत् ।

सर्वान् दोषान् विनश्यन्ति एवमेव समाचरेत् ॥ 13

आचार्यं पूजयेत्तत्र वस्त्रं धान्यादिकाञ्चनैः ।

इति गृ(ग्र?)हाभिषेक विधि-
द्वि(द्वा?)त्रिंशत्पटलः ॥

=

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 33

॥ मुद्रालक्षणपटलः ॥

P. 60. पितामहः —

मुद्रालक्षणं सर्वं कीदृशानीह कथ्यते।
तत्सर्वं समासेन भगवान् वक्तुमर्हसि ॥ 1

भगवान् —

पितामह महाप्राज्ञ यत्त्वया परिचोदितम्।
तत्सर्वमाखिलं वक्ष्ये शृणुष्व चतुरानन ॥ 2
सुरभिमुद्रां लिङ्गमुद्रां मुकुली शशाकर्णिकाः।
आवाहिनीच मुद्राच निद्दराज तथैवच ॥ 3
हृदे संवीर मुद्राच पञ्चब्रह्मस्य मुद्रिका।
षडङ्गस्यषू मुद्राच चेधनीनकलन्तथा ॥ 4

In Public domain. Digitization Muthulakshmi Research Academy

प. 33

पत्मञ्चूलञ्च परशुं खड्गं पाशं तथाङ्कुशम् ।

धनुर्बाणंच घण्टाच वज्रमुद्रां तथैव च ।। 5 5

उत्तरात्मकरौ कृत्वा तर्जन्याग्रे तु मध्यमे ।

कनिष्ठिकानामिका चैव अग्रमग्रेणसंयुतम् ।। 6 6

चत्वारस्तानमेवन्तु अमृतं स्रावयेत् सदा ।

सुरभिमुद्रा भवेदेषा सर्वारिष्टविनाशिना ।। 7 7

दक्षिणे तु करे चैव मध्यमाङ्गुलि संस्थितः ।

अनामिका बहुहि सर्वेष्व तर्जनी तत्र वेष्टयेत ।। 8 8

अङ्गुष्ठंच कनिष्ठाग्रे वेष्टयेत्तु विशेषतः ।

लिङ्गमुद्रा भवेदेषा सर्वकामार्थसाधिनी ।। 9 9

In Public domain. Digitization Muthulakshmi Research Academy

प. 33

द्वौ हस्तौ वेकतुदा कृत्वा मध्ये सुषिरमुच्यते।

सरोजोमुकुळाकारमुद्रेया मुकुळी भवेत्॥ 10

द्वयोरङ्गुष्ठाशिरसि तर्जन्यौ कुञ्चितौ तथा।

अङ्गुला मध्य - - - - - - - - - - - - - - - ॥ 11

- - - - दमादीनि शेषान् ऋज्वा स्थितानिति।

उभौ च मणिबन्धौं स्या मुद्रेयं शशीकर्णिका॥ 12

उभौ हस्तौ कनिष्ठौ च अङ्गुष्ठाग्रं तु मूलके।

विन्यसेच्चैव विप्रेन्द्र मुद्रावावाहिनी स्मृता॥ 13

द्वौ हस्तौ मुष्टिसंबन्धा ऽकैकेन तु ताडयेत्।

मुद्रेय निज्वीरा चैव सवशत्रु विमर्दिनी॥ 14

In Public domain. Digitization Muthulakshmi Research Academy

प. 33

प्रासार्य दक्षिणे हस्ते अङ्गुष्ठमूर्ध्वे संयुतम्।

सृष्टिमुद्रा भवेद्देवा सर्वेषां हितकारिणी॥ 15/15

प्रासार्य दक्षिणं हस्तं मङ्गुष्ठञ्चोर्ध्वसंस्थितम्।

मुष्टिं कृत्वा तु विप्रेन्द्र एषां सँहारमुच्यते॥ 16/16

द्वौ हस्तौ तु प्रासार्याथ अङ्गुष्ठमूर्ध्नि संस्थितम्।

सद्यमुद्रा भवेद्देवा वामदेवं तत् शृणु॥ 17/17

P. 61 उत्तानौ तु करौ कृत्वा अनामिकाद्यौ प्रसारयेत्।

वामदेवस्य मुद्रा तु अघोरञ्च तत् शृणु॥ 18/18

द्वौ हस्तौ मणिबन्धन्तु मध्यमौ द्वौ प्रसारयेत्।

अघोरस्य तु मुद्रेयं सर्वशत्रुविमर्दिनी॥ 19/19

In Public domain. Digitization Muthulakshmi Research Academy

प. ३३

द्वौ हस्तौ मणिबन्धन्तु तर्जनी द्वौ प्रसारयेत्।
तत्पुरुषस्य महामुद्रा सर्वकामार्थसाधनी ॥ २०
पूर्ववद्धस्तसँयुक्तौ प्रसार्याथ कनिष्ठिकौ।
ईशानस्य तु मुद्राच षडङ्गान् कथ्यते ततः॥ २१
द्वौ हस्तौ च प्रसार्याथ प्रोतं कृत्वा परस्परम्।
अङ्गुष्ठौ कुञ्चितौ कृत्वा मुद्रेयं हृदयस्य तु ॥ २२
उभौ हस्तौ हंसौ प्रासार्याथ नामिका चैव मध्यमा।
तर्जनी चैव विप्रेन्द्र स्थित्वां चैव करद्वयोः॥ २३
कनिष्ठिकस्य मूले तु अङ्गुष्ठाग्रन्निधापयेत्।
द्वौ हस्तौ च त्र्ययङ्गुल्यौ परस्परकृतौ तथा॥ २४

In Public domain. Digitization Muthulakshmi Research Academy

प. ३३

शिरोमुद्रा भवेदेषा सर्वकामार्थसाधिनी।

उत्तानौ तु करौ कृत्वा तर्जन्यङ्गुष्ठगोपितौ ॥ २५

शेषान् परस्परौ कृत्यौ शिखामुद्रामिति स्मृताः।

उत्तानौ तु करौ कृत्वा अङ्गुष्ठमध्य शोभितौ ॥ २६

शेषान् परस्परौ कृत्वा कवचोऽयं प्रकीर्तिताः।

उत्तानौ तु करौ कृत्वा मणिबन्धन्तु कारयेत् ॥ २७

तर्जनी मध्यमाश्चैव अधोमुखं तु कारयेत्।

अङ्गुष्ठौ द्वौ गोप्य नेत्रमूल प्रकीर्तिता ॥ २८

द्वौ हस्तौ च प्रसार्याथ कनिष्ठाङ्गुष्ठतान्विते।

अस्त्रमुद्रा भवेदेषा सर्वशत्रुविमर्दनी ॥ २९

In Public domain. Digitization Muthulakshmi Research Academy

प. 33

हस्त् तु मणिबन्धौ स्याद्धृतीये सँस्थितानि तु।
हस्तौ सन्तामयेत्तत्र मुद्रेयं शोधनी भवेत्॥ 30
उत्तानौ तु करौ कृत्वा मणिबन्धन्तु कारयेत्।
वामहस्तस्य चोर्ध्वे तु दक्षिणं विन्यसेत्ततः॥ 31
वामाङ्गुष्ठस्य मध्योर्ध्वे तु दक्षिणाङ्गुष्ठ विन्यसेत्।
मध्यमे शुषिरं कुर्यात् शेषाङ्गुल्यास्तु बन्धयेत्॥ 32
कलशामुद्रा भवेदेषा स्नानकाले प्रयोजयेत्।
उभौ करौ च विप्रेन्द्र मणिबन्धन्तु कारयेत्॥ 33
मुकुलीकृत हस्तौ द्वौ पद्ममुद्रा इति स्मृताः।
दक्षिणाञ्च प्रस्य णासार्या य कनिष्ठाङ्गुष्ठगोपितौ॥ 34

प. -

In Public domain. Digitization Muthulakshmi Research Academy

प. 33

शूलमुद्रा भवेदेषा सर्वशत्रुविमर्दना ।

P. 62 उत्तानौ तु करौ कृत्वा सर्वमूर्ध्वं तु कारयेत् ॥ 35

करपृष्ठद्वयं योज्य स समौ लिष्टौ परस्परौ ।

परशुमुद्रा भवेदेषा सर्वकामफलप्रदा ॥ 36

उत्तानौ तु करौ कृत्वा तर्जनी द्वौ च तिष्ठति ।

शेषा मुष्टिन्तु संबद्ध्वा खड्गमुद्रा भवन्ति वै ॥ 37

उत्तानौ तु करौ कृत्वा ऊर्ध्वहस्तन्तु कारयेत् ।

दक्षिणे च परं हस्तौ संप्रकीर्य विशेषतः ॥ 38

पाशमुद्रा भवेदेषा सर्वशत्रुविमर्दना ।

दक्षिणं हस्तमुक्तान्तु तर्जन्यां कुञ्चितौ तथा ॥ 39

In Public domain. Digitization Muthulakshmi Research Academy

प. ३३

उत्तानौ तु करौ कृत्वा तर्जन्यौ होव संस्थितौ।
शेषा मुष्टिञ्च संबद्ध्वा शरमुद्रा भवन्ति वै॥ 40
उत्तानौ तु करौ कृत्वा वामहस्तं विसारयेत्।
दक्षिणं हस्तमुत्तानं मुष्टिं कृत्वा तु मण्डलम्॥ 41
चञ्चलञ्च ततः कृत्वा घण्डा मुद्रा तथैव च।
उत्तानौ तु करौ कृत्वा कनिष्ठाङ्गुष्ठ पीडितौ॥ 42
उतौ परस्परं हस्तौ वज्रमुद्रा भवन्ति वै।
मुद्राणां लक्षणं प्रोक्तं नैवेद्यं च ततः शृणु। 43

इति वीरतन्त्रे बट्सहस्रसंहितायां
मुद्रालक्षणविधिस्त्रयस्त्रिंशत्पटलः॥

═

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 34

॥ नैवेद्यविधिपटलः॥

भगवन्देव देवेश लोकानाथ जगत्पते।
नैवेद्यस्य विधानं किं ब्रूहि मे परमेश्वरः॥ 1

साधु साधु महाप्राज्ञ यत्त्वया परिचोदितम्।
तत्सर्वमखिलं वक्ष्ये शृणुष्व कमलासनः॥ 2

यावतंस्तण्डुलास्तस्मिन्नैवेद्य परिसंख्यया।
तावद्युगसहस्राणि रुद्रलोके महीयते॥ 3

शुद्धोदनसहस्रेभ्यः पायसान्न विशिष्यते।
पायसान्नसहस्रेभ्यः कृसरान्नं विशिष्यते॥ 4

कृसरान्नसहस्रेभ्यो गौळान्नंच विशिष्यते।
गौळान्नस्य सहस्रेभ्यो मुद्गान्नंच विशिष्यते॥

In Public domain. Digitization Muthulakshmi Research Academy

प. 34

एवमेव क्रमेणैव सहस्रगुणितं फलम् ।
श्वेतशाली महाशाली रक्तशाली यवास्तथा ॥ 6
कृष्णशाली नीवारं वेणुगोधूममेव च ।
प्रियङ्गुश्चैव विप्रेन्द्र नवधा चोच्यते मया ॥ 7
तण्डुलार्धं ग्रहीतव्यमुत्तमञ्च विनिर्दिशेत् ।
P. 63 सर्वेषां चैव व्रीहीणां मल्यमञ्च विनिर्दिशेत् ॥ 8
अधमं पक्षिनामं च तस्मात् तान् परिवर्जयेत् ।
प्रांकणाश्चैव विप्रेन्द्र गोमयेनानुलेपयेत् ॥ 9
हृदये तु प्रोक्षयेत्सर्वं शालिं नेत्रेण विन्यसेत् ।
रवेश्चरश्मीसन्तप्तान् कर्तनं कुर्याच्ततः ॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प. 34.

उत्तम द्विजनारीभि क्षत्र विद् कन्यया त्ततः।
मध्यमं कर्तनं प्रोक्तं शूद्रीभिरधमं भवेत्॥ 11

उलूखलवोथ मृत्कुण्डे हृदयेनैव निक्षिपेत्।
उलूखलं ब्रह्मदैवत्यं मुसलं शिवमेव च॥ 12

शूर्पं वै विष्णुदैवत्य मित्येते अधिदेवता।
तुषान् व्यपोह्य शूर्पेण कणकम्बुज वर्जयेत्॥ 13

शतद्वयं पञ्चविंशति वृ(पृ?)हीभि शुक्तिरुच्यते।
तलञ्च प्रसृतिश्चैव कुडुबञ्च तथैव च॥ 14

अञ्जलिश्चैव विप्रेन्द्र प्रस्थश्चैव तथैव च।
पत्रसंख्या भवेत्तत्र आढकञ्च तथैव च॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

प. 34

शिवञ्च द्रोणकञ्चैव खारीञ्चैव तथैव च ।

ह्येकैकाद्विगुणं स्याच्च वर्धते क्रमशोऽधुना ॥ 16

प्रस्थं कुडुबसंयुक्तं पिशाचानां बलिर्भवेत् ।

चरुप्रस्थद्वयञ्चैव आढकं हविरुच्यते ॥ 17

नैवेद्यं नवधा चैव कल्पयेत् कल्पवित्तमः ।

प्रस्थद्वयत्रिसन्ध्या तु आढकञ्चैव तद्वच ॥ 18

शिवञ्चैव तु विज्ञेयं मध्यमत्रयमुच्यते ।

द्रोणञ्चैव तु खारी च भारञ्चैव त्रयो भवेत् ॥ 19

मध्यमत्रयमेवोक्तमुत्तमञ्च शृणुध्वथ ।

अष्टद्रोणसमायुक्तं भारद्वयसमायुतम् ॥ 20

In Public domain. Digitization Muthulakshmi Research Academy

प. 34

भारत्रयञ्च विप्रेन्द्र उत्तमत्रयमुच्यते ।

आढकादीन नैवेद्यं श्रीबलिञ्च न कारयेत् ॥ 21

न दोषात् तण्डुलान् गाह्य निर्वापनन्तु कारयेत् ।

नवभाण्डे विनिक्षिप्य क्षाळयेदस्त्रमन्त्रतः ॥ 22

त्रिभिर्वा क्षाळयित्वा तु जलमध्याधिकं भवेत् ।

भाण्डेन पन्यसेत्तत्र ईशानेन तु मन्त्रतः ॥ 23

अग्निं प्रज्वाल्य लयेत्तत्र अग्निबीजेन देशिक ।

शुद्धान्नं चैव निक्षिप्य सद्यमन्त्रेण देशिकम् ॥ 24

कृमिकोटरसंयुक्तं पिपीलिकादिवर्जितम् ।

विस्फुलिङ्गयुतैश्चापि काष्ठैरग्निन्न दीपयेत् ॥ 25

In Public domain. Digitization Muthulakshmi Research Academy

प. 34

P. 64. अतिपक्वमपक्वञ्च धूम्रगन्धञ्च शीतलम्।
वर्जयेच्चैव विप्रेन्द्र सुपक्वान्न निवेदयेत्॥ 26
बाह्यशुद्धिक्रमं कुर्यात् त्रिपुण्ड्रं कारयेद्द्विशि।
वामदेवेन मन्त्रेण उत्थापयेद्द्विशेबतः॥ 27
-- पदंशं प्रवक्ष्यामि शृणुष्व कमलासन।
कदुळी पनसञ्चैव त्रपुबोर्पंरु चैव हि॥ 28
बृहतीद्वयञ्च कूश्माण्डं बृहत् मुगञ्चलाँबुनी।
कोशातकी च चूतांश्च पत्य गन्धन्तथैव च॥ 29
शिशुक बृहत्कन्दं सूरणस्यात्तु कन्दकम्।
शंब कन्दं वल्लीकन्दं ----- कर्कद्वयमेव च॥ 30

In Public domain. Digitization Muthulakshmi Research Academy

प. 34.

राजमाषा सकी चैव मुद्गशिंबं कुलुस्थकम्।
कुक्कुटाण्डफलं चैव उपदंशामिहोच्यते ॥ 31
एते वक्षोपदंशा साः कारवल्ली तथैव च।
प्रस्थस्य त्रिफलं चैव यथाक्रमेण वर्धयेत् ॥ 32
एवमेव क्रमं कुर्यात् यथा लाभे च कारयेत्।
लवणेन समायुक्तं मरीचीनां समायुतम् ॥ 33
तण्डुलाश्चैव द्वित्रिंश उपदंशामिहोच्यते।
गुममममाषं षोडशांशं तु अष्टांशं दधिसंयुतम् ॥ 34
सूपं कृत्वा विशेषेण - - - - - विष्टसंयुतम्।
गुडं चैव समायुक्तं कदलीफलमेव च ॥ 35

In Public domain. Digitization Muthulakshmi Research Academy

प. 34.

पनसेन समायुक्तं सूपाद्याज्यं निवेदयेत् ।
हाटयामा समायुक्तमाज्येनैव सुपाजितम् ॥ 36

पूगीफलद्वयं चैव अष्टपत्रसमायुतम् ।
किञ्चित्पूर्णं समायुक्त द्विप्रस्थस्य विधीयते ॥ 37

मातुलुङ्गफलाद्यासु पक्वादीनि निवेदयेत् ।
एवमेव क्रमं कुर्या ... यत्नानुसारतः ॥ 38

एकस्थाने तु विप्रेन्द्र निकयावसकलन्ततः ।
हृदये प्रोक्षयेत्तत्र कुशेनैव तु वारिणः ॥ 39

गन्धैः पुष्पैश्च धूपैश्च दीपैश्चैव सुपूजयेत् ।
दुमडंगैः पूजयेच्चैव बहुभिर्दीपमुच्यते ॥ 40

In Public domain. Digitization Muthulakshmi Research Academy

प. 34

स्थालिकाञ्चैव सौवर्णी तु रजातीं कांस्यमेव वा ।

ताम्रेण वापि कर्तव्यं भस्मना शुद्धिमाचरेत् ॥ 41

अथवा कदलीपत्र यस्तोपरि न्यसेत्ततः ।

प्रोक्षयेदम्भसा चैव घृतेनैवाभिधारयेत् ॥ 4

वामदेवेन मन्त्रेण पात्रे चान्न क्षिपेत्ततः ।

P.65. व्यञ्जनेन समायुक्तं हृदयेन दिवेदयेत ॥ 43

चरूणां तु चतुर्भाग द्विभागं च निवेदयेत ।

बलेरग्नेश्च भागे त्यात प्रात्रशैबैकमुच्यते ॥ 44

हृदयेन तु मन्त्रेण दद्यात्पानीयमेव च ।

विसर्जयेत्तु निर्माल्यं शुद्धं कृत्वा तु भूतलम् ॥ 45

In Public domain. Digitization Muthulakshmi Research Academy

प. 34.

प्रोक्षयेदम्भसा चैव ताम्बूलं दापयेत्ततः।
एवं यः कुरुते मर्त्यः शिवलोकमवाप्नुयात्॥ 46
अग्निकार्यं ततः कुर्यात् शास्त्रदृष्टेन कर्मणा।
एवमेव क्रमेणैव शुद्धान्नं प्रोच्यते मया॥ 47
पायसान्न क्रमं वक्ष्ये मुद्गं वै तण्डुलार्धकम्।
द्विगुणक्षीरमित्युक्तं पचेयुः पायसान्नकम्॥ 48
गुडान्नं वक्ष्यते विप्र क्षीरं वै तण्डुलार्धकम्।
तण्डुलार्धं गुडं प्रोक्तमाज्यं चैव गुडार्धकम्॥ 49
गुडान्नमिति विज्ञेयं कृसरान्नं ततः शृणु।
तिलान्वै चूर्णितान् तत्र तण्डुलस्य चतुर्थकम्॥ 50

In Public domain. Digitization Muthulakshmi Research Academy

प. 34

तिलार्धं प्राक्षिपेदाज्यं कृसरान्नमिहोच्यते ।

तण्डुलस्य चतुर्थांशं मुद्गस्तत्रैव योजयेत् ॥ 51

नारिकेरफलैर्युक्तं मतगन्नं संप्रकीर्तितम् ।

मरीचि रजनीयुक्तं जीरकं सर्षपं तथा ॥ 52

आलोड्य पाचितं ह्येतत् कदली बृहतीद्वयम् ।

व्यञ्जनस्योत्तमं लेह्य तत् शुद्धान्नं च निवेदयेत् 53

त्रित्रिपादं च घटिका अयमत्रयशेषतः ।

सन्ध्याकालमिति प्रोक्तं मध्यमत्रयमुच्यते ॥ 54

काले यामसमायुक्तं श्रीबल्यं तु तु कारयेत् ।

दशनाडिकया युक्तमुत्तमत्रयमुच्यते ॥ 55

In Public domain. Digitization Muthulakshmi Research Academy

प.34

विसर्जयेत्तु निर्माल्यं चण्डेशाय निवेदयेत्।

॥ निर्माल्यम् ॥

निर्माल्यलङ्घनं दानं भक्षणं सममेव तु। 56
निर्माल्यलङ्घनाद्दानात्तत्क्षणान्नरकं व्रजेत्॥
तस्मात्सर्वप्रयत्नेन अभोज्यं सर्वथा जनैः। 57
भूमौ वा खानयेत्तत्र अग्निना दग्धमेव च॥
जलैः पशुगजैर्वापि नद्यां वै द्विजोत्तमः। 58
सकलानां निवेद्यान्तु शक्रादीनां तु भोजनम्॥
विनायकस्य नैवेद्यं विप्रादीनां तु भोजनम्। 59
उमादेव्याश्च नैवेद्यं सर्वेषां चैव भोजनम्॥

In Public domain. Digitization Muthulakshmi Research Academy

प. ३४

P.66 दिवाकरस्य नैवेद्यं सर्वेषां भोजनं भवेत्। 60
अभोज्यं सूर्यभक्तानां ज्येष्ठा चैव सरस्वती॥
श्रीदेवी भूमिदेवी च नैवेद्यं भोजनं भवेत्। 61
इतरेषां तु निर्माल्यं न भोज्यं सर्वदेहिनाम्॥
अन्यजातैन्न भोक्तव्यमेवमेव क्रमेण तु। 62
पूर्वद्वारे य दाक्षिण्ये पश्चिमद्वारमेव वा॥
उत्तरद्वारमेव स्यात् प्रासादाद्यं विशेषतः। 63
द्वारभेदेषु भेदानां पूजाभेदं न विद्यते॥
तद्द्वारप्रदेशे तु नैवेद्यं च निवेदयेत्। 64
अन्यथा कारयेद्यस्तु अभिचाराय चैव हि॥

In Public domain. Digitization Muthulakshmi Research Academy

प. 34

तस्मात् सर्वप्रयत्नेन नैवेद्यं चैव कारयेत्। 65

एवं यः कुरुते मर्त्यः सर्वपापाद्विमुच्यते॥

कुलैकविंशमुत्कार्य शिवलोकमवाप्नुयात्। 66

इति वीरतन्त्रे रुद्रसहस्रसंहितायां

नैवेद्यविधि चतुस्त्रिंशत्पटलः॥

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 35

॥ शौचाचमनम् स्नानम् ॥

शौचाचमनं कृत्वा स्नानकर्मञ्च कीदृशम् ।
प्रातस्सर्वां समासेन भगवान् वक्तुमर्हसि ॥ 1

ईश्वरः-

पितामह महाप्राज्ञ यत्त्वया परिचोदितम् ।
तत्सर्वमखिलं वक्ष्ये शृणुष्व कमलासन ॥ 2

उत्थाय तददा प्रातः मौनव्रत समन्वितम् ।
ग्रामान् प्राचीमुदीचीं वा गत्वाचार्यो विशेषतः ॥ 3

उत्तराभिमुखो वापि दक्षिणाभिमुखं तु वा ।
नवताभिमुखस्थं तु मलंञ्चैव विसर्जयेत ॥ 4

In Public domain. Digitization Muthulakshmi Research Academy

प. 35

विसर्जयेन्नधृवृण्मूत्रं किटकन्नेकिनं भुवम।

ऊषरञ्चैव विप्रेन्द्र शिवक्षेत्रसमीपतः॥ 5

रविदक्षिणतः कृत्वा दिवा विण्मूत्रवर्जनम।

शिरोवकुण्ठकं कृत्वा मौनेन तु विसर्जयेत॥ 6

दक्षिणे तं तु हस्तेन मृदं संग्राहयेत्ततः।

वामे शिश्नं गृहीत्वा तु कर्णे यज्ञोपवीतकम॥ 7

नद्यां वापि तटाके वा पुष्करे वा हृदेऽपिवा।

शुद्धस्थाने जलं प्राप्य आचम्य तु यथाविधि॥ 8

गुदेञ्च दशाया दश्या जटञ्चैव विशेषतः।

पञ्चाभि क्षालयेद्वामं करयोस्सप्तमृत्तिका॥ 9

In Public domain. Digitization Muthulakshmi Research Academy

प.35

मेढ्रे चैकमृद्दद्यात् करं पञ्चैव क्षालयेत्।

P.67. आमलीफलमात्रेण पादौ प्रक्षालयेत्ततः॥ 10

त्रिप्राश्यो द्विमृज्य आचम्य च विधानतः।

मृत्पिण्डं च त्रिधा कृत्वा हृदयेन तु मन्त्रतः॥ 11

तत्पुरुषेण मन्त्रेण पूर्वं पिण्डं त्रिधा भवेत्।

दक्षिणे घोरमन्त्रेण उत्तरे वाममन्त्रतः॥ 12

पूर्वेणैव मृता दद्यादस्त्रेण दश दिक्षु वै।

दक्षिणेन मृदा चैव शिवतीर्थं तु कल्पयेत्॥ 13

जलमध्ये स्थितं चैव पञ्चब्रह्मेण देशिकः।

तैलञ्चामलकायुक्तमङ्गमालिप्य सर्वशः॥ 14

In Public domain. Digitization Muthulakshmi Research Academy

प.३५

गोमयेन पुनश्चैव उपलिप्य च स्थापयेत् ।

मार्जयेच्छिरमीशानं पुरुषेण मुखं ततः ॥ 15

हृदयञ्चैव घोरेण वामेन गुह्यमेव च ।

पादयोस्सद्यमन्त्रेण मार्जयेद्देशिकोत्तमः ॥ 16

व्योमव्यापिञ्जपेत्तत्र मार्जयित्वा तु मन्त्रवित् ।

कलमुद्रां तु बद्ध्वा तु प्रासादेनाभिषिञ्चयेत् ॥ 17

गोमयेन च मृदा चैव सर्वाङ्गं लेपयेन्मृदा ।

नाभिमन्त्रोदके स्थित्वा आचम्य च विधानतः ॥ 18

त्रिप्राश्यापो द्विरुन्मृज्य ऊर्ध्वाधोरेकमेव च ।

अङ्गुष्ठानामिकाभ्याञ्च चक्षुषी च मुखे स्पृशेत् ॥ 19

In Public domain. Digitization Muthulakshmi Research Academy

प.35

घ्राणद्वयं च श्रोत्रं च मध्यमाङ्गुलिना स्पृशेत्।
अङ्गुष्ठ तर्जनीभ्यां तु बाहुश्चैव स्पृशेत्ततः॥ 20
सर्वाभिरङ्गुलीभिश्च मूर्धानं चैव संस्पृशेत्।
दक्षिणेन तु हस्तेन उदकं ग्राहयेत्ततः॥ 21
वामदेवेन संयुक्तं सूर्यश्चेति जलं बिबेत्।
ईशानेनाग्निश्चेति सायाह्नेति जलं बिबेत्॥ 22
आचम्य च विधानेन ईशानेन समायुतम्।
सावित्रीं च भवेत्तत्र सूर्योदकन्ददेत्॥ 23
देवान् वै तर्पयेत्तत्र वामदेवेन मन्त्रतः।
ऋषीणां दु पर्येत्तत्र अघोरेण तु मन्त्रतः॥ 24

In Public domain. Digitization Muthulakshmi Research Academy

प. 35

पितॄणां तर्पयेत्तत्र सद्यमन्त्रेण देशिकः।
प्रासादेन समायुक्तं सावित्रीं च शताष्टकम्॥ 25
मित्रासत्येनेमम्मेति हृदयेन समायुतम्।
जपेद्वै देशिकस्तत्र धौम्नवस्त्रञ्च वेष्टयेत्॥ 26
आचमेत् पूर्ववत्तत्र सोष्णीषस्सोत्तरीयकः।
तीरे समतलं कृत्वा हस्तमात्रेण लेपयेत्॥ 27
P.68 सूर्यमावाहनेत्तत्र षडक्षरेण मन्त्रतः।
पाद्यमाचमनं चैव अर्घ्यं तस्य निवेदयेत्॥ 28
दैविकेन तु तीर्थेन देवानां तर्पयेत्ततः।
आर्षेण तु तीर्थेन ऋषीणां चैव तर्पयेत्॥ 29

In Public domain. Digitization Muthulakshmi Research Academy

प. 35

पितॄणां चैव पूर्वेषां पैतृकेण तु तर्पयेत्।
विमानं दर्शयेत्तत्र पुष्पहस्तो विचक्षणः॥ 30
प्रदक्षिणत्रयं कृत्वा प्रविशेत्तु कपाटकम्।
प्रणम्य दण्डवद्भूमौ अर्चयेत्तु कपाटकम्॥ 31
गन्धैः पुष्पैश्च धूपैश्च दीपैश्चैव हृदा ततः।
पूजयेद्विधिना विप्र कपाटस्थं तु देवतान्॥ 32
भुजङ्गश्च पतङ्गश्च कपाटस्याधिदेवतान्।
ततो गर्भगृहं कृत्वा शिवं प्रणम्य एव च॥ 33
एवं यः कुरुते मर्त्य नित्यं सर्वपापैः प्रमुच्यते।
स्नाने देवार्चने चैव समाधौ च जपे तथा॥ 34

In Public domain. Digitization Muthulakshmi Research Academy

प. 35

भोजने देवकार्ये च मौनं षट्सु विधीयते ।

छर्दिते व्युद्गिते सूर्ये श्मश्रुकर्मणि मैथुने ॥ 35

दुःस्वप्ने दुर्जस्पर्शे स्नानं षट्सु विधीयते ।

स्नानं पञ्चविधा ज्ञेया वारुणं स्नानमेव च ॥ 36

आग्नेयं दिव्यमेवं तु वायव्यं मानसं स्मृता ।

वारुणं स्नानकार्यं च वारुणस्नानमोच्यते ॥ 37

आग्नेयं भस्मना स्नानं सापथा वर्त्तयेत्ततः ।

दिव्यस्नान वाय - - - - - वहन्तु रजोभवाम् ॥ 38

मान्त्रे मानसमित्युक्तं पञ्च स्नानं विधीयते ।

एवमेव प्रकारेण कुर्याद्वै देशिकोत्तमः ॥ 39

स्नानमेव मया प्रोक्तं सर्वकामार्थसाधनम् ।

इति वीरतन्त्रे षट्सहस्रसंहितायां

शौचाचमनस्नान पञ्चत्रिंशत्पटलः

=

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 36

॥ भस्मस्नानम् ॥

भस्मस्नानं कथं देव तत् स्नानं कीदृशो भवेत्।
एतत्सर्वं समासेन ब्रूहि मे परमेश्वर ॥ 1

ईश्वरः —

भस्मस्नानं प्रवक्ष्यामि शृणुष्व कमलासन।
भासत्वान्मनुष्याणां भासत्वभस्य ... चि ॥ 2
भस्मनात् सर्वपापानां भस्मेति परिकीर्तितम्।
कुमारग्रहांच भूतांश्च आयुरायातुधानकाः ॥ 3
पिशाचैश्च कादीश साकिन्यां विविधास्तथा।
P.69 सर्वरोगसमुत्पन्ना ०याघ्रसर्पभयेषु च ॥ 4

In Public domain. Digitization Muthulakshmi Research Academy

प. 36

अन्यैर्दुष्टमृगैर्दुष्टैर्भस्मस्नानेन नश्यति।

आग्नेयं प्रथमं चैव द्वितीयं मारुतं भवेत्॥ 5

तृतीयं शैलमित्युक्तं चतुर्थं भोगदं भवेत्।

पञ्चमं श्रीकरं प्रोक्तं तेषामेवं शृणुष्वथ॥ 6

नन्दा भद्रा च सुरभि सुशीला सुमनन्तथा।

गवां वर्गेषु संजातं गोमयं चैव संग्रहेत्॥ 7

उत्तमं श्वेतवर्णं तु मध्यमं रक्तमुच्यते।

अधमं कृष्णवर्णं तु अन्यद्वर्णं तु वर्जयेत्॥ 8

विकटाङ्गञ्च विप्रेन्द्र अङ्गहीनञ्च वर्जयेत्।

पतितं गोमयं ग्राह्य हृदयेन तु मन्त्रतः॥ 9

In Public domain. Digitization Muthulakshmi Research Academy

प. 36

कपिलागोमयंश्चैव उत्तमोत्तममुच्यते।
गोमयं वायुसंबन्धं शान्तकं ब्रह्ममन्त्रकैः॥ 10
आकाशो ग्राहयेद्दर्भैः दर्भे तत् पौष्टिकं भवेत्।
भूतले पतिता येत्तु प्रासादेन तु गोमयम्॥ 11
पौर्णमास्यां माघमास्यां षष्ठ्यां शुक्लकृष्णयोः।
शिवाग्निना दहित्वा तु तुषैर्वापि तुषैस्तुवा॥ 12
पिण्डं कृत्वा तु हृदयं शिवमन्त्रेण देशिकः।
शुष्कं वै शिरसा चैव दग्धं वै शिखया तथा॥ 13
सद्योजातेन मन्त्रेण ग्राहये ... विशेषतः।
सौवर्णमुत्तमं पात्रं मध्यमं रजतं भवेत्॥ 14

In Public domain. Digitization Muthulakshmi Research Academy

प. 36

अधमं ताम्रपात्रं स्यादलाभे मृण्मयं भवेत्।
अलाबुपात्रे संग्राह्य वामदेवेन मन्त्रतः॥ 15
एतदाग्नेयमित्युक्तम्मान्त्रतञ्च शृणुष्वथ।
अङ्गैर्लातेनवोत्भूतदग्निना च दहेत्ततः॥ 16
मारुदाख्यमिति प्रोक्तं शैवलक्षणमुच्यते।
शिवाग्निकुण्डे विप्रेन्द्र संजातं भस्ममेवच॥ 17
भोगदुञ्च प्रवक्ष्यामि कुलालानान्दहेच्यतः।
? एवञ्च तु येनोक्तं श्रीकरञ्च शृणुष्वथ॥ 18
चत्वारि भेदसंयुक्तं भस्मना विशेषतः।
एवमेव प्रकारेण भस्मना लेपयेत्ततः॥ 19

In Public domain. Digitization Muthulakshmi Research Academy

प. 36

व्योमव्यापिसमायुक्तं ब्रह्माङ्गेन समायुतम्।
ईशानेन तु मन्त्रेण शिरमुद्धूळयेत्ततः॥ 20
मुखं तत्पुरुषेणैव स्थितौ चैव कटीतथा।
पार्श्वयोरुभयोश्चैव पादयोरुभयोरपि॥ 21
P.70. सद्योजातेन मन्त्रेण उद्धूळये द्विशेषतः।
उद्धूळयेत्तु सर्वाङ्गं ब्राह्मणानां विशेषतः॥ 22
त्रिपुण्ड्र कारयेत्तत्र नृपाणां वैश्यमेव च।
शूद्राणां चैव सर्वेषा मेवमेव क्रमेण तु॥ 23
मध्यहात् प्रकृजलै र्युक्तं तोयन्तदु नवर्जयेत्।
स्थानभेदं प्रवक्ष्यामि मूर्ध्नी ललाटमेवच॥ 24

In Public domain. Digitization Muthulakshmi Research Academy

प. 36

कर्णौ च चक्षुषी चैव नासिके चास्य एव च।
ग्रीवे स्कन्धौ च बाहुभ्यां कोर्परौ च तथा मणौ॥ 25
हृदि नाभौ च मेढ्रौ च पायु रू कृच जानुनी।
जङ्घयोस्फोत्व पादौ च तथा पृष्ठौ च एव च॥ 26
द्वात्रिंशत्स्थानमेवोक्तं भस्मना लेपयेत्ततः।
ललाटग्रीवसन्धौ च बाहुकोर्परयोरपि॥ 27
हृदये जठरे चैव रभे . . . .।
- - - - - - - - - - - - - - ॥ 28
पार्श्वयोश्चैव विप्रेन्द्र षोडशस्थानमुच्यते।
मूर्ध्नीश्चैव ललाटश्च कर्णे बाहु तथैव च॥ 29

In Public domain. Digitization Muthulakshmi Research Academy

प. 36.

हृदये चैव नाभौ च पृष्ठे चैव विशेषतः।

अष्टस्थानेषु विप्रेन्द्र विन्यसेत् भस्ममेव च ॥ 30

ब्रह्मा स्कन्दश्च विघ्नश्च विष्णु चैव शिवस्तथा।

वसुन्धरा च पितरौ अधिदेवाः प्रकीर्तिताः॥ 31

षडङ्गुलश्च चत्वारौ त्र्यङ्गुलं वाथ चाङ्गुलम्।

ब्राह्मणादीनि वर्णानां विस्तारसिविविस्तरं भवेत्॥ 32

क्षणान्तथैव मार्गेण भस्मना लेपयेत्ततः।

ज्ञानासू चन्दनं लिप्य वैश्यार्थं पूर्णमेव च॥ 33

जायार्थं चैव विप्रेन्द्र लेपयेद्रक्त चन्दनैः।

देशिकानां तु सर्वेषां नामिका मध्य तर्जनी॥ 34

In Public domain. Digitization Muthulakshmi Research Academy

प. 36.

भस्मना लेपयेत्तत्र सर्वपापात् प्रमुच्यते।

दुःस्वप्ने दुर्जनस्पर्शे आतुराणां तु सर्वशः॥ 35

भस्मस्नानेन शुद्ध्यन्ती रक्षार्थमिहमोच्यते।

भोजने तुषकेशाश्च चितारिनख्यान्यपि॥ 36

मन्त्रणम्मर्थकाश्च परीस्त्रवणी सर्वशः।

दधिक्षीरघृते तैलमिश्रिते तु विशेषतः॥ 37

भस्मस्नाना शुद्धिमाप्नोति सिंहस्यैव यथागजः॥

पूर्वाह्णे भोजने काले गमनेऽपि तथैव च॥ 38

- - - - - - . . . . . . सर्वरत्ना विधीयते।

P.71. ऽावमेव क्रमेणैव भस्मन्दद्यात्तु भक्तितः॥ 39

सर्वपापविनिर्मुक्तः शिवलोकमवाप्नुयात्।

भस्मस्नानं मया प्रोक्तं मन्त्रन्यासं शृणुष्वथ॥ 40

इति वीरतन्त्रे षट्सहस्रसंहितायां

भस्मस्नान षट्त्रिंशत्पटलः॥

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 37

॥ मन्त्रन्यासपटलः ॥

प्रणम्य शिरसामेवं परिपृच्छन् पितामह ।

मन्त्रन्यास कथन्देव तत्सर्वं ब्रूहि मे प्रभो ॥ 1

यत्सर्वं तु त्वया पृष्ठ मर्त्यानां तु विहीय च ।

तव स्नेहादहं वक्ष्ये श्रूयतां कमलासन ॥ 2

शिवाग्रे मण्डपं कुर्यात् मण्डपात् दक्षिणे ततः ।

मण्डपं चैव विप्रेन्द्र गोमयेनानुलेपयेत् ॥ 3

गन्धपुष्पञ्च धूपञ्च दीपञ्चैव समायुतम् ।

कूर्चैश्चैव तु निक्षिप्यं पूर्वनां विधिपूर्वकम् ॥ 4

उत्तराभिमुखो भूत्वा तत्रान्ते कूर्चमध्यमे ।

सद्येन प्रोक्षयेत्तत्र कुशकूर्चेन वामतः ॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 37

गन्धपुष्पादिना विप्र स्वदेवीं पूजयेत्ततः।
धृता शिखाग्रे द्वादशांशलये शिवतत्त्वं विचिन्तयेत् ॥ 6
स्वात्मनं योजयेत्तत्र तनुत्रैव दहेत्ततः।
त्रिकोणमण्डले विद्याद्यद्वीयं विचिन्तयेत् ॥ 7
पादाङ्गुष्ठात् समारभ्य दहे ध्यायच्छिरोन्तकम्।
भस्मन्तु त शिशवं ध्यात्वा अमृतप्लावनं कुरु ॥ 8
शिखाद्धंहस्तप्रमाणेन ऊर्ध्वेचैव विचिन्तयेत्।
श्वेतपद्मोपरीशान्तु चन्द्रबिम्बमधोमुखम् ॥ 9
तुर्यममृत ध्यायेत् दोंकारेण समन्वितम्।
चिन्तयेदमृतन्तोयं सुषुम्ना भिन्नमस्तकम् ॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प. 37

तेन प्लावितमात्मानं पूरयन्तं विचिन्तयेत्।
मृत्युनाशनमेवं तु इति शास्त्रस्य निश्चयम्॥ 11
पश्चात् स्वदेहं संचिन्त्यं गन्धपुष्पादिनार्चयेत्।
रेचकं पूरकं चैव कुम्भकंच त्रिधा मतम्॥ 12
न मुञ्चन्ति न गृह्णाति वायुरन्तर्बहि स्थितम्।
आपूर्णकुम्भवस्तिष्ठेदुचलस्य तु कुम्भकम्॥ 13
एवमेव प्रकारेण कारयेद्देशिकोत्तमः।
हस्ताभ्यां संस्पृशेत् पूर्वं कान्तिपादान्तमेव च॥ 14
अङ्गुष्ठतर्जनीभ्यां तु अस्त्रे मन्त्रेण संयुतम्।
P. 72. दिवि दिक्षु च दातव्य दूर्वायाश्चैव विन्यसेत्॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

प. 37

आजानु पृथिवी ज्ञेया अंस्तु द्विनोभि देशातः।

गकाग्रे तेज संशुद्धि ललाटात् वायु (वा?) शुद्ध्यति।। 16

तदूर्ध्वे द्वादशाङ्गुल्ये गगनशुद्धिरुदाहृतम्।

प्रथमं सृष्टिन्यासं तु स्थितिन्यासं द्वितीयकम्।। 17

संहारं तु तृतीयं स्यात् त्रिविधं चोच्यते मया।

गृहस्तु सृष्टिमार्गेण ब्रह्मचारी स्थितिर्भवेत्।। 18

वानप्रस्थयतीनाञ्च संहारन्यासमुच्यते।

अङ्गुष्ठादिकानिष्ठान्तं सृष्टिन्यासमुदाहृतम्।। 19

ईशानादि पञ्च मन्त्राणि अङ्गुष्ठादीनि विन्यसेत्।

ईशानमूर्ध्नि विन्यस्य मुखं तत्पुरुषे न्यसेत्।। 20

In Public domain. Digitization Muthulakshmi Research Academy

प.37

अघोरं हृदये न्यस्य गुह्ये वामं पालयेत्।

सद्योजाते न्यसेत् पादौ पुनरङ्गानि विन्यसेत्॥ 21

हृदये हृदयं न्यस्य शिरश्शिरसि विन्यसेत्।

शिखां शिखायां विन्यस्य कवचं स्तनमध्यमम्॥ 22

अस्त्रं अस्त्रप्रदेशे तु नेत्रं नेत्रेषु विन्यसेत्।

विन्यसेत्तु षडङ्गानि देवतान्यासकं श‍ृणु॥ 23

ब्रह्माण्यं मूर्ध्नि विन्यस्य ललाटे विष्णुरुच्यते।

चन्द्रसूर्यौ नयनौ नासिक्यां पृथिवीं तथा॥ 24

सरस्वतीन्तु वक्त्रे हृदये ईश्वरस्तथा।

हस्तौ वै चेन्द्रदैवत्यां वायुस्स्यात् कुक्षिरेव च॥ 25

In Public domain. Digitization Muthulakshmi Research Academy

प. 37

सुब्रह्मण्यस्य लिङ्गे च पार्श्वयोरश्विनौ तथा ।
पादयोर्मरुतश्चैव ह्येवमेव क्रमो न्यसेत् ॥ 26

अकारं मूर्ध्नि विन्यस्य आकारं तु ललाटके ।
इकारं दक्षिणे नेत्रे ईकारं वामलोचने ॥ 27

उकारं दक्षिणे नासे ऊकारं वामनासिके ।
ऋकारं दक्षिणे श्रोत्रे ॠकारं वामकर्णके ॥ 28

ऌकारं दक्षिणे गण्डे ॡकारं वामगण्डके ।
ए ऐ तालुरन्ध्रे च ओ औ ओष्ठद्वयेऽपि च ॥ 29

दन्तपङ्क्तिद्वये न्यस्य अं अः परिकीर्तितौ ॥
कवर्गं दक्षिणे पाणौ चवर्गं वामपाणिके ॥ 30

In Public domain. Digitization Muthulakshmi Research Academy

प.37

टवर्गं दक्षिणे पादे तवर्गं वामपादके।
पफौ दक्षिणपार्श्वौ तु वामपार्श्वे बभौ न्यसेत्॥ 31
मकारं हृदये न्यस्य यकारं तु रुचि विन्यसेत्।
रेफं रक्तमेवोक्तं लकारं मांसमेव च॥ 32
P.73. वकारं मेददेशे तु शकारन्त्वास्थिदेशके।
मज्जादेशे षकारं तु सकारं शुक्लमेव च॥ 33
हकार प्राण इत्याहु क्षकारम्मेद्रमेव च।
ळकारं वृषणञ्चैव सर्वानेतानि क्रमं न्यसेत्॥ 34
सृष्टिन्यासमिति प्रोक्त न्यासं स्थितिमथ शृणु।
मध्यादि दण्डपञ्चब्रह्म न्यसेत क्रमात्॥ 35

In Public domain. Digitization Muthulakshmi Research Academy

प.37

ईशानम्मध्यमे चैव अ ··· केन पुरुषन्यसेत्।
कनिष्ठिकाञ्च अघोरस्याद्वामाङ्गुष्ठेनके न्यसेत्॥ 36
सद्योजातं तु तर्जन्यां विन्यसेत् पृष्ठमेव च।
हृदयम्मध्यमे न्यस्य शिरोमन्त्रं तु नामिके॥ 37
शिखा कनिष्ठिके न्यस्य कवचमङ्गुष्ठके न्यसेत्।
नेत्रन्तु तर्जनी न्यस्य अस्त्रं करतले न्यसेत्॥ 38
एवं षडङ्ग विन्यस्य विद्येशा नि सेत् ततः। (न्विन्य)
अनन्तं मूर्ध्नि विन्यस्य ललाटे सूक्ष्ममुच्यते॥ 39
शिवोत्तम मुखे न्यस्य एकनेत्रन्तु कर्णयोः।
एकरुद्रं तु बाहौ तु त्रिमूर्तिं हृदये न्यसेत्॥ 40

In Public domain. Digitization Muthulakshmi Research Academy

प. 37

लिङ्गे श्रीकण्ठमित्युक्तं शिखण्डिः पादयोर्न्यसेत्।
हृदये हृदयं न्यस्य शिरश्शिरसि विन्यसेत्॥ 41
शिखायान्तु शिखे न्यस्य कवचं स्तनमध्यतः।
अस्त्रं हस्तप्रदेशे तु नेत्रं नेत्रे तु विन्यसेत्॥ 42
हस्तौ तु मणिबन्धौ तु ईशब्रह्माणमेव च।
स्थितिन्यासमिति प्रोक्तं संहारञ्च तत् शृणु॥ 43
सद्योजातं कनिष्ठे तु वामदेवेन नामिका।
अघोरं मध्यमे न्यस्य पुरुषं तर्जनी न्यसेत्॥ 44
ईशमङ्गुष्ठके न्यस्य षडङ्गं विन्यसेत्ततः।
हृदये न्निष्ठिके न्यस्य शिरोमन्त्रञ्च नामिके॥ 45

In Public domain. Digitization Muthulakshmi Research Academy

प. 37

शिखामन्त्रं तु मध्यं स्यात् कवचं तर्जनीन्यसेत्।
नेत्रमङ्गुष्ठके न्यस्य अस्त्रं करतले न्यसेत्॥ 46
पादयोस्सद्यामन्त्रे तु कुक्षौ वाम न्यसेत्ततः।
अघोरहृदये न्यस्य मुखे तत्पुरुषे न्यसेत्॥ 47
ईशानं मूर्ध्नि विन्यस्य पादयो हृदये न्यसेत्।
मेढ्रे तु शिरोमन्त्रं तु कुक्षौ शिखान्तु विन्यसेत्॥ 48
कवचं हृदये न्यस्य नेत्रं बाहुद्वयो न्यसेत्।
मुखे चास्त्रमिति प्रोक्तं शिवमन्त्रं तु सर्वशः॥ 49
इन्द्रन्तु पादयो न्यस्य मेढ्रे तु पावके न्यसेत्।
P.74 यमं कुक्षौ तु विन्यस्य निर्ऋतिं हृदये न्यसेत्॥ 50
बाह्वौ वरुण देवन्तु त्यं कर्णे वायुरि-- स्मृतम्।
मुखे तु सोमदैवत्यं ईशानं शिरसि विन्यसेत्॥ 51

In Public domain. Digitization Muthulakshmi Research Academy

प.37

एवमेव क्रमं ज्ञात्वा विन्यसेद्देशिकस्तथा।
आचार्यस्सात्वतिश्चैव त्वात् गृहस्थो वा द्विजोत्तमः। 52
सृष्टौ स्थितिश्च संहारन्यासं कुर्याद्विचक्षणः॥
एवं न्यस्त्वा विधानेन देशिकं पापहा भवेत्॥ 53
गन्धैः पुष्पैश्च पाद्यै स्वदेहं पूजयेद्बुधः॥
द्वारपालान् समभ्यर्च्य गन्धपुष्पादिभिस्सह॥ 54
पूर्वे तु द्वारपालौ तु नन्दीकालौ तथैव च॥
दक्षिणद्वारपालौ तु दण्डिमुण्डिस्तथैव च॥ 55
पश्चिमद्वारपालौ तु भृगीटी विजयस्तथा।
उत्तरद्वारपालौ तु नन्दं पाशुपतीस्तथा॥ 56

In Public domain. Digitization Muthulakshmi Research Academy

प. 37

नन्दिन्तु दक्षिणे स्थाप्य श्यामवर्णसमन्वितम्।
दण्डहस्तसमायुक्तं हुँकारँ मन्त्रमुच्यते॥ 57
कालं कुङ्कुमवर्णाभमुत्तरे तु प्रतिष्ठितम्।
वटवृक्षायुधोर्युक्तं मन्त्रौं हूँकारमेवच॥ 58
दण्डिं पूर्वे तु विन्यस्य इन्द्रकोपस्य सन्निभम्।
खड्गायुधसमायुक्तं ह्रौंकारँ मन्त्रमुच्यते॥ 59
मण्डी तु पश्चिमे न्यस्य शुद्धस्फटिकसन्निभम्।
भिण्डिपालसमायुक्तं हूँकारँ मन्त्रमुच्यते॥ 60
भृगिटीन्दक्षिणे स्थाप्य मयूरग्रीवसन्निभम्।
शक्त्यायुधसमायुक्तं ह्रींकारँ मन्त्रमुच्यते॥ 61

In Public domain. Digitization Muthulakshmi Research Academy

प. 37

विजयं चैवोत्तरे स्थाप्य रक्तवर्णसमायुतम् ।
शूलायुधसमायुक्तो स्त्रींकारं मन्त्रमुच्यते ॥ 62
अनन्तं पश्चिमे स्थाप्य कनकाहन्तथैव च ।
रज्जायुधसमायुक्तो हूंकारं मन्त्रमुच्यते ॥ 63
पशुपतिं पूर्वत स्थाप्य नीलरूपसमन्वितम् ।
पाशायुधसमायुक्तं ह्रींकारं मन्त्रमुच्यते ॥ 64
एवमेव क्रमं स्थाप्य एतैर्मन्त्रैश्च पूजयेत् ।
सर्वा चतुर्भुजाश्चैव त्रिणेत्राश्चैव संयुतम् ॥ 65
सर्वान् हृज्वागतान् स्थित्वा क्रूरदृष्टिर्भयावहान् ।
मकुटैः कुण्डलैर्हारैः कटिसूत्रन्तु वीरकम् ॥ 66

In Public domain. Digitization Muthulakshmi Research Academy

प. 37

नानाभरणसंयुक्तान् .... घोरावहाः।

सर्वे कुञ्चितपादास्तु पधनौ वनसंयुतान् ॥ 67

P. 75. ह्यवमेव क्रमेणैव पूजयेद्दैशिकस्सदा।

मन्त्रन्यासमिदं प्रोक्तं यजनं शृणु तत्त्वतः। 68

इति वीरतन्त्रे मन्त्रन्यास-

सप्तत्रिंशत्पटलः॥

=

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 38

॥ शिवार्चनापटलः ॥

प्रणम्य भगवन् तर्हि परिपृच्छत् पितामह् ।
शिवार्चनं कथं देव तत्सर्वं ब्रूहि मे प्रभो ॥ 1
एतत् सर्वं समासेन श्रूयतां कमलासन ।
नारुद्रस्संस्मरे रुद्रन्नारुद्रो रुद्रमर्चयेत् ॥ 2
नारुद्रः कीर्तये रुद्रन्नारुद्रो रुद्रमाप्नुयात् ।
सर्वपापहरञ्चैव सर्वतीर्थफलं भवेत् ॥ 3
अदीक्षितश्च तुर्वेदी शिवलिङ्गंच न स्पृशेत् ।
दीक्षितश्चापि यो विप्रो भृत्यत्यन्तु न पूजयेत् ॥ 4
- - - - . . . . - - - - . . . . ।
भृभ्यर्थं सर्वदा काले आदिशैव शिवं यजेत् ॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 38

सन्धिस्वधर्मानुष्ठानं न दोषाय प्रकल्पयेत्।
आत्मार्थं पूजयेत्तेषां शास्त्रमार्गेण चैव हि॥ 6
तत्काले वाप्यकाले वा ह्यवमेव क्रमेण तु।
आत्मशुद्धिं पुरा कृत्वा स्थानशुद्धिं द्वितीयकम्॥ 7
तृतीय द्रव्यशुद्धिस्तु चतुर्थं लिङ्गशोधनम्।
पञ्चमं मन्त्रशुद्धिस्तु उच्यन्ते पञ्च शुद्धयः॥ 8
पूर्वोक्तेन विधानेन आत्मशुद्धिं च कारयेत्।
द्वितीयं स्थानशुद्धिं च कुर्याद्वै देशिकोत्तमम्॥ 9
हुंकारेण समायुक्तं फट्कारेण समायुतम्।
स्थानशुद्धिं ततः कुर्यात् दशा दिक्षु समन्ततः॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प. 38

गोमयेनोपलिप्याथ प्रोक्षयेद्धृदयेन तु ।

उदकभाण्डं वर्धन्यां पाद्याचमनपात्रकम् ॥ 11

अर्घ्यपात्रं पुष्पपात्रं धूपदीपस्य पात्रकम् ।

चरुं च स्थाली जलं कुम्भं च नीराजनस्य पात्रकम् ॥ 12

हृदयेन क्षालयित्वा तु अस्त्रेण शोधयेत्ततः ।

दर्भोपरि न्यसेत्तत्र कवचेनावकुण्ठयेत् ॥ 13

पञ्चब्रह्मेण मन्त्रेण उदकं सेचयेत्ततः ।

गन्धं हृदयोल्लोडय्य शिरसा गन्धकं ददेत् ॥ 14

द्रव्याणि प्रोक्षयेत्तत्र हृदयेन तु मन्त्रतः ।

द्रव्यशुद्धिर्भवेदेवं लिङ्गशुद्धिं ततः शृणु ॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

प.38

हृदयेनैव मन्त्रेण घण्टा चैव तु ताडयेत्।

P.76. हुंकारेण तु मन्त्रेण य वक्रापमनीयते॥ 16

पूजापर्युषितानां तु हृदयेन विसर्जयेत्।

सद्योजातेन मन्त्रेण पुष्पं शिरसि निक्षिपेत्॥ 17

अपनीयव निर्माल्यञ्चण्डेशाय प्रदापयेत्।

न शून्यमस्तकं लिङ्गं कृत्वाभिषेकन्तु साधकः॥ 18

लिङ्गं प्रक्षालयेत्तत्र हृदयेन तु मन्त्रतः।

लिङ्गे वा कौतुके वापि भित्तिच्छिद्रे च मण्डले॥ 19

ावमेव क्रमेणैव लिङ्गशुद्धिमथाचरेत्।

पञ्चमं मन्त्रशुद्धिस्तु कारयेद्देशिकोत्तमः॥ 20

In Public domain. Digitization Muthulakshmi Research Academy

प. ३४.

पञ्चब्रह्मशिवाङ्गैश्च प्रासादेन समन्वितम्।
व्योमव्यापिसमायुक्तं विद्येश्वरांश्च तावच ॥२१॥
गणेशान् लोकपालांश्च लोकपालास्त्रमेवच।
ओंकारमादितः कृत्वा नमस्कारान्त योजयेत् ॥२२॥
मन्त्रशुद्धिर्भवेदेवं कारयेद्देशिकोत्तमः।
शुद्धयः पञ्च योवेत्ति स पूजां कर्तुमर्हति ॥२३॥

॥ आसनम् ॥

आसनं कल्पयेद्विद्वाननन्तादि यथाक्रमम्।
अनन्तासनं तु प्रथमं योगासन् द्वितीयकम् ॥२४॥
सिंहासनं तृतीयं स्याद्योगासनश्चतुर्थकम् ॥?
विमलासनश्च तु त्र्यं तु पद्मासनमिहोच्यते ॥२५
शक्त्याक्षरसमायुक्तं नवामां कुरु संयुतम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

प. 38

बीजाक्षरसमायुक्तं नाळान्तं परिकीर्तितम् । 26
मध्ये नाळसमायुक्तं पञ्चाशत्कर्णिकैर्युतम् ॥
पद्मासनान्तकै र्दैर्घ्यैस्तदूर्ध्वे कर्णिकान्यसेत् । 27
अनन्तं पूर्वतो भागे वासुकीश्चाग्नि गोचरेत् ॥
तक्षकन्दक्षिणे स्थाप्य कार्कोटकं तु नैर्ऋते । 28
शङ्खपालञ्च वारुण्यां गुळिके वायुरेव च ॥
पद्मं तु सौम्यदिग्भागे महापद्मीश गोचरे । 29
अनन्तासनन्तु प्रन्ती स्यात् कूर्मस्योपरि संश्रिताः ॥
मध्यस्थञ्चैव नाळन्तु शिवाङ्गं वेष्टयेत्ततः । 30
आधारञ्चाप्य ते विप्र देवानाञ्च शृणुध्वथ ॥

In Public domain. Digitization Muthulakshmi Research Academy

प. 38

अनन्तेशश्च सूक्ष्मश्च शिवोत्तमश्चैकनेत्रकम् । 31

एकरुद्र त्रिमूर्तिश्च श्रीखण्डीश्च शिखण्डिनः ॥

पूर्वादीशानपर्यन्तं क्रमात् विन्यस्य देशिकः । 32

शेषश्चैव तु नागेन्द्र गुलिकाश्च चतुर्दश ॥

P.77. अनन्तासनमिहं प्रोक्तं योगासनमिहोच्यते । 33

चतुरश्रं तु योगं स्याच्छेषस्योपरि विन्यसेत् ॥

प्राणन्तु पूर्वत स्थाप्य अपानं वह्निगोचरेत् । 34

व्यानञ्च यमदेशे तु उदानं नैर्ऋते तथा ॥

समानं पश्चिमे न्यस्य नागश्चै-- तु वायवे । 35

कूर्मश्चैव तु सौम्ये तु कृकरत्वीश गोचरेत् ।

In Public domain. Digitization Muthulakshmi Research Academy

प. 38

देवदत्त धनञ्जयौ मध्यमे च विकीर्यते। 36
आधारन्तु मया प्रोक्तं देवतानां शृणुष्वथ॥
प्रणवं मध्यदेशे तु आकारं पूर्वदेशके। 37
ईकारं वह्निदेशे तु ऊकारं दक्षिणे ततः॥
ह्योकारञ्चैव नैर्ऋत्या मः कारं वारुणे न्यसेत्। 38
ह्याकारं वायुदेशे तु विकारं सौम्यदेशके॥
नकारमीशदिग्भागे ओंकारं पूर्वसंस्थितम्। 39
अधश्च योर्ध्वछदनं योगासनमिति स्मृतम्॥
योगासनोपरिष्टात्तु सिंहासनमिहोच्यते। 40
आग्नेय्यान्धर्मं विन्यस्य नैर्ऋत्यां ज्ञानमेव च॥

In Public domain. Digitization Muthulakshmi Research Academy

प. 38

वैराग्यञ्चैव वायव्यामैश्वर्यन्त्वीशकोचरे। 41
चतुष्कोणे महासिंहमादृसनं पादनिर्मितम्॥
शङ्ख स्फटिकपीतञ्च रक्तसिंहस्य वर्णकम्। 42
अधर्मं पूर्वतो भागे अज्ञानं दक्षिणे तथा॥
(अ)वैराग्यं पश्चिमे न्यस्य (अ)नैश्वर्यं चोत्तरे दिशि। 43
कृष्णवर्णसमायुक्तमिकिकान्तत्र विन्यसेत्॥
अव्यक्तो नियतिः कालकलाचेति चतुष्टयम्। 44
महादिक्षु न्यसेद्दैनं मध्ये पादस्तु केशवः॥
त्रिणेत्रं भीमसंकाशा विदिक्षु मिमुखांस्तथा। 45
एवं सिंहासनं प्रोक्तं पद्मासनमथोच्यते॥

In Public domain. Digitization Muthulakshmi Research Academy

प. ३८

पृथिवीं पूर्वदलञ्चैव आपञ्चैवाग्निगोचरेत् । 46
तेजोरूपन्तु दक्षिण्यां वायुरूपन्तु नैर्ऋते ॥
आकाशञ्चैव विप्रेन्द्र वारुण्यान्दलमुच्यते । 47
सत्वं वायव्यके न्यस्य रजो विन्यस्य सोमके ॥
ईशानेन तु दले विप्र तमोरूपं प्रकल्पयेत् । 48
तत्ववर्णसमायुक्त माधारञ्चोच्यते मया ॥
मूलं सद्येन मन्त्रेण नालं वामेन कारयेत् । 49
अघोर दलमेवाहु स्तत्पुरुषं गुह्य देशके ॥
सुषिरमीशमन्त्रेण कुर्याद्वै देशिकोत्तमः । 50
P. 78. देवताः संप्रवक्ष्यामि कालीं पूर्वे तु विन्यसेत् ॥

In Public domain. Digitization Muthulakshmi Research Academy

प. 38

कलविकरणीञ्चाग्ने रौद्रीञ्चैव तु दक्षिणे। 51
बलविकरणी नैऋत्यां वामीं पश्चिमतो न्यसेत्॥
बलप्रमथनीं वायव्ये ज्येष्ठाञ्चोत्तरके दिशि। 52
सर्वभूतेति मीशान्यां मनोन्मनीन्तु मध्यमे॥
एवं पद्मासनं प्रोक्तं विमलासनमिहोच्यते। 53
चतुर्वेद्या स्वरूपन्तु विन्यसेद्व्याघ्रचर्मवत्॥
त्रिविकोपरि विन्यस्य देवताञ्च शृणुष्वथ। 54
अम्बिका पूर्वत स्थाप्य गणाम्बिकाच दक्षिणे॥
गौरीञ्च पश्चिमे न्यस्य प्राज्ञाचैवोत्तरे दिशि। 55
विमलासनमिदं प्रोक्तमिदमन्य शृणुष्वथः॥

In Public domain. Digitization Muthulakshmi Research Academy

प. 38

आवाहनासनं पद्मं स्नानासनमनन्तकम्। 56

विमले मर्चने कुर्म्मं भोज्यासनन्तु योगतः॥

एवमेव प्रकारेण आसनक्रममुच्यते। 57

गन्धैः पुष्पैश्च धूपैश्च दीपैश्चैव तु पूजयेत्॥

स्वनामाद्याक्षरेणैव हृदयेन तु देशिकः। 58

सत्त्वरजस्तमश्चैव ... उपर्युपरि विन्यसेत्॥

आग्नेस्तु मण्डलेचैव तदन्ते सूर्यमण्डलम्। 59

चन्द्रं बिम्बं न्यसेत पश्चात् आत्मानश्चान्तरात्मकम्॥

परमात्मानमेवं च स्वनामाद्येन विन्यसेत् 60

दक्षिणे ह्यात्मतत्त्वं तु विद्यातत्त्वं तु चोत्तरे॥

In Public domain. Digitization Muthulakshmi Research Academy

प. 38

मध्यमे शिवतत्त्वं तु विन्यसेत्तु यथाक्रमम्। 61

एवं न्यस्त्वा तु विधिवच्छिवं संपूजयेत्ततः॥

शुद्धस्फटिकसंकाशं स्फुरन्तन्दीप्ततेजसः। 62

त्र्यक्षं दशभुजं चैव चन्द्रार्धकृतशेखरम्॥

जटामकुटसंयुक्तं चारुगात्रसमायुतम्। 63

पञ्चवक्त्रं च देवेशं पञ्चमूर्धातु संयुतम्॥

सर्वलक्षणसंयुक्तं सर्वाभरणभूषितम्। 64

मकुटं कुण्डलं चैव केयूरकटकं ततः॥

कटिसूत्रोदरं बन्धं मेखलानूपुरैर्युतम्। 65

दिव्याम्बरधरं देवं दिव्यस्रक्गन्धलेपितम्॥

In Public domain. Digitization Muthulakshmi Research Academy

प. ३४

पाशं परशुखड्गं च वज्रञ्चाभय दक्षिणे। 66

वामांकुशञ्चैवा घण्टां नागञ्च वह्निच॥

एतेषां न्वायुधा विप्र वामहस्ते ददेत्ततः। 67

P.79 एवं सदाशिवं ध्यात्वा सर्वलोकसुखावहम्॥

॥ आवहनादि ॥

आवहयेत्ततो देवं सद्योजातेन मन्त्रतः। 68

स्थापयेद्वामदेवेन अघोरेण निरोधयेत्॥

सान्निध्यं पुरुषेणैव ईशानेन तु पूजयेत्। 69

पूर्वद्वारगेहन्तु दक्षिणे वा विशेषतः॥

पश्चिमद्वारगेहं वा उत्तरद्वारमेव वा। 70

निष्कळे च सकळं ध्यात्वा आसनं चैव कल्पयेत्॥

In Public domain. Digitization Muthulakshmi Research Academy

प. 38

द्वारस्याभिमुखं स्थाप्य पूजयेत् पूर्ववत्ततः। 71
द्वारभेदेषु भेदानां पूजाभेदन्न विद्यते॥
ईशानं मूर्ध्नि विन्यस्य मुखे तत्पुरुषं विन्यसेत्। 72
अघोरं हृदये न्यस्य गुह्ये वामं प्रकल्पयेत्॥
सद्योजातं न्यसेत्पादौ पुनरङ्गान्न विन्यसेत्। 73
हृदये हृदयं न्यस्य शिरःशिरसि विन्यसेत्॥
शिखायान्तु शिखा न्यस्य कवचं स्तनमध्यतः। 74
अस्त्रं हस्तप्रदेशे तु नेत्रं नेत्रेषु विन्यसेत्॥
पञ्चवक्त्रेषु विप्रेन्द्र अक्षीणां पञ्चदृशेषु च। 75
पाद्यं पादौ तु प्रदातव्य अर्घ्यं शिरसि विन्यसेत्॥

In Public domain. Digitization Muthulakshmi Research Academy

प. 38

मुखेष्वाचमनं विद्याद्धृदयेन तु मन्त्रतः। 76
उशीरं चन्दनोपेतं पाद्यद्रव्यमुदाहृतम्॥
फलत्रयञ्च कर्पूरं आदिपत्रञ्च पालिकम्। 77
आचमनीयमामिति ख्यातं अर्घ्यो विशेषतः॥
आप क्षीर कुशाग्राणि अक्षतैर्यवतण्डुलैः। 78
तिलैस्सिद्धार्थकैश्चैव अर्घ्यमष्टाङ्गमुच्यते॥
नेत्रे चैव तु विप्रेन्द्र नेत्रमुद्रां च दर्शयेत्। 79
क्षुरिका कल्पयेत्तत्र दक्षिणे करे च॥
शिवास्त्रं विन्यसेत्तत्र दक्षाग्रे दशदिक्षु वै। 80
शिवस्य दक्षिणे पार्श्वे न्यसेत् पाशुपतास्त्रकम्॥

In Public domain. Digitization Muthulakshmi Research Academy

प. 38

अघोरास्त्रं पश्चिमे न्यस्य स्वस्वबीजेन मन्त्रतः। 81
एवं न्यस्य विधानेन पश्चादर्चनमारभेत्॥
अभिषेकं रयेत्तत्र हृदयेन तु मन्त्रतः। 82
आदित्योदयमारभ्य जलेनैवाभिषिञ्चयेत्॥
पञ्चब्रह्मषडङ्गैश्च व्योमव्यापि जपेत्ततः। 83
रत्नोदकं स्वर्णाम्भ पुष्पोदकसमन्वितम्॥
जलभाण्डे विनिक्षिप्य अभिषेकं तु कारयेत्। 84
P. 40 नवकुम्भेन वा कुर्यात् षोडशैः कुम्भमेव वा॥
द्वात्रिंशद्वा चतुस्त्रिंशत् पञ्चाशत् पञ्चविंशति। 85
अष्टोत्तरशतं वापि कारयेद्देशिकस्तथा॥

In Public domain. Digitization Muthulakshmi Research Academy

प. 38

आढकेन -- संपूर्णं कुम्भलक्षणमुच्यते। 86

कुम्भं चैव प्रकर्तव्यं सौवर्णं रजतं तु वा॥

ताम्रं वा मृण्मयं वापि अभिषेकं तु कल्पयेत्। 87

दधिक्षीरघृतं चैव मधु वा पञ्चगव्यकम्॥

नालिकेरस्य सलिलमिक्षुखण्डसमन्वितम्। 88

अभिषेकारयेत्तत्र पुनर्गन्धोदकेन च॥

नृत्तगेयसमायुक्तं स्तोत्रशब्दसमायुतम्। 89

वाद्यध्वनिसमायुक्तं भरतोक्तेन मार्गतः॥

तस्यान्ते पूजको विप्र आचमनीयं तु कारयेत्। 90

कुङ्कुमं चन्दनं चैव --गरुं खड्गमेव च॥

In Public domain. Digitization Muthulakshmi Research Academy

प. 38

निर्यासत्रिफलश्चैव उशीरश्च विशेषतः। 91
आलोड्य सर्वमेवं तु लेपयेल्लिङ्गमेव च ॥
हृदयेन तु गन्धं स्याच्चस्त्रं वामेन दापयेत्। 92
वस्त्रेणावेष्ट्य लिङ्गं तु नानावर्णैरनेकशः॥
नानाविधैश्च पुष्पैश्च पूजयेत परमेश्वरम्। 93
अस्त्रमन्त्रेण शिरसा पुष्पं दद्याच्छिवस्य तु॥
पीठपूजां प्रकर्तव्यं लक्षणेन समन्वितम्। 94
पीठस्योत्सेधमानेन फलकाचतुरश्रकम्॥
विस्तारं --- पदेव स्यान्मृदैनैव तु लेपयेत्। 95
उत्तमं शालिपिष्टेन लेपयेत्फलकान्ततः॥

In Public domain. Digitization Muthulakshmi Research Academy

प-38

पुष्पैर्नानाविधैर्युक्तं नालिकेरं सपत्रकम्। 96

गज सिंहञ्च गावञ्च अश्वञ्च पशुपुष्पकम्॥

सर्वद्वयञ्च पीठञ्च गोपुरं मण्डपं तथा। 97

विमानं चैव मत्स्यंच मकरंच तथैवच॥

दर्पणं पूर्णकुम्भंच वृषभं युग्मचामरम्। 98

श्रीवत्सं स्वस्तिकं शङ्खं दीपो देवष्टमङ्गलम्॥

वज्रं शक्तिंच दण्डंच खड्गं पाशं तथाङ्कुशम्। 99

गा - - - त्रिशूलञ्च शक्रञ्च पद्मञ्चेति दशायुधम्॥

दिनं प्रतिन्यसेद्धैक त्रिंशत् दिनान्तमेवच। 100

पुष्पैः पत्रैश्च विप्रेन्द्र अलंकृत्य विशेषतः॥

In Public domain. Digitization Muthulakshmi Research Academy

प. 38

पीठपूजां च विप्रेन्द्र हृदयेन तु मन्त्रतः। 101
पीठे चैव न्यसेद्विद्वान् गन्धपुष्पादिनार्पयेत्॥

P.81. मासे मासे प्रकर्तव्यमेवमेव पुनः पुनः। 102
विन्यसेत् विं-··· पूर्वे तु प्रासादेन तु मन्त्रतः॥

धूपञ्चैव तु विप्रेन्द्र धूपपात्रं विशेषतः। 103
शितारिञ्चैव निक्षिप्य यथा वित्तानुसारतः॥

एकभागं तु कर्पूरं लोहञ्चैव चतुष्टयम्। 104
चन्दनं चैव षड्भागं वारं सप्तधा भवेत्॥

मधुना सेचयेद्धूपं पात्रे तु परिनिक्षिपेत्। 105
देवदारुञ्च मेरुञ्च सर्जश्रीलासकुन्दकम्॥

In Public domain. Digitization Muthulakshmi Research Academy

प.३८

श्रीफलञ्चाज्य सम्मिश्रं धूपं दद्याद्विशेषतः। 106

धूपघण्डासमायुक्तं वामहस्ते विचक्षणः॥

दक्षिणे धूपपात्रं तु हृदयेन तु दापयेत। 107

हुंकारेण तु मन्त्रेण यवनीकामपनीयते॥

प्रोक्षयेदम्भसा चैव दीपं दद्यात्तु सद्यतः। 108

प्रोक्षयेदम्भसा चैव पुष्पं शिरसि निक्षिपेत॥

रक्षादीपन्तु कर्तव्यं तत्काले तु विशेषतः। 109

सायाह्नसमये विप्र यक्षेश्वरंच पूजयेत॥

तद्दीपं बलिपीठे तु स्त्रीभिश्चैव तु धारयेत। 110

विसर्जयेत्तु विप्रेन्द्र पादप्रक्षालनं कुरु॥

In Public domain. Digitization Muthulakshmi Research Academy

प. 38

आढकं वा शिवं वापि द्रोणं वा तण्डुलं पचेत्। ।।1

निर्वपनं तु कर्तव्यं मनेकोपदंशसंयुतम्॥

आज्येन दधिसंयुक्तं पूर्वोक्तेन विधानतः। ।।2

अर्धं निवेदयेद्देवमेकांशं बलि चाग्निभिः॥

पात्रशेषं चतुर्थांशं दीक्षिकाय प्रदापयेत्। ।।3

पञ्चवर्णाभिश्चान्नम्भिः पञ्चवक्त्रे निवेदयेत्॥

निर्माल्यंचैव विप्रेन्द्र चण्डेशाय प्रदापयेत्। ।।4

पादप्रक्षाळनं कृत्वा मुद्रांचैव तु सारयेत्॥

पद्मं शूलं च परशुं खड्गं पाशं तथाङ्कुशम्। ।।5

धनुर्बाणञ्च घण्टाञ्च वज्रमुद्रां तु दर्शयेत्॥

In Public domain. Digitization Muthulakshmi Research Academy

प. 38

सुरभिमुद्रां लिङ्गमुद्रांमुद्राद्दर्शयेत्तु विधानतः। 116

एवमेव क्रमं कुर्यात् पश्चात् ब्रह्माङ्ग पूजयेत्॥

पुरुषं पूर्वतः पूज्य अघोरं दक्षिणे यजेत्। 117

सद्यः पश्चिमतः पूज्य वामदेवं तु चोत्तरे॥

(न्त)?
ईशानं कर्णिकायन्तु पूजयेद्देशिकस्सदा। 118

आग्नेय्यां हृदयं पूज्य ऐशान्यान्तु शिरो यजेत्॥

नैर्ऋत्यान्तु शिखां पूज्यां वायव्यां कवचं यजेत्। 119

P. 82 अस्त्रं दिशासु संपूज्य नेत्रमीशानके यजेत्॥

मध्यमे शिवतत्त्वं तु आत्मतत्त्वं तु दक्षिणे। 120

विद्यातत्त्वं तु सौम्यायां गन्धाद्यैर्नैव पूजयेत्॥

In Public domain. Digitization Muthulakshmi Research Academy

प.38

मध्यमे तु यजेद्देवं शिवं परमकारणम्। 121

किञ्चिदीशानमाश्रित्य सदाशिवं यजेत्ततः॥

महेश्वरं यजेन्मध्ये किञ्चिदाग्नेयमाचरेत्। 122

स्थूलं महेश्वरं विद्धि सूक्ष्मरूपं सदाशिवं॥

परशिवमयं ज्ञेयं शिवापरतरन्न च। 123

गर्भावरणमेवं तु विद्येशावरणं शृणु॥

अनन्तं पूर्वतः पूज्य सूक्ष्मं वै दक्षिणेन तु। 124

शिवोत्तमं पश्चिमे पूज्य एकनेत्रं तथोत्तरे॥

एकरुद्रं तु ईशान्यां त्रिमूर्तिं स्व ह्नि गोचरे। 125

श्रीकण्ठश्चैव नैरृत्यां शिखण्डी वायुगोचरे॥

In Public domain. Digitization Muthulakshmi Research Academy

प.38

विद्येशावरणं ह्येतत् गणेशावरणं शृणु । 126

उमादेवीञ्चोत्तरे देशे पूजयेद्देशिकस्सदा ॥

चण्डेशमीशदिग्भागे नन्दीशं पूर्वतो यजेत् । 127

महाकालं वह्निदेशे तु वृषभं दक्षिणे यजेत् ॥

विघ्नेशं निर्ऋतौ चैव भृङ्गीशं वारुणे यजेत् । 128

महासेनञ्च वायव्यां पूजयेद्गन्धपुष्पकैः ॥

गणेशावरणं ह्येतत् लोकपालान् शृणुष्वथ । 129

इन्द्रं तु पूर्वतः पूज्य वह्निञ्चाग्नेयमेव च ॥

याम्यायां यमं पूज्य नैर्ऋत्यां निर्ऋतिं यजेत् । 130

वारुण्यां पूज्य वारुणं वायव्यां वायुमेव च ॥

In Public domain. Digitization Muthulakshmi Research Academy

प. 38

सौम्यायां सोम संपूज्य ऐशान्यां इशमेवच। 131

ब्रह्माण नैऋते भागे ईशान्यां विष्णुरुच्यते॥

लोकेशावरणं ह्येतत् लोकपालास्ततमुच्यते। 132

पूर्वे तु वज्रं संपूज्य शक्तिश्चाग्नेयमेवच॥

याम्ये दण्डं यजेत्तत्र खड्गं नृति गोचरेत्॥ 133

वारुण्यां तु यजेत पाशमङ्कुशं वायुगोचरेत्॥

गदायुधश्चोत्तरे पूज्य शूलमीशान गोचरे। 134

पद्मं तु नैर्ऋते भागे चक्रं चीशान गोचरेत्॥

गन्धैः पुष्पैश्च धूपैश्च दीपैश्चैव तु पूजयेत्। 135

सर्वावरणदेवांश्च आसनं बिन्दुरुच्यते॥

In Public domain. Digitization Muthulakshmi Research Academy

प. 38

आसनस्थांश्च देवांश्च शिवस्याभिमुख स्थितः। 136

पञ्चब्रह्म शिवाङ्गानां सुरभिमुद्रां च दर्शयेत्॥

P.83 विद्येशानां गणेशानां लिङ्गमुद्रां च दर्शयेत्। 137

लोकपालांश्च हेतींश्च पद्ममुद्रां च दर्शयेत्॥

तत्काले ताडयेद्घण्टां पटञ्चैव विसर्जयेत्। 138

धूपं दद्यात्तु विप्रेन्द्र हृदयेन तु मन्त्रतः॥

प्रोक्षयेदम्भसा चैव दीपं दद्यात् शिखा सह। 139

प्रोक्षयेदम्भसा चैव ईशानेन विशेषतः॥

पञ्चवर्णहविर्दद्यात् पञ्चवक्त्रेषु देशिकः। 140

पानीयञ्चैव दद्यात्तु वस्त्रपूतेन वारुणा॥ (रि?)

In Public domain. Digitization Muthulakshmi Research Academy

प.38

उशिरञ्चैव कुष्ठञ्च तालञ्चन्दन सँयुतम्। 141
तक्कोलञ्चैव विप्रेन्द्र पानीये च दापयेत्॥

मुखवासञ्च ताम्बूलं कर्पूरं त्रिफलैर्युतम्। 142
मातुलुङ्ग फलाद्यादि दद्यात्ताम्बूलकैस्सह॥

अपूपं पृथुकञ्चैव फट्कुली च समन्वितम्। 143
गुडाट्येन समायुक्तं घृतेन सह पाचयेत्॥

निवेदयेत्तु शर्वाय क्षेत्रपालांश्च पूजयेत्। 144
तालजङ्घो लोहजङ्घो स्तथः पर्वतजङ्घकः॥

समुद्रघोषो वायुघोषो अनलाक्ष प्रमर्दनम्। 14
अघोरदंष्ट्र इत्यष्टौ दण्डहस्ते स्सुभीषणः॥

In Public domain. Digitization Muthulakshmi Research Academy

प. ३८

नीलजीमूतसंकाश ऊर्ध्वकेशासमन्वितम् । 146

पूजयेत क्षेत्रपालानाँ स्वस्वनामेन पूजयेत ॥

एवमेव क्रमेणैव पूजयेद्धेशिकोत्तमः । 147

प्रदक्षिणत्रयं कृत्वा नमस्कारं तु कारयेत ॥

शिरो हस्तौ द्विचान्वौ च चिबुकां बाहुयत्तथा । 148

अष्टाङ्गञ्च नमस्कारँ पञ्चाङ्गं च तत श्रण ॥

शिरौ हस्त द्विजान्वौ च पञ्चाङ्गमिति होच्यते । 149

पूजयेद्द्वारपालांश्च परिवारांश्च पूजयेत ॥

पञ्चावरणं प्रोक्तमेकावरणमुच्यते । 150

प्रथमं सिंहासनं चैव पद्मासन द्वितीयकम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

प. ३८

विमलासनं तृतीयं स्यात् आसनं त्रीणि कल्पयेत् । 151
पञ्च ब्रह्म शिवाङ्गैश्च पूजयेत्पूर्ववत्ततः ॥
प्राकावरणमेवोक्तं पूजयेद्देशिकस्सदा । 152
स्वगुरुं पूजयेत्तत्र गन्धपुष्पादिना सह ॥
अग्निकार्यं ततः कुर्याल्लक्षणेन समन्वितः । 153
परिषेचनं ततः कुर्याद्धृदयेन तु मन्त्रतः ॥
गन्धपुष्पादिना चैव अग्निदेवं समर्चयेत् । 154
P. 84. आज्येनान्त समायुक्तं होतव्यं देशिकस्सदा ॥
प्रासादेन तु मन्त्रेण शिवे दशाहुतिं हुनेत् । 155
गौरीबीजेन मन्त्रेण होतव्यं पञ्च प्रावच ॥

In Public domain. Digitization Muthulakshmi Research Academy

प. ३८

पञ्चब्रह्म शिवाङ्गानां मेकैकं होमयेत्तदा । 156

विद्येशानां गणेशानां लोकपालान् सहस्रकः ॥

एकाहुतिञ्च होतव्यं तत्तत्स्वनाममन्त्रतः । 157.

परिषेचनं ततः कृत्वा नित्योत्सवं तु कारयेत् ॥

पुस्तकाराधनं तत्र गन्ध पुष्पादिना सह । 158

चुलुकोदकेन विप्रेन्द्र स्वात्मानं च निवेदयेत् ॥

उक्तानुक्तं च तत्सर्वं हृदयेन तु दापयेत् । 159

हृदयेन तु मन्त्रेण विसर्जयेत्तु बुद्धिमान् ॥

प्रविश्य स्वगृहं पश्चात् गृहदेवान् समर्चयेत् । 160

? न संपूज्य शिवं मोहात् भुञ्जीव कदाचनः ॥

In Public domain. Digitization Muthulakshmi Research Academy

प. ३८

तस्मात् सर्वप्रयत्नेन पूजयेच्छिवमादरात्। 161

एष धर्मपरो नास्ति भुवनत्रय येपि वा॥

आत्मार्थं पूजयेन्नित्यं चल्लिङ्गं विशेषतः। 162

सुप्तभक्तिं समभ्रम्य पूजयिष्यति यो नरः॥

आभिचारं करिष्यामि एकया (धा?) कृशया (धा?) स्तथा। 163

पूजयेन्मण्डले वापि पूर्वोक्तविधिना सहाः॥

एवमेव क्रमेणैव अर्चयेद्देशिकस्सदा। 164

अर्चनं विधि मे प्रोक्तं अग्निकार्यं ततः शृणु॥

इति वीरतन्त्रे - - - - - - - - -

अर्चना विधि अष्टात्रिंशत्पटलः

=

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 39

॥ अग्निकार्यविधिपटलः ॥

शिवं प्रणम्य विधिवत् परिपृच्छत् पितामहः ।
कीदृशञ्चाग्निकार्यञ्च तत् सर्वं ब्रूहि मे प्रभो ॥ 1
ऽतत्सर्वं त्वया पृष्टं अग्निकार्यञ्च सर्वशः ।
समासेन प्रवक्ष्यामि शृणुष्व कमलासन ॥ 2
ग्रहणे विषुवे चैव नित्यनैमित्तिकेऽपि च ।
प्रतिष्ठाञ्चोत्सवे चैव शत्रूणाञ्च प्रमर्दनेत् ॥ 3
अयने दर्शपूर्णे च प्रोक्षणे मन्त्रसाधने ।
दीक्षाकाले तु वा कुर्यात् शान्तिके पौष्टिकेऽपि वा ॥ 4
स्वप्ने चैव वा कुर्यात् अग्निकार्यं समाचरेत् ।
चौळे वा चोपनयने समावर्तनकेऽपि वा ॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 39

विवाहे चान्न प्रवेशा च पुंसवने तथैव च ॥

P. 85 सीमन्तोपनिष्क्रामे आग्निष्टोमादियागके । 6

विधिना चाग्निकार्यं तु कारयेत्तु समाहितः ॥

कुण्डं वा स्थण्डिलं वापि कारयेद्देशिकस्तथा ॥ 7

हस्तमात्रं भवेत्कुण्डं चतुरश्रं च जायते ॥ ।

वृत्तकुण्डञ्च वा कुर्यात् नित्यकर्मिहोच्यते ॥ 8

यावदश्रीं भवेत्पीठं तावदश्रं च कुण्डकम् ॥ ।

त्रिमेखलासमायुक्तं नाभियोनिं समान्वितम् ॥ 9

अश्वत्थपत्रवद्योनिं मेखलोपरि कल्पयेत् ॥ ।

खननं हस्तमात्रं तु दर्पणोदरवत्ततम् ॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प. ३९

स्थण्डिलं वापि कर्तव्यं सिकतैश्शुद्धदेशकैः।
शोषितं पाचितं चैव शोषणं पाचनं तथा॥ ११

आज्यपात्रं चरुं स्थालीं समिधा विष्टरमाकुशाः।
प्रणीतास्प्रोक्ष्यपात्रं तु स्रुवापरिधय स्रुचिम्॥ १२

दर्वीञ्चैव तु स्रुक्चैव होमद्रव्या ह्य सर्वशः॥
वस्त्रञ्चोष्णीषमेवन्तु अर्घ्यगन्धञ्च पुष्पकम्॥ १३

धूपदीपं तथा चैव अग्निरुत्तरतो न्यसेत॥
आज्यञ्चैव चरुञ्चैव होमद्रव्यञ्च सर्वशः॥ १४

दर्भेणोपरि विन्यस्य प्रच्छादने तु दर्भकैः॥
साधयेद्धृदयेनैव प्रोक्षयेदम्भसान्ततः॥ १५

In Public domain. Digitization Muthulakshmi Research Academy

प. ३१

उल्लेखनं ततः कृत्वा अभ्युक्ष्य कवचेन तु।

त्रिस्रः पूर्वमुखा रेखा उदग्रे वान्तथैव च॥ 16

ब्रह्मा विष्णुश्च रुद्रश्च दक्षाद्याधिदैवतान्।

अर्चयेत् गन्धपुष्पाश्च हृदयेन तु मन्त्रतः॥ 17

अरण्युद्भवमेवाग्निं सूर्यकान्तोद्भवं तु वा।

श्रोत्रस्याग्निहोत्रौ च जनयेज्जातवेदसम्॥ 18

अरणीश्चैव विप्रेन्द्र षोडशाङ्गुलदैर्घ्यकम्।

विस्तारन्तु षडङ्गुल्य विष्कम्पन्तु त्रियङ्गुलम्॥ 19

शमीपिप्पलपत्रश्च कारयेदरणीन्ततः।

मथित्वा पञ्चब्रह्मेण पात्रे विन्यस्य देशिकः॥ 20

In Public domain. Digitization Muthulakshmi Research Academy

प. 39

तदग्निं सर्वकार्येषु उपनयनादि कारयेत् ।

हृदा चाग्निं प्रतिष्ठाप्य अग्न्याधानं तु कारयेत् ॥ 21

अग्न्याधानमुपस्थानं परिस्तरणमेव च ।

पात्राणां साधनं चैव प्रोक्षणं प्रोक्षणी तथा ॥ 22

कूर्चाधानं प्रणीता च घृतसंस्कारमेव च ।

इध्मप्रवेशनं चापि तत्तन्मन्त्रेण देशिकः ॥ 23

P. 86. प्रासादेन तु मन्त्रेण उपस्थानं तु कारयेत् ।

अग्नौ काष्ठां विनिक्षिप्य शिवमन्त्रेण देशिकः ॥ 24

परिस्तरणं पुतः (न?) कुर्यात् प्रागग्रञ्चोत्तराग्रकम् ।

कुशेनैव परिस्तीर्य पूर्वे तु चोत्तराग्रजान् ॥ 25

In Public domain. Digitization Muthulakshmi Research Academy

प.39

तदूर्ध्वे दक्षिणास्तीर्य पश्चिमे चोत्तराग्रकम्।
उत्तरे पूर्वमूर्ध्वं तु विन्यसेद्देशिकस्ततः॥ 26
परिधिं विन्यसेत्तत्र दक्षिणे पश्चिमोत्तरे।
ऊर्ध्वं स्मन्धाद्वयञ्चैव आग्नेय्यामीशदेशतः॥ 27
मध्यमे चैव संस्थाप्य वागीशीन्तु विशेषतः।
ऋतुस्नानन्तु संकल्प्य योनिमार्गेण जायते॥ 28
हृदयेनाहुतिस्सप्त गर्भाधानं भवन्ति वै।
तत्पुरुषेण मन्त्रेण पुंसवनं भवन्ति वै॥ 29
शिरोमन्त्रेण विप्रेन्द्र सीमन्तं सप्त भूयते।
वामदेवेन मन्त्रेण जातकर्मञ्च हूयते॥ 30
ऽाका हृदयन्त्रिपादञ्च द्विवक्त्रञ्च द्विनासिकम्।
चतुश्शृङ्ग समायुक्त वर्णत्रेण समन्वितम्॥ 31

In Public domain. Digitization Muthulakshmi Research Academy

प-39

सप्तजिह्वा सप्तहस्ता उपवीतसमन्वितम्।

जटामौञ्जीसमायुक्तं कृष्णाजिनसमायुतम्॥ 32

हिरण्या कनका रक्ता कृष्णा चैव तु सुप्रभा।

अतिरक्ता बहुरूपा सप्तजिह्वा प्रकीर्तिता॥ 33

हिरण्या वारुणे जिह्वा कनका मध्यमे स्थिता।

उत्तरे रक्तमाख्यातं याम्ये कृष्णा इति स्मृता॥ 34

सुप्रभा पूर्वदेशे तु अतिरक्ताग्नौ व्यवस्थिता।

बहुरूपेशजिह्वा स्यात् सप्तजिह्वाः प्रकीर्तिताः॥ 35

कनकाख्या तु जिह्वायां सर्वहोमं तु कारयेत्।

जातकर्म मया प्रोक्ता नामन्तु हृदयेन तु॥ 36

In Public domain. Digitization Muthulakshmi Research Academy

प. 39

निष्क्रामणन्तु शिरसा प्राशनं हृदयेन तु ।

चौक मन्त्रेण कर्तव्य उपनयनं हृदयेन तु ॥ 37

व्रतानां चैव सर्वेषां शिरसा चैव हूयते ।

हृदयेन तु मन्त्रेण समावर्तनविवाहकम् ॥ 38

पृथक् पृथक् क्रियाणाञ्च सप्तवैवाहृतिर्भवेत् ।

दक्षिणे ब्रह्मणः स्थानं दर्भासनोपरि न्यसेत् ॥ 39

प्रणीतामुत्तरे स्थाप्य सपवित्रसमायुतम् ।

विष्णुस्तत्राधिदैवत्यां गन्धपुष्पादिनार्चयेत् ॥ 40

प्रोक्षणीपात्रमादाय उदकं सेचयेद्बुधः ।

P. 87 कुशेनैव तु विप्रेन्द्र उदको प्लवनं कुरु ॥ 41

In Public domain. Digitization Muthulakshmi Research Academy

प. 39

प्रणीतापात्रमादाय उदकं चेचयेद्धृदा ।

उत्प्लवनं ततः कुर्यात् प्रणवेनैव निक्षिपेत् ॥ 42

आज्यपात्रं समादाय आज्यं चैव तु पूरयेत ।

अग्नेरुत्तरभागे तु अङ्गारकोपरि न्यसेत ॥ 43

स्वदेशे विन्यसेत्तत्र दर्भेणोद्दी प्लवं कुरु ।

आज्याधिश्रवणं कार्यन्दर्भानन्देवि निक्षिपेत ॥ 44

नाग्नौ तु प्रज्वाल्य प्रोक्षयेदम्भसा ततः ।

धृ वञ्चैव तु विप्रेन्द्र क्षाळयेद्धृदयेन तु ॥ 45

कुशेनैव समायुक्तं अग्रमग्रेण संस्पृशेत ।

मध्यं मध्येन संस्पृश्य मूलं मूलेन संस्पृशेत ॥ 46

In Public domain. Digitization Muthulakshmi Research Academy

प. 39

प्रोक्षयेदम्भसा चैव परिषेचनं तु कारयेत्।
अदितेऽनुमन्यस्वेति दक्षिणे परिषिञ्चति॥ 47
अनुमतेऽनुमन्यस्वेति पश्चिमे परिषिञ्चति।
सरस्वतेऽनुस्वैति उत्तरे परिषिञ्चति॥ 48
देव सवितु प्रसवेति समन्तात् परिषिञ्चति।
पलाशसमिधाश्चैव इध्मं षोडशमेव च॥ 49
तूष्णीमिध्मन्तु दातव्यमघोरश्चैव हूयते।
प्रजापते स्वाहेति दक्षिणार्ध पूर्वार्धके॥ 50
इन्द्रदेव स्वाहेति उत्तरपूर्वमध्यके।
सोमाय स्वाहेति मन्त्रेण दक्षिणार्धपूर्वार्धके॥ 51

In Public domain. Digitization Muthulakshmi Research Academy

प. 39

अग्निमुखञ्च होतव्य पञ्चब्रह्मेण मन्त्रवित्।
एवमेव क्रमेणैव हेन्तव्यन्दीर्घजीविनाम्॥ 52
नित्यकर्म होमञ्च कर्तव्यं लक्षणेन समन्वितम्।
अग्निमर्चयते चैव आज्ये नामेन संयुतम्॥ 53
प्रासादेन शिवस्याहो मन्त्रयेत्तु शताहुति।
गौरीबीजेन तद्वच्च पञ्चब्रह्म शिवाङ्गकैः॥ 54
विद्येश्वराणां मन्त्राश्च लोकपालान् सहास्त्रकैः।
होमये चैव विप्रेन्द्र नित्यहोममिहोच्यते॥ 55
पुनः परिषेचनं कृत्वा नित्योत्सवमथाचरेत्।
वर्णानि गन्धशब्दानि लक्षयेच्चैव देशिकः॥ 56

In Public domain. Digitization Muthulakshmi Research Academy

प. 39

आदित्योदयवर्णाभं पद्मरागस्य संप्रभम्।

रक्तपङ्कजसँकाशं किंशुकस्य सम्प्रभम्॥ 57

एते द्वादश वर्णानि जातवेदस्तु सिद्धिदम्।

उशीरं गुग्गु गन्धञ्च कर्पूरागरुमेव च ॥ 58

P. 88. चन्दनं जातितक्कोलं कामकन्तु विटिरेवच।

पद्मं कुसुमगन्धंच शुभान्येतानि निक्षिपेत्॥5

शिखायां लक्षयेत्तत्र पूर्वे चैवार्द्ध चिद्धिदः।

वारुणे शान्तिकं प्रोक्तं सौम्यायां मृत्युनाशनम्
60

ऊर्ध्वे तु सर्वकामार्थं लभते नात्र संशयः।

आग्नेय्यामग्निदग्धं च मृत्युञ्चैव तु याम्यके।
61

In Public domain. Digitization Muthulakshmi Research Academy

प. 39

नैर्ऋत्यां युद्धमरणं वायव्यां कलहं भवेत।

ईशान्यां ज्ञानलाभं च शिखानिष्क्रान्तलक्षणम॥ 62

कांसवद्ध्वनिने शब्दं मासात् मरणमाप्नुयात।

उलूककद्ध्वानिते वह्नि कारगृहमवाप्नुयात॥ 63

पिङ्गलद्ध्वनते वह्नि नृपस्य मरणं भवेत।

च र्वद्ध्वनिते वह्नि स्वपुत्रमरणं भवेत॥ 64

ऋषभद्ध्वनने वह्नि अगम्याद्ध गमनं भवेत।

अशनीद्ध्वनने वह्नि षण्मासा मरणं भवेत॥ 65

खरवद्ध्वनने वह्नि अपमृत्युवशं गतः।

तटिभिद्ध्वनिने वह्नि भार्याया मरणं भवेत॥ 66

In Public domain. Digitization Muthulakshmi Research Academy

प. 39

घोरवत् भवेश्छब्दं स्वद्रव्यन्तस्करावहम्।
समुद्रघोषवच्छब्दमासता मरणमाप्नुयात्॥ 67
गोवद्ध्वनिते वाह्नि सर्पेण मरणं भवेत्।
झल्लरीच भवेच्छब्दं चण्डालगमनं भवेत्॥ 68
भाण्डवद्ध्वनिते शब्दं रोगो भवति निश्चयः।
श्वानिनवद्ध्वनिते शब्दं भ्रूणहत्यामवाप्नुयात्॥ 69
कपिलद्ध्वनिते वाह्नि स्सुरापानमवाप्नुयात्।
बालवद्ध्वनिते शब्दं वि--च्या मरणं भवेत्॥ 70
लनगन्धं भवेदग्नि क्षयरोगमवाप्नुयात्।
--ह्रीगन्धं भवेदग्निं प्रमेहश्चैव जायते॥ 71

In Public domain. Digitization Muthulakshmi Research Academy

प. 39

अतिगन्धं भवेदग्नि महाज्वरमवाप्नुयात्।

मेध्यगन्धं भवेदग्निर्भगन्धं मरणं भवेत्॥ 72

मूत्रगन्धं भवेदग्नि पाण्डुरोगमवाप्नुयात्।

शिवगन्धेन वै विप्रा सान्निपातमवाप्नुयात्॥ 73

रोगं गन्धं भवेद्विप्र कुक्षिरोगमवाप्नुयात्।

तस्मात् सर्वप्रयत्नेन लक्षयेद्दैशिकस्सदा॥ 74

शुभाशुभं मया प्रोक्तं अग्निदैवस्य पत्मजः। (ब्जज?)

गृहाणाद्युक्तदुक्तकालेषु प्रतिष्ठादिमुहूर्तके॥ 75

परिषेचनञ्च कुर्यास्तु तद्दोषशमनाय च।

P. 89 होमं कुर्याच्च विप्रेन्द्र लक्षणेन समन्वितम्॥ 76

In Public domain. Digitization Muthulakshmi Research Academy

प. ३१

समिधाज्यचरुं लाजा सर्षपांश्च यवान् तिलान्।

प्रासादेन तु मन्त्रेण पश्चाशत् समिधा हुनेत्॥ 77

हृदयेनाज्यहोमन्तु चरुञ्च शिखया हुनेत्।

लाजं वामेन मन्त्रेण सर्षपं सद्यमन्त्रतः॥ 78

अघोरेण यवां हुत्वा कवचेन तिलानपि।

सप्तद्रव्येन होतव्यं पश्चादशाहुतिन्ततः॥ 79

सर्वद्रव्यसमायुक्तं (हो) व्यवाहं समुच्चरन्।

स्विष्टमग्नेति मन्त्रेण जुहुयात्तदनन्तरम्॥ 80

कृत्वान्ते तु यदस्येति स्विष्टकृश्चैव हूयते।

पूर्वेण दक्षिणे चैव पश्चिमेचोत्तरे तथा॥ 81

In Public domain. Digitization Muthulakshmi Research Academy

प. 39 T. 30

ईशान्यां चैव होतव्यं कुण्डे वा स्थण्डिलेऽपि वा।

एवं कृते महाशान्ति राजराष्ट्रसुखावहम्॥ 82

इन्द्रग्धनश्चन्द्रदृष्टाश्च तद्दोषशमनाय च।

- - - - - - - - - - - -

एवमेव क्रमं हुत्वा वस्त्राङ्गुलीयकादिभिः॥ 83

अग्निकार्यं मया प्रोक्तं नित्योत्सवमथ शृणु।

इति वीरतन्त्रे षट्सहस्रसंहितायां

अग्निकार्यविधिः एकोनचत्वारिंशत्-

पटलः॥

In Public domain. Digitization Muthulakshmi Research Academy

पटलः40

॥ नित्योत्सवविधिपटलः॥

लोकनाथं प्रणम्यादौ ब्रह्मा वचनमब्रवीत्।
नित्योत्सवं कथं देव तत्सर्वं ब्रूहि मे प्रभो॥ 1
श्रूयतामभिधास्यामि नित्योत्सवं विशेषतः।
सर्वपापहरं पुण्यं सर्वलोकसुखावहम्॥ 2
सर्वशान्तिकरं चैव सर्वारिष्टविनाशनम्।
नित्यं नित्यार्चनान्ते तु नित्योत्सवमथाचरेत्॥ 3
राक्षसाश्च सुराश्चैव पिशाचब्रह्मराक्षसाः।
उच्चुष्मां चैव वेताला कूष्माण्डाह तथागतम्॥ 4
तथा मारग्रहाश्चैव भूताश्चान्ये मरुद्गणाः।
नित्योत्सवस्य शब्दांश्च श्रुत्वा गच्छन्ति तत्र वै।

In Public domain. Digitization Muthulakshmi Research Academy

प. 40.

प्रथमं दक्षिणं विप्र तव प्रीतिकराय वै।

द्वितीयं प्रदक्षिणं चैव विष्णुप्रीतिकराय च॥ 66

तृतीय प्रदक्षिणं चैव मम प्रीतिकराय वै।

पूर्वाह्णे च तव प्रीति पुष्पलिङ्ग समन्वितम्॥ 77

मध्याह्ने चान्नलिङ्गं तु मम प्रीतिकरं महत्।

P.90. सायं तण्डुललिङ्गस्यान्नारायणप्रियं तथा॥ 8 8

स्थितलिङ्गे तु विप्रेन्द्र श्रीबलिं चैव कारयेत्।

चललिङ्गेषु सर्वेषु श्रीबलिं च न कारयेत्॥ 99

? आढकादीधीन नैमेवद्यं श्रीबलिं च न कारयेत्।

एवमेव क्रमेणैव नित्योत्सवन्तु कारयेत॥ 1010

In Public domain. Digitization Muthulakshmi Research Academy

प. 40.

सौवर्णं रजतं वापि ताम्रं वा कांस्यमेव वा।
बलिपात्रं तु कर्तव्यं लक्षणेन समन्वितम्॥११॥ ११
मात्राङ्गुलेन कर्तव्यं द्वितालमुत्तमं भवेत्।
एकतालेन हीनं तु मध्यमं पात्रमुच्यते॥ १२ १२
द्वियङ्गुलेन हीनं तु मध्यमं पात्रमुच्यते।
त्रिपात्रं चैव त्रिधाभज्यं मध्ये पद्मं तु कारयेत्॥१३
ओष्ठमध्याङ्गुलेनैव कारयेत्तु विचक्षणः।
पद्मस्योत्सेधमानं तु एकाङ्गुलमिहोच्यते॥ १४
अष्टपत्रसमायुक्तं विद्येशान्तत्र देवतान्।
एवमेव क्रमेणैव बलिपात्रं तु कारयेत्॥ १५

In Public domain. Digitization Muthulakshmi Research Academy

प. 40

पूर्वोक्तेन विधानेन चरुं चैव तु पाचयेत्।

द्विप्रस्थमधमं प्रोक्तमाढकं मध्यमं भवेत् ॥16 16

उत्तमं शिवमेवाहु श्शालीनां चैव पाचयेत्।

अत्युष्णमतिशीतं च आम्लं लवणवर्जितम् ॥17 17

पाषाणं व्याधितश्चैव शोकदं तुषमेव च।

कर्णकम्बुसमायुक्तं मारणं तु विनिर्दिशेत् ॥18 18

एवमेव क्रमं ज्ञात्वा पाचयेद्विधिपूर्वकम्।

शिवाग्रे मण्डपं कृत्वा मण्डपस्योत्तरे दिशि ॥19 19

गोमयेनोपलिप्याथ बलिपात्रन्न्यसेद्बुधः।

प्रोक्षयेदस्त्रमन्त्रेण कुशेनैव तु वारिणा ॥20 20

In Public domain. Digitization Muthulakshmi Research Academy

प.40

चरुं वै हृदयेनैव बलिं पात्रे तु विन्यसेत्।

क्षीरं वा दधिसंयुक्तं आज्येनैव समायुतम्॥21

संमिश्रं तु समग्रान्नमन्नलिङ्गं तु कारयेत्।

अष्टाङ्गुलं तु चोत्सेध द्व्यङ्गुलन्तस्य नाहकम्॥22

अग्रनाहं षडङ्गुलय मानुपूर्वात् क्षयत् भवेत्।

अधमलिङ्गमित्युक्तं मध्यमं तु ततः शृणु॥ 23

दशाङ्गुलं तु चोत्सेध द्विगुणं तस्य मूलकम्।

अग्रमष्टाङ्गुलं नाहमुत्तमं शृणु तत्त्वतः॥ 24

द्वादशाङ्गुलमुत्सेध द्विगुणं मूलनाहकम्।

अग्रं दशाङ्गुलं नाहमन्नलिङ्गमिहोच्यते॥ 25

In Public domain. Digitization Muthulakshmi Research Academy

प. ४०

P.91 त्र्यक्षं चतुर्भुजं रौद्रमूर्ध्वकेशं सुदंष्ट्रकम्।

दक्षिणे तु करे शूलं वामे पाशं तथैव च॥ २६

अभयं दक्षिणं हस्तं वामहस्तं कटिलक्ष्मम्।

पद्म (म?) ध्ये स्थितं देवं सर्वाभरणभूषितम्॥ २७

एवं स्वरू (प?) कं ध्यात्वा बलिलिङ्गे तु विन्यसेत्।

गन्धैः पुष्पैश्च धूपैश्च दीपैश्चैव तु पूजयेत्॥ २८

गन्धं हृदयमन्त्रेण शिखायां पुष्पमुच्यते।

सौवर्णं रजतं ताम्रं मृण्मयं वापि कारयेत्॥ २९

हस्तमात्रं भवेद्दण्डमग्रे चक्रद्वयं भवेत्।

एवं लक्षणसंयुक्तं दण्डहस्तौ विचक्षणः॥ ३०

In Public domain. Digitization Muthulakshmi Research Academy

प. 40

प्रोक्षयेदम्भसा चैव हृदयेन तु मन्त्रतः।

ईशानमूर्ध्नि विन्यस्य मुखं तत्पुरुषं न्यसेत्॥31

अघोरं हृदये न्यस्य गुह्ये वामं प्रकल्पयेत्।

सद्योजातं न्यसेत्पादौ पुनरङ्गानि विन्यसेत्॥32

हृदयं हृदये न्यस्य शिरश्शिरसि विन्यसेत्।

शिखां शिखायां विन्यस्य कवचं स्तनमध्यतः॥33

अस्त्रं हस्तप्रदेशे तु नेत्रं नेत्रे तु विन्यसेत्।

सर्वाङ्गेषु च विप्रेन्द्र अस्त्रमन्त्रं न्यसेत्ततः॥34

स्थालिकाञ्चैव चोद्धृत्य हृदयेन तु मन्त्रतः।

शिरोमन्त्रेण संयुक्तं तस्यां शिरसि निक्षिपेत्॥35

In Public domain. Digitization Muthulakshmi Research Academy

प. 40

जपेत्पाशुपतास्तं च शनैर्गच्छेत्प्रदक्षिणम्।
न तिष्ठन्तन्न शीघ्रञ्च गच्छेत्पदे पदे ततः॥ 36
पुरस्तात्प्रतिमं गच्छेत् लिङ्गं तु तदनु व्रजेत्।
आयान्तु पृष्ठतो वापि पादुकञ्च व्रजेत्ततः॥ 37
शिवस्याभिमुखं चैव गोमयेनानुलेपयेत्।
भेरीं तत्रैव विन्यस्य हृदयेन तु मन्त्रतः॥ 38
गन्धपुष्पादिनाभ्यर्च्य वाद्यकं पूजयेत्ततः।
वाद्यकान्वादयेत्तत्र पञ्चध्वनिसमायुतम्॥ 39
अघिरं गानवञ्चैव शब्दभेदं तथैव च।
तन्त्रीकृत ततो वाद्यं पञ्चध्वनिरिहोच्यते॥ 40

In Public domain. Digitization Muthulakshmi Research Academy

प. ४०

एवं विधिसमायुक्तं वाद्यकान्वादयेत्ततः।

प्रथमं दक्षिणं कुर्या म्मणि ताळवाद्यकम्॥ 41

द्वितीयं दक्षिणं कुर्यादष्ट ताळसमन्वितम्।

पूर्वे तु समहस्तं स्यात् दाग्नेय्यां भृगिणी तथा॥ 42

P. 92. दक्षिणे कट्टवाद्यं स्यान्नैर्ऋत्यां संकरी तथा।

वारुण्यामुत्कटश्चैव वायव्यां कुब्जतालकम्॥ 43

?(वारुण्यामुत्करी तथा)

प्रहारं सौम्यायामैशान्याम्मल्ल ताळकम्।

गोपुरे वाद्य निश्शब्दं शङ्ख ध्वनि समायुतम्॥ 44

बाह्यपीठे क्रमावृत्य प्रासादं त्रिप्रदक्षिणम्।

त्रिविधं बलिपीठं स्यात् पूर्वतश्चैव दक्षिणे॥ 45

In Public domain. Digitization Muthulakshmi Research Academy

प. ५०

पश्चिमे वा त्रिसन्ध्यायां पदक्षिणमथाचरेत्।
पूर्वाह्णे पूर्वपीठे तु मध्याह्ने दक्षिणे तथा॥ 46
सायाह्ने पश्चिमे चैव बलिमेवं विसर्जयेत्।
अथवा चाग्रपीठे तु दक्षिणं बलिरुच्यते॥ 47
सर्वद्वारे तु कर्तव्यं पूर्वे तु बलिपीठकम्।
इन्द्रस्य बलितालन्तु अग्नेर्मध्यवर्णं भवेत्॥ 48
यमस्य भृङ्गिणी तालं नैर्-ऋत्यां मल्लतालकम्।
वारुण्यान्नवतालन्तु वायव्यान्नागतालकम्॥ 49
सौम्ये च कोटिका प्रोक्ताः ईशान्यण्डकरी तथा।
एवमेव क्रमेणैव प्रासाद .... त्रिप्रदक्षिणम्॥ 50

In Public domain. Digitization Muthulakshmi Research Academy

प. ४०

गायं गान्धारपूर्वं स्यात् दक्षिणे कौशिकं तथा।
पश्चिमे कामरञ्चैव तथरागन्तथोत्तरे ॥ ५१।
आग्नेय्याञ्चैव कोल्लीच नैर्ऋत्यान्नाट्टभाषया।
तक्केशी वायुदिक्भागे श्र्याळा पाणीशगोचरेत् ॥ ५२
द्वारदेशमनुप्राप्य पादुकार्चनमारभेत् *।
पादप्रक्षाळनं कृत्वा पादुकं पूजयेत्ततः ॥ ५३
देवस्य सान्निधौ विद्वान् मण्डलं कारयेत्ततः *।
त्रिपादीं तत्र संस्थाप्य वृषभस्याधिदैवतम् ॥ ५४
पादुकाँ विन्यसेत्तत्र प्रोक्षयेदम्भसा ततः।
निर्माल्यं च विसृज्याथ जलेचैवाभिषेचयेत् ॥ ५५

In Public domain. Digitization Muthulakshmi Research Academy

प. ४०

हृदयेन तु मन्त्रेण गन्धं दद्याच्च पादुके।

प्रोक्षयेदम्भसा चैव कुशाया सर्व देशिकः॥ 56

पुष्पं तु शिरसा चैव धूपं वामेन दापयेत्।

अघोरेण दीपं स्यात् सद्येनार्घ्यं तु दापयेत्॥57

अर्चयेत्पादुकौ विद्वान् - - - - - - द्वयोः।

धरत्रींश्चैव पूर्वे तु धरणीं दक्षिणेन तु॥ 58

पृथिवीं पश्चिमे न्यस्य मेदिनीं चोत्तरे न्यसेत्।

वामा ज्येष्ठा च रौद्री च काली कलविकरणी तथा॥59

P.93 बलविकरणीं बलप्रमथिनीं सर्वभूतमनोन्मनीम्।

पूर्वादीशानपर्यन्तं विन्यसेदष्टशक्तिभिः॥ 60

In Public domain, Digitization Muthulakshmi Research Academy

प. 40

मनोन्मनी न्यसेन्मध्ये अर्चयेत् गन्धपुष्पकैः।

प्रविशेद्गालयं तत्र विन्यसेत् पूर्वमण्डले ॥ 61

विवर्जयेस्तु चास्त्रेण नमस्कारं तु कारयेत्।

तदन्ते कारयेन्नृत्तं भरतोक्तेन मार्गतः॥ 62

गणिका स्नापयेत्तत्र गन्धपुष्पादिनार्चयेत्।

तदग्रे मण्डलं कृत्वा शिवं संपूजयेत्ततः॥ 63

तस्य दक्षिणपार्श्वे तु ब्रह्माणं पूजयेत्ततः।

मध्ये न लङ्घयेत्तत्र लङ्घनार्त्तं स्नपनं भवेत् ॥ 64

अष्टोत्तरशतं नृत्तं प्लावयेत् गणिका ततः।

नृत्तस्यान्ते तु विप्रेन्द्र देवदेवीं विसर्जयेत् ॥ 65

In Public domain. Digitization Muthulakshmi Research Academy

प. ४०

अभिमुखीकरणं यत्तु तदा वाहनमुच्यते ।

पूजापरिसमाप्तौ तु विमुखन्तद्विसर्जनम् ॥ 66

प्रदक्षिणत्रयं कृत्वा नमस्कारं तथैव च ।

? लिङ्गे सव्यापसव्यन्तु प्रासादादिषु च विसर्जयेत् ॥ 67

एवं यः कुरुते मर्त्य शिवलोकमवाप्नुयात् ।

पर्याप्तिपरिचारांश्च ततो न्यासे पितार्जना ॥ 68

शिवलोकमवाप्नोति शिवं वम्मोदते सदा ।

नित्योत्सवमिदं प्रोक्तं परिवारान् शृणुष्वथ ॥ 69

इति वीरतन्त्रे षट्सहस्रसंहितायां

नित्योत्सवविधि चत्वारिंशत्पटलः ॥

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 41

॥ परिवारलक्षणपटलः ॥

प्रणम्य शिरसा देवं पृच्छति स्म पितामहः।
परिवारं कथं देव तत् सर्वं ब्रूहि मे प्रभो ॥ 1

यत्सर्वं तु त्वया पृष्टं श्रूयतां कमलासनः।
परिवारं प्रवक्ष्यामि यथाविधिपुरस्सरम् ॥ 2

अन्तर्मण्डलके कुर्यादीशे चण्डेश्वरालयम्।
पुरतो वृषभे स्थानं स्थापयेद्वृषभं ततः ॥ 3

आग्नेय्यां चैव देशे तु दुर्गां स्थाप्य विशेषतः।
दक्षिणे मातृदेवांश्च विघ्नेशं नैरृते तथा ॥ 4

वारुण्यां स्थापयेत्तत्र कुमारं वाप्यजं भवेत्।
ज्येष्ठां वायव्यदेशे तु विष्णुं चोत्तरदेशके ॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प.4।

ऐशान्यां चैव विप्रेन्द्र भास्करं विन्यसेत्ततः।
एवम् हरि तु विन्यसेदुष्टदेवतान् ॥ 6

P.94. इदमन्यप्रकारेण वक्ष्येऽहं चतुरानन।
पश्चिमद्वारगेहस्य पश्चिमे वृषभं न्यसेत् ॥ 7

वायव्यां च वै ज्येष्ठां च सर्वयत्नेन देशिकः।
उत्तरायां दिशश्चैव दुर्गादेवीं च विन्यसेत् ॥ 8

ऐशान्यश्चैव विप्रेन्द्र क्षेत्रपालो विधीयते।
पूर्वे तु भास्करस्थानं कुमारं वह्निगोचरे ॥ 9

दक्षिणे द्वारगेहस्य दक्षिणे वृषभालयम्।
मातृस्थान नैरृत्यां सुब्रह्मण्यं तु वारुणे ॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प. 41

ज्येष्ठाञ्च वामदेशे तु - - - - - - - - - - ।

- - - - - - - - - - - - - - - विष्णुरुच्यते ।। ॥

दुर्गां चैवेश दिक् भागे भास्करं पूर्वतो न्यसेत् ।

आग्नेय्यां गणपतिं स्थाप्य विन्यसेत् तदेवतान् ।।

उत्तरद्वारगेहस्या उत्तरे वृषभालयम् ।

ऐशान्यां भास्करं न्यस्य पूर्वन्तो विष्णुरुच्यते ।।

दुर्गमाग्नेयदिक् भागे क्षेत्रपालन्तु विन्यसेत् ।

इन्द्र आग्नेययोर्मध्ये अश्विनौ द्वौ तु विन्यसेत् ।। 14

मर्यादावीशदिक् भागे याम्ये मातृगण स्थिताः ।

नैरृत्यां विघ्नराजन्तु कुमारं वारुणे भवेत् ।। 15

In Public domain. Digitization Muthulakshmi Research Academy

प.41.

वायव्यां विन्यसेज्ज्येष्ठां विशेषेण विचक्षणः।
एवमेव क्रमेणैव अन्तर्हारे तु विन्यसेत्॥16

षोडशद्वारदेवांश्च वक्ष्यामि मुनिसत्तम।
दक्षिणाग्नेययोर्मध्ये सप्तरोहिणि विन्यसेत्॥17

यमनैर्ऋतयोर्मध्ये पितृस्थानं विधीयते।
निर्ऋतिवरुणयोर्मध्ये अप्सरोगणमुच्यते॥18

वरुणवायव्ययोर्मध्ये ऋषीणां स्थानमुच्यते।
वायव्यां सोमयोर्मध्ये वसवोऽष्टौ च विन्यसेत्॥19

सोमं ईशानयोर्मध्ये अष्टनागं प्रकल्पयेत्।
इन्द्र ईशानयोर्मध्ये द्वादशादित्यमेव च॥20

In Public domain. Digitization Muthulakshmi Research Academy

प. 41
एवमेव प्रकारेण मर्यादौ च विधीयते।
अन्तम्मण्डलकेवाथ मर्यादौवा विशेषतः॥ 21
इन्द्रादीं स्थापयेत्क्षिप्रं पूर्वादीशान्त विन्यसेत्।
अनन्त दीशभागे .... ॥ 22
- - - - - - - - - - - - स्थाप्य निरृतौ तथा।
एवमेव प्रकारेण परिवाराणि विन्यसेत् ॥ 23
प्रासादभित्तिमाश्रित्य मण्डपे वा विशेषतः।
P. 95 द्वारदेवान् संस्थाप्य पूर्वादिक्रमयोगतः॥ 24
पूर्वद्वारपालौ तु नन्दिकालस्तथैव च।
नन्दिन्तु दक्षिणे स्थाप्य कालंचोत्तरदेशके॥ 25

In Public domain. Digitization Muthulakshmi Research Academy

प. 41

दक्षिणद्वारपाले तु दण्डिमुण्डिस्तथैव च।

दण्डी तु पश्चिमे स्थाप्य मुण्डी पूर्वे विन्यसेत्॥ 26

पश्चिमं द्वारपालं तु भृङ्गिणी विजयस्तथा।

भृगिणी चोत्तरे स्थाप्य दक्षिणे विजयं तथा॥ 27

उत्तर द्वारपालौ तु अनन्तं पाशुपतं तथा।

अनन्तं पूर्वत स्थाप्य पाशुपतं पश्चिमे न्यसेत्॥ 28

एवमेव क्रमेणैव स्थापयेद्द्वारदेवतान्।

वृषभस्याग्रतो वापि पृष्ठतो वा विशेषतः॥ 29

शूलस्थानं प्रकल्प्याथ तदग्रे पुष्पपीठके।

— — — — — — — — — — — — — — — म॥ 30

In Public domain. Digitization Muthulakshmi Research Academy

प. 41

मर्यादौ च स्थापयेत्तु ... शिवाग्रतः।

महामर्या महापीठे स्थापयेद्देशिकोत्तमः॥3।

परिवारविधिः प्रोक्तं रक्षादीपं शृणुष्वथः।

इति वीरतन्त्रे षट्सहस्रसंहितायाँ

परिवारलक्षण एकचत्वारिंशत-

पटलः॥

In Public domain. Digitization Muthulakshmi Research Academy

पटलः ४२

॥ रक्षादीपम् ॥

प्रणम्य शिरसा देवं परिपृच्छत पितामहः।
रक्षादीपं कथं देव तत्सर्वं ब्रूहि मे प्रभो ॥ 1

यत्सर्वं तु त्वया पृष्टं तत्सर्वं शृणु पद्मज।
रक्षादीपं विशेषेण त्रिविधञ्चोत्तरे मया ॥ 2

शान्तिकं पौष्टिकञ्चैव कामदञ्च त्रिधाभवेत्।
सौवर्णं रजतं वापि ताम्रं मृण्मयं तु वा ॥ 3

स्थालिका प्रकर्तव्यां त्रिंशदङ्गुलविस्तरम्।
पूर्वञ्च दक्षिणञ्चैव पश्चिमञ्चोत्तरं तथा ॥ 4

मध्यमे तु समायुक्तं पञ्चकुम्भानि विन्यसेत्।
अष्टाङ्गुल समुत्सेध ------- भवेत् ॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 42

कुम्भोर्ध्वे दीपसंस्थाप्य शिल्पिना कारयेत्ततः।
पादं चैव दशाङ्गुल्यमुत्सेधन्तु विधीयते॥ 6
विस्तारं तावदेवाहु दीपपात्रं च कारयेत्।
- ॥ 7
- - - - - संयोज्य रक्षादीपं तु कारयेत्।
ऽतच्छान्तिकमित्युक्तं पौष्टिकं च ततः शृणु॥ 8
P. 96. विस्तारं तु चतुर्विंशदङ्गुल्या स्थलिता भवेत्।
शालिपिष्ट - - - - - - - - - - - - - ऽवत्॥ 0
- - - पौष्टिकमित्युक्तं कामदं च ततः शृणु।
स्थलिकां पूर्ववत् कृत्वा सप्तपात्रं च विन्यसेत्।

In Public domain. Digitization Muthulakshmi Research Academy

प. 42

सप्तपात्र नके तेषामूर्ध्वे - - - - - तत्तथा।

ऽतत्कामदमित्युक्तं त्रिविधं प्रोच्यते मया॥ ॥

नान्दिन्या - - - - - - - - - - - - - - ।

- - - - - - - - - - ने कुर्यात्तस्यान्त दीपमुच्यते॥ 12

सा सायह्ने शयने कुर्याद्यक्षेश्वरीं च पूजयेत्।

नित्याग्निकुण्डे विप्रेन्द्र - - - - - - - दीपयेत्॥ 13

तस्य दक्षिणभागे तु मण्डलं चतुरश्रकम्।

स्थलिकां विन्यसेत्तत्र शिखामन्त्रेण संयुतम्॥ 14

गोघृतेन समायुक्तां तिलतैलेन वा पुनः।

वर्त्तिन्तत्रैव - - - - - - - - - - - - - - ॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

प. 42

- - - - - - - - - - - - - - - - - ग्नौ दीपयेत्ततः।

प्रासादेन तु मन्त्रेण मध्यमे दीपमुच्यते॥ 16

पूर्वे तु पुरुषंचैव अघोरं दक्षिणेन तु।

सद्यं पश्चिमतो न्यस्य वामदेवं तु चोत्तरे॥ 17

ईशानेन तु मन्त्रेण व्योमव्यापि समायुतम्।

पूजयेत्तु विशेषेण शिरसोपरि धापयेत्॥ 18

गणिका दासीं वा धारये दीप मुत्तमम्।

मन्त्र गेय समायुक्तं गणिकानृत्तसंयुतम्॥ 19

- - - - - - - समायुक्तं शङ्खध्वनिसमायुतम्।

भेरीमृदङ्गवाद्यैश्च स्तोत्रशब्दसमन्वितम्॥ 20

In Public domain. Digitization Muthulakshmi Research Academy

प. 42

गेहप्रदक्षिणं तत्र निनयेच्छिवसान्निधौ ।

त्रिपादीमध्यमे न्यस्य संप्रोक्ष्यास्त्रेण वारुणा ॥ 21

ईशानेन तु मन्त्रेण अर्चयेद्दीपमेवच ।

पुष्पेण दीपसंयोज्य लिंग मूर्ध्निचं वर्त्तयेत ॥ 22

एकं वापि त्रयं वापि प्रदक्षिणमथाचरेत् ।

विसर्जयेत्तु निर्माल्यं बाह्यपीठे तु विन्यसेत् ॥ 23

एतच्छान्तिक मित्युक्तं पौष्टिकंच ततः शृणु ।

शिवाग्रे मण्टपं कुर्यात् द्वीपन्तत्रैव विन्यसेत् ॥ 24

विन्यासे स्थालिकां तत्र हृदयेन तु मन्त्रतः ।

पिष्टं नामेन संस्थाप्य प्रोक्षयेत्तु हृद् तथा ॥ 25

In Public domain. Digitization Muthulakshmi Research Academy

प. 42

गर्भगेहे स्थिते दीपे वर्त्तिं ----- संयोजयेत्।

P.97. पूजयेदस्त्रमन्त्रेण प्रोक्षयेदम्भसा ततः॥ 26

हृदयेन तु मन्त्रेण दीपं दद्याच्छिवस्य तु।

एकं वापि त्रयं वापि लिङ्गं चैव प्रदक्षिणम्॥ 27

विसर्जयेत्ततो मन्त्री भस्मं शिरसि निक्षिपेत्।

शिवस्य रक्षा कुर्वीत सर्वप्राणि हिताय च॥ 28

एवं पौष्टिकमेवाहुः कामदं शृणु तत्त्वतः।

अग्निकुण्डेऽथवा कुर्यात् गर्भगेहेऽपि वा पुनः॥ 29

सप्तपात्रे तु विप्रेन्द्र दीपं संयोजयेत्ततः।

पौष्टिकस्य क्रमेणैव कुर्याद्वै देशिकस्तथा॥ 3

In Public domain. Digitization Muthulakshmi Research Academy

शिवदीपं सुसंयोज्य विसर्जयेत्तु वामतः।
एतत्कामदमित्युक्तं समासात्कथयामि ते॥ 31
उत्तमं दीपमाख्यातं सप्ताङ्गुलसमुच्छ्रयम्।
पञ्चाङ्गुलं तु मध्यं स्यात्त्र्यङ्गुलमधमोच्छ्रयम्॥ 32
उत्तमं गोघृतं चैव मध्यम - - - त्वजसंभवेत्।
अधमं तैलमेवाहु र्वं घृतन्तु कारयेत्॥ 33
दू?
दूर्वाक्षतैश्च संयुक्तं दर्पणं भस्ममेव च।
पाद्यमाचमनं चार्घ्यं गन्धपुष्पं च धूपकम्॥ 34
दीपस्य दर्शनादूर्ध्वं शिवे दद्याद्विशेषतः।
रक्तेश्वरीस्वरूपं तु गृणुष्व कमलासन॥ 35

In Public domain. Digitization Muthulakshmi Research Academy

प-42

यान्तेनैव समायुक्तमोंकारस्वरसंयुतम्।

ओंकारादिनमोऽन्तं च मध्ये यक्षेशि बीजकम्॥ 36

एतन्मन्त्रं परं गुह्यं तव स्नेहात् प्रकाशितम्।

द्विभुजं चैकवक्त्रं च द्विपादं च द्विनेत्रकम्॥ 37

करण्डं मकुटं युक्तं सौम्यरूपं सुलोचनम्।

दीपमध्ये न्यसेद्देवीमञ्जल्या च ननमस्कृतम्॥ 38

एवं विधं स्वरूपं तु ध्यात्वा वै पूजयेत्ततः।

वामा ज्येष्ठा च रौद्री च काली कलविकरणी॥ 39

बलविकरणी प्रमथनी सर्वभूतदमन एव च।

पूर्वादीशानपर्यन्तं पूजयेत् गन्धपुष्पकैः॥ 40

In Public domain. Digitization Muthulakshmi Research Academy

प. 42

मध्ये मनोन्मनी न्यस्य पूजयेद्देवि बाह्यता।
सोमाङ्गारबुधश्चैव जीवशुक्र शनैश्वरान्॥ 41
राहुकेतुश्च विप्रेन्द्र तत् बाह्ये पूजयेत्ततः।
इन्द्रश्चाग्निर्यमश्चैव निर्ऋति र्वरुण वायुच॥ 42
सोमेशान समायुक्तं तद्बाह्ये पूजयेत्ततः।
एवमेव क्रमेणैव स्वस्वनामैश्च पूजयेत्॥ 43
एवमेव क्रमेणैव यक्षेश्वरीं च पूजयेत्।
भस्मन्दद्याच्छिवे तत्र दद्या(स)च्छेषञ्जनायच॥ 44
सायाह्ने शमये कुर्यादेवमेव क्रमेण तु।
परिवेषेण काले तु रक्षादीपं करोति भिः॥ 45

In Public domain. Digitization Muthulakshmi Research Academy

सर्वपापविनिर्मुक्तः शिवलोकमवाप्नुयात्।

रक्षादीपं मया प्रोक्तं अङ्कुरार्पणकं शृणु॥ 46

इति वीरतन्त्रे रक्षादीपविधि-

द्विचत्वारिंशत्पटलः॥

In Public domain. Digitization Muthulakshmi Research Academy

प. ४३

॥ अङ्कुरार्पणपटलः ॥

प्रणम्य शिरसा देवं पृच्छति स्म पितामहः।
अङ्कुरार्पणकं को वा तत्सर्वं ब्रूहि मे प्रभो॥ 1
मङ्गळां कुरु कर्मन्तु यत्त्वया परिचोदितम्।
तत्सर्वमखिलं वक्ष्ये शृणुष्व कमलासन॥ 2
प्रथमं ध्वजाङ्कुरं ज्ञेयं द्वितीयं चोत्सवाङ्कुरम्।
उत्सवाङ्कुरमेवोक्तं तृतीयं तु विशेषतः॥ 3
तीर्थाङ्कुरं तु चतुर्थं स्यात् चण्डाङ्कुरं तु पञ्चमम्।
अथवा त्र्यङ्कुरं विद्याद्ध्वजाङ्कुरन्तु चाच्यते॥ 4
तीर्थाङ्कुरसमायुक्तं मङ्कुराङ्कुरमुच्यते॥।
स्थापने प्रोक्षणे यागे उत्सवे स्नपनेऽपि च॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 43

अन्ये च मङ्गलाँ कुर्ये मङ्गलांकुरमुच्यते ।
श्रीकरं श्रीनिवासं च श्रीप्रदं च त्रिधा भवेत् ।। 6
पूर्वाग्रन्तु चतुस्सूत्रमुत्तराग्रं तथैव च ।
कृत्वा नवपदं तत्र देवतांश्च शृणुष्वथः ।। 7
पदे पूर्वे तु ऋग्वेदं आग्नेय्यां तेज उच्यते ।
दक्षिणे तु यजुर्वेदमुकाशश्चैव नैरुते ।। 8
पश्चिमे तु पदे चैव सामवेदं तथैव च ।
वायव्ये पवनश्चैव अथर्व सोमके पदे ।। 9
आपश्चैव तु ईशान्यां मध्ये व्रीमि प्रतिष्ठितम् ।
मध्यमे तु पदे चैव सोमकुम्भ प्रतिष्ठितम् ।। 10

In Public domain. Digitization Muthulakshmi Research Academy

प.43

घटिका दिक्षु विन्यस्य पालिकाच विदिक्षु वै।

एतत् श्रीकरमित्युक्तं श्रीनिवासमतः शृणु॥ 11

पूर्वाग्रं पञ्च सूत्रं स्यादुत्तराग्रं तथैव च।

षोडशान्पदमेवाहुर्दैवपादं शृणुष्वथ॥ 12

ईशो जयन्त आदित्य अग्निश्च वितथो यमः।

सुग्रीवो वरुणश्शोष मुख्य सोमादितिस्तथा॥ 13

ब्रह्मा चतुष्पदे चैव मध्यमे तु व्यवस्थिता।

ईशाग्निश्चैव सुग्रीवो मुख्यस्य तु पदानि च॥ 14

P.99. पालिकां विन्यसेत्तत्र घटिकास्थानमुच्यते।

जयन्तो विजयश्चैव वरुणस्सोम एव च॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

प. 43

घटिकास्थानमेवोक्तं शरावस्थानकं शृणु।
आदित्यश्च यमश्चैव शोषश्चैव दि मध्यमे ॥ 16
सोमकुम्भं तु परितो परितो द्वादशान्यसेत् ॥
ऽतद्वै श्रीनिवासं तु श्रीप्रदश्च शृणुष्वथ ॥ 17
षट्सूत्रं चैव पूर्वाग्रमुत्तराग्रं तथैव च।
पञ्चवित् षट्पदं कृत्वा पूजयेत् क्रमशस्तथा ॥ 18
ईशो जयन्त आदित्यो भु··· अग्निर्निर्वितथो यमः।
स्वभृङ्गश्च ग सुग्रीवो वरुणश्शोषमारुतौ ॥ 19
मुख्यस्सोमो दितिश्चैव बाह्यदेवा प्रकीर्तिताः॥
आपवत्सार्यसावित्री विवस्वानिन्द्र मित्रका ॥ 2
रुद्रोशो भूतरश्चान्तर्मध्ये ब्रह्माणमुच्यते ॥
ब्रह्माणस्य पदे चैव स्थापयेत् सोमकुम्भकम् ॥ 2

In Public domain. Digitization Muthulakshmi Research Academy

प. 43

ईशानश्च जयन्तश्च अग्निश्च वीतथास्तथा।

पितृ दौवारिकश्चै -- मरुतश्चैव मुख्यकः॥ 22

पालिका विन्यसेत्तत्र शरावश्च शृणुष्वथ।

आदित्यश्च वृथश्चैव यमश्चैव तु भृङ्गराट्॥ 23

वरुणश्चैव शोषश्च सोमश्च अदितिस्तथा।

शरावां विन्यसेत्तत्र घटिकांश्च शृणुष्वथ॥ 24

आपश्चैवापवत्सादि देवाश्चौ स्थानमुच्यते।

लक्षणं संप्रवक्ष्यामि शृणुष्व चतुरानन॥ 25

सौवर्णं राजतं ताम्रं मृण्मयं वापि कारयेत्।

मात्राङ्गुलेन कर्तव्यं पालिकादीनि चैव हि॥ 26

In Public domain. Digitization Muthulakshmi Research Academy

प. 43

पालिकामुख विस्तारं विंशत्यङ्गुलमुत्तमम।
षोडशाङ्गुलमध्यं स्याद्धमन्त्र दशाङ्गुलम्।। 2
विस्तारणे समोत्सेधन्तदर्धं पादविस्तरम्।
परितोऽष्टौच विप्रेन्द्र षड्भागैकमिति स्मृतम्।। 2
मध्यमे वलिसंयुक्तं दर्पणोकुरवत्कृतम्।
घटस्योत्सेधमानं तु पालिकासममेव च।। 2C
घटस्योदरविस्तार द्वादशाङ्गुलमुच्यते।।
वक्त्रं चैव षडङ्गुलयं पञ्चवक्त्र समन्वितम्।। 3C
पालिकापादवत्कुर्यात घटलक्षणमुच्यते।।
वक्त्रं चैव षडङ्गुलयं पञ्चवक्त्र समन्वितम्।। 3

In Public domain. Digitization Muthulakshmi Research Academy

प. 43

अष्टाङ्गुलं तु विस्तारं शरावस्य मुखे भवेत् ।

P.100 तदर्धं पादविस्तारं त्रिपादं वा समुच्यते ॥ 32

भेदश्छेदश्च काकश्च सुषिरश्च विवर्जयेत् ।

घटिका ब्रह्मदैवत्यं पालिका विष्णुरुच्यते ॥ 33

शरावस्येश्वरं प्रोक्तमित्येते अधिदेवता ।

चतुर्विंशति संख्याच्च उत्तमं तु विनिर्दिशेत् ॥ 34

पालिका षोडशश्चैव मध्यमं तद्विनिस्पृशेत् ।

पालिका चाष्टसंयुक्तमधमन्तमिहोच्यते ॥ 35

उत्सवस्यादिरात्रा संख्याच्च बीजनिर्वापमुच्यते ।

पञ्चमे वा शिलं यजेत् ॥

नवमे सप्तमे वापि ~~त्रिशूलेन समन्वितम्~~ ॥ 36

In Public domain. Digitization Muthulakshmi Research Academy

प. 43

बीजानामधिपस्सोमस्तस्मात्तु निशि वापयेत्।
ग्रामप्रदक्षिणं कुर्यात् बीजनिर्वापमुच्यते॥ 37
नवमे सप्तमे वापि त्रिशूलेन समन्वितम्।
प्रतिमेन समायुक्तं चण्डेशेन समन्वितम्॥ 38
मदन्ते पालिकादीनि धारयेच्छिवभक्तकान्।
प्राङ्मुखो दङ्मुखो वाथ दक्षिणे वा विशेषतः॥ 3
सुशाद्धभूतलं प्राप्य प्रोक्षयेच्छुद्धवारिणा।
पुण्याहं वाचयित्वा तु अर्चयेद्धृदयेन तु॥ 40
कुन्दालीञ्चैव संपूज्य हृदयेन तु मन्त्रतः॥
हृदयेन तु मन्त्रेण खानयेद्देशिको भुवि॥ 41

In Public domain. Digitization Muthulakshmi Research Academy

प० ४३

मृदं संग्राह्य आमेन वामेन मृतमर्चयेत् ।

सर्वातोद्यसमायुक्तं प्रविशेदालयं प्रति ॥ 42

प्रासादस्याग्रतो वापि ईशाने दक्षिणेऽथवा ।

उत्तरे वापि विप्रेन्द्र गोमयेनानुलेपयेत् ॥ 43

अष्टद्रोणेन शालिः स्यात् स्थण्डिलं कारयेत्ततः ।

पद्ममष्टदलं विरच्य प्रोक्षयेद्धृदयेन तु ॥ 44

मध्यमे सोमकुम्भन्तु विन्यसेत् सोमबीजकैः ।

सकूर्चं साहिरण्यं च सवस्त्रं वारिपूरितम् ॥ 45

गन्धपुष्पादिनाभ्यर्च्य नैवेद्यं दापयेत् ततः ।

तद्बाह्ये पूर्ववि न्यस्य पालिकादीनि सर्वशः ॥ 46

In Public domain. Digitization Muthulakshmi Research Academy

प. 43

दर्भेण सुषिरं न्यस्य मृदं तत्रैव पूरयेत्।

गोमयेन समायुक्तं पूजयेद्धृदयेन तु ॥ 47

पुण्याहं तत्र कुर्वीत ताम्बूलं दापयेत्ततः।

मुद्गमाषकुळुत्थं च तिलनीवारमेव च ॥ 48

निष्पावशिम्बसंयुक्तमपामार्गञ्च सर्षपम्।

श्यामगोधूमसंयुक्तं यववेणुं तथैव च ॥ 49

P. 101 पयसा क्षाळयेत्तत्र हृदयेन तु मन्त्रतः।

प्राङ्मुखोदङ्मुखो वापि आचार्यो मन्त्रविग्रहः ॥ 50

वापयेच्छिवमन्त्रेण शिवभक्तास्तु वापयेत्।

रुद्रगणिका दासी च वापयेत्तु विशेषतः ॥ 51

In Public domain. Digitization Muthulakshmi Research Academy

प. ४३

सोमाधिदेवतान् कुम्भान् परिषिच्य ततो जलम्।

पालिकादीनि सर्वाश्च वातातपविवर्जिते॥ 52

सुगुप्तदेशे संस्थाप्य सोमकुम्भेन संयुतम्।

तद्दिनादीनि तीर्थान्तं सोमराजस्य देशिकः॥ 53

हविर्निवेदयेत्तत्र ताम्बूलं दापयेत्ततः।

कृष्णसूत्रनिभं चेत्तु प्रासादेन शताहुतिः॥ 54

होमयेच्चैव विप्रेन्द्र अपूपानि तथैव च।

एवमेव क्रमेणैव अङ्कुरार्पणमुच्यते॥ 55

अङ्कुरार्पणहीने तु राजराष्ट्रस्य दोषकृत्।

तस्मात् सर्वप्रयत्नेन कुर्यान्मङ्गलाङ्कुरम्॥ 56

एवं यः कुरुते मर्त्यः शिवलोकमवाप्नुयात्।

अङ्कुरार्पणमेवोक्तमुत्सवस्य विधिं शृणु॥ 57

इति वीरतन्त्रे बट्—यां

अङ्कुरार्पणविधिः त्रिचत्वारिंशत्पटलः।

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 44

॥ उत्सवविधिपटलः ॥
(ध्वजारोहणविधिः)?

प्रणम्य शिरसा देवं पृच्छन्ति सु पितामहः।

उत्सवस्य विधिः को वा तत्सर्वं ब्रूहि मे प्रभो॥ 1

उत्सवं यत्त्वया पृष्टं तव स्नेहाद्विशेषतः।

तत्सर्वमखिलं वक्ष्ये शृणुष्व कमलासन॥ 2

सवो दुःखस्समाख्यातस्सर्वसंपत्तिवारणम्।

उद्गतन्तु स चो यस्मात् तस्मादुत्सवमुच्यते॥ 3

दीक्षान्तेच प्रतिष्ठान्ते प्रोक्षणान्ते तथैव च।

ज्वरमार्याप्रकर्त्तन्तु शत्रूणां पीडनेऽपिच॥ 4

धनधान्यसमृद्धाय क्षामक्षयकराय च।

सर्वेषामिष्टकाम्यार्थं सर्वव्याधिविनाशनम्॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. ४५

ष्वेषु कालेषु कुर्यात्तु उत्सवं विधिना युता।
द्विविधमुत्सवं चैव तयोस्तेदं शृणुष्वथ॥ 6
मार्गशीर्षमासे तु आर्द्रान्तं स्याच्छिवोत्सवम्।
पुष्यमासे तु पुष्यान्तं माघमासे मघान्तकम्॥ 7
फाल्गुने चोत्तरान्तं स्यात् चैत्रे चित्रान्तमुच्यते।
वैशाखे तु विशाखान्तं मूलान्तं ज्येष्ठमासके॥ 8
आषाढे चोत्तराषाढं श्रावणे श्रवणान्तकम्।
P.102 पूर्वाषाढे तु मेवोक्तं पूर्वभद्रेति मासकम्॥ 9
अश्वयुक्यव मासे तु अश्विन्यान्तं तु कारयेत्।
कार्तिके कार्तिकान्तं तु कारयेत्तु शिवोत्सवम्॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प. 44

सर्वमासेषु कर्तव्यमुद्रान्तं शिवोत्सवम्।

राज्ञां जन्मदिनान्ते वा ग्रामनक्षत्रमेव वा॥ ।1

कर्तुर्जन्मनक्षत्रे कुर्यादुत्सव मुच्यते।

शैवं गौणं विभूतिञ्च भौवनं दैविकं तथा॥ ।2

पञ्चभेदेन कर्तव्यं शिवोत्सवविधिक्रमम्।

एतेषां भेदकं वक्ष्ये शृणुष्व कमलासन॥ ।3

शैव भेदं समाख्यातमेकाहमुत्सवं ततः।

त्रियहेन समायुक्तं गौणमित्यभिधीयते॥ ।4

पञ्चाहं भौतिकं प्रोक्तं सप्ताहं भौवनं स्मृतम्।

नवाहेन समायुक्तं तद्दैविकमिति स्मृतम्॥ ।5

In Public domain. Digitization Muthulakshmi Research Academy

प. 44

सूर्यवारे .. कुर्यात्तु पानोत्सवमिति स्मृतम्।
शनैश्चरस्य वारे तु तथा क्रमिकमुच्यते॥ 16
उत्सवं बुधवारे तु मार्त्ताण्डीयमिति स्मृतम्।
ऽतेषां तु क्रमाणां तु वक्ष्यते विधिनाधुना॥ 17
सायंकाले समारभ्य तत्पूर्वरात्रिसंयुतम्।
प्रातःकाले ... तीर्थं स्यादेकाहे तु बलिद्वयम्॥ 18
इदमन्यप्रकारेण मेकाहमुत्सवं शृणु।
सायंकाले समारभ्य तद्रात्रौ चाधिवासयेत्॥ 19
होमं कुर्यात्तु तद्रात्रौ तद्दिने बलिमाचरेत्।
बलिमेव, गया प्रोक्त मेकाहे चोत्सवे तथा॥ 20

In Public domain. Digitization Muthulakshmi Research Academy

प. 44

अपरे चैव विप्रेन्द्र तीर्थं कुर्यात्तु देशिकः।
एवमेव क्रमेणैव द्विविधस्येच्यते मया॥ 21

त्रियहेषु च विप्रेन्द्र सायंकाले समारभेत्।
प्रातःकाले तु तीर्थं स्यात् बलि --- प्राषंडैवतु॥ 22

एवं प्रकारेण त्रियहं रक्षते ----धुना।
सायंकाले समारभ्य तद्रात्रौ चाधिवासयेत्॥ 23

होमं कुर्यात्तु तद्रात्रौ तद्रात्रौ बलिमाहरेत्।
द्वितीयेन तु दिने चैव बलिद्वयं तु कारयेत्॥ 24

तृतीये तु दिनेचैव बलिरेक विधीयते।
बल्यन्ते चैव विप्रेन्द्र चूर्णोत्सवं तु कारयेत्॥ 25

In Public domain. Digitization Muthulakshmi Research Academy

प. 44.

चूर्णोत्सवान्ते तीर्थं स्यात् द्विविधं चोच्यते मया।

पञ्चाहं तु प्रवक्ष्यामि शृणुष्व कमलासन॥ 26

P. 103 सायंकाले समारभ्य तत्पूर्वे होममारभेत्।

पञ्चाहे तु च विप्रेन्द्र बलिं तत्र न कारयेत्॥ 27

षष्ठाहे तु च पूर्वाह्णे चूर्णोत्सवं तु कारयेत्।

तीर्थं चैव प्रकर्तव्यं मितिमन्य शृणुष्वथः॥ 28

सायंकाले समारभ्य तद्रात्रौ चाधिवासयेत्।

होमं कुर्यात्तु तद्रात्रौ बलिरेक विधीयते॥ 29

बल्यन्ते चैक विप्रेन्द्र चूर्णोत्सवं तु कारयेत्।

चूर्णोत्सवान्ते तीर्थं स्यात् द्विविधश्चोक्तते मया॥ 30

- - - - - - - - - - - - - - - - - - - -।

- - - - - - - - - - - - - - - - - - - -॥ 31

In Public domain. Digitization Muthulakshmi Research Academy

प. ४४

द्वितीये च तृतीये च चतुर्थे च बलिद्वयम्।
पञ्चाहे बलिरेकं स्यात् शेषोत्सवं तु कारयेत्॥ ३२
कुर्याद्वै तीर्थकर्मन्तु द्विविधं चोच्यते मया।
सप्ताहं चैव वक्ष्यामि श्रृणुष्व कमलासन॥ ३३
अष्टौ हे चैव सायाह्ने अधिवासनमारभेत्।
होमं कुर्याच्च तद्रात्रौ बलिश्चैव पुनः पुनः॥ ३४
चतुर्दश बलिं दद्यात् चूर्णोत्सवं तु कारयेत्॥
तीर्थं कुर्याद्विशेषेण इदमन्य श्रृणुष्वथः॥ ३५
सप्ताहे सायमारभ्य अधिवास्य ततो बुधः॥।
होमं कुर्याच्च तद्रात्रौ बलिरेकं ददेत बुधः (पुनः)॥ ३६

In Public domain. Digitization Muthulakshmi Research Academy

प॰ ४४

द्वितीये दिवसे चैव तृतीये - - - - - - - - ।

- - - - - - विप्रेन्द्र बलिद्वयं समाचरेत् ॥ 37

सप्ताहे बलिरेवं स्यात् बल्यन्ते चूर्णमुच्यते ।

ततस्तीर्थं समारभ्य - - - - - - - - - मुत्तमम् ॥ 38

सप्ताहे द्विविधं प्रोक्तं नवाहं च श्रृणुष्वथः ।

तत्पूर्वरात्रमारभ्य तद्रात्रौ चाधिवासयेत् ॥ 39

होमं कुर्याच्च तद्रात्रौ बलिं चैव तु दापयेत् ।

तद्दिनाद् - - - तः काले बलिरुच्यते ॥ 40

चूर्णोत्सवं ततः कुर्यात्तीर्थं कुर्यात्ततो बुधः ।

इदमन्यत् प्रवक्ष्यामि श्रृणुष्व कमलासन ॥ 41

In Public domain. Digitization Muthulakshmi Research Academy

प.44

नवाहे चैव सायाह्ने अधिवासनमारभेत्।

होमं कुर्याच्च तद्रात्रौ बलिं चैव तु दापयेत्॥ 42

द्वितीये दिवसे चैव तृतीयेऽपि चतुर्थके।

पञ्चमे चैव षष्ठाहे द्वितीयं बलिमाचरेत्॥ 43

P. 104. नवाहेऽपि च विप्रेन्द्र बलिना द्वितयं भवेत्।

चूर्णोत्सवं ततः कुर्यात् तीर्थकर्म समारभेत्॥ 44

नवाहु द्विविधं चैव प्रोच्यते सकलं मया।

एवमेव क्रमेणैव कुर्यात् पञ्च विधानं च॥ 45

सूर्यवारं प्रवक्ष्यामि शृणुष्व कमलासन।

प्रातः काले समारभ्य द्विगुणं पूजयेच्छिवम्॥ 46

In Public domain. Digitization Muthulakshmi Research Academy

प.44

पुण्याहं वाचयेत्तत्र हविर्न्निवेदयेत्ततः।

इन्द्राद्यैशानपर्यन्तं लोकपालान् बलिं ददेत्॥ 47

नित्योत्सवस्य कालात्तु कुर्यात् ग्रामप्रदक्षिणम्।

रथं वा शिबिकायां वा शिरसा वाहयेत्ततः॥ 48

प्रविशेदालयं तत्र पादुकार्चनमुच्यते।

सूर्यवारमिदं प्रोक्तं शनिवारं शृणुष्वथ॥ 49

लिङ्गे वा प्रतिमायां वा तैलाभ्यङ्गमिहोच्यते।

अभिषेकं तु कर्तव्यं हृदयेन तु मन्त्रतः॥ 50

हविर्निवेदयेत् पश्चात् लोकपाल बलिं क्षिपेत्।

शैवान् संपूजयेत्तत्र परिवेषं कृतं कुरु॥ 51

In Public domain. Digitization Muthulakshmi Research Academy

प-४४

ग्रामप्रदक्षिणं कुर्यात् सर्वातोद्यसमन्वितः।
मार्त्तण्डीयं प्रवक्ष्यामि शृणुष्व कमलासन॥ 52
सायंकाले समारभ्य प्रातःकाले बलिं ददेत्।
तीर्थान्ते पूर्वरात्रौ तु लोकपालबलिं क्षिपेत्॥ 53
मण्डपाद्दक्षिणे पार्श्वे स्थापयेत् कलशान्नव।
ततो होमं प्रकर्तव्यं लक्षणेन समन्वितम्॥ 54
समिधाज्यचरुं चैव हुत्वा वै पञ्चविंशतिः।
अन्नलिङ्ग समायुक्तमस्त्रराजसमन्वितः॥ 55
बलिं दद्यात्तु विप्रेन्द्र सायंकाले विशेषतः।
ततः प्रभाते प्रतिमां कुर्यात् ग्रामप्रदक्षिणम्
56

In Public domain. Digitization Muthulakshmi Research Academy

प. ४४

तीर्थं कुर्यात्ततो विद्वान् प्रविशेदालयं प्रति।

एवमेव क्रमेणैव बुधवारे विशेषतः॥ 57

मार्कण्डीयमिदं प्रोक्तमारम्भं च शृणु द्विज।

अङ्कुरार्पणपूर्वं च ध्वजारोहणपूर्वकम्॥ 58

भेरीताडनपूर्वं च त्रिविधं चोच्यते मया।

अङ्कुरानर्पयेद्विद्वान् ध्वजमारोपयेत्ततः॥ 59

भेरीं तु ताडयित्वा तु अङ्कुरार्पणपूर्वकम्।

ध्वजमारोपयेद्विद्वान् भेरीताडनपूर्वकम्॥ 60

p. 105 - - - . . . . ।

- - - - - - - - - - - - - - - - - - ॥ 61

- - - - - - - - - - - - - - - - - - ।

In Public domain. Digitization Muthulakshmi Research Academy

प.44

ग़ावमेव क्रमेणैव त्रिविधं चोच्यते मया। 62

तद्दिनं चैव विप्रेन्द्र द्विगुणीकृत्य रोपयेत्॥

द्विगुणीकृत्य वा कुर्यात् ध्वजमारोपयेत्ततः। 63

उत्सवस्याद्(द्वि?)रात्रौ तु ध्वजारोहणमुच्यते॥

भौवने दैविके कुर्यादन्येषु च वर्जयेत्। 64

समुद्रस्नानमुत्वन्ने पर्वयुक्तो विधीयते॥

यत्पक्षे यद्दिने वारे चास्तं याति दिवाकरः। 65

तद्दिने संक्रमो भागे दिवा तीर्थं च निश्चयः॥

अन्येषान्तिथन स्पृष्टन्तस्मात्पूर्वं विधीयते। 66

तद्दिनेषु च वा कुर्यात् पूर्वे वापरेऽपि वा॥

In Public domain. Digitization Muthulakshmi Research Academy

प-४४

इतरेषां च विप्रेन्द्र तन्नदीषु न कारयेत्। 67
नदीतटाकतीरेषु नक्षत्रे तीर्थमुच्यते ॥
यत्पक्षे यद्दिने वारे अस्तं याति दिवाकरः। 68
तद्दिने संक्रमे भाग दिवातीर्थं च निश्चयः॥
शिवस्याचरितं कुर्यात् स्नपनं तदनन्तरे। 69
एवमेव क्रमेणैव उत्सवं कारयेत्ततः॥
उत्सवारम्भमेवोक्तं वृषभयागमथश्रृणु। 70
वृषभयागं प्रवक्ष्यामि श्रृणुष्व कमलासन॥
प्रासादस्याग्रतः कुर्यात् मण्डपं चतुरश्रकम्। 71
मण्डपस्य तु तन्मध्ये कुर्याच्च वृषयागकम्॥

In Public domain. Digitization Muthulakshmi Research Academy

प. ४४

दर्भमालाभिरावेष्ट्य पुष्पमालावलम्बितम्। 72
इन्द्रादीशानपर्यन्तमष्टदिक्षु ध्वजाष्टकम्॥
लोकपालाधिदैवत्यं स्वस्वरूपं तु लाञ्छयेत्। 7
विन्यसेत्तु ध्वजांस्तत्र चतुस्तोरणभूषितम्॥
वितानेनोर्ध्वमाच्छाद्य मुक्तादामैरलंकृतम्। 74
वृषदेवं समभ्यर्च्य गन्धपुष्पादिना ततः॥
मुद्गान्नं चैव दातव्यं उपदंशैस्समान्वितम्। 7
तदग्रे स्थण्डिलं कृत्वा शालिभिर्विमलैस्ततः॥
अष्टद्रोणेन शालिं तु तदर्धं तण्डुलैरपि। 76
तदर्धं तु तिलान्न्यस्य पत्रं कृत्वा विशेषतः॥

In Public domain. Digitization Muthulakshmi Research Academy

प-44

तस्योपरि न्यसेत्तत्र कलशान्नवसंख्यया। 77
मध्यमे स्थापयेदेकं ससूत्रान् सापिधानकान्॥
P. 106. पूरयेद्गन्धतोयेन सुवर्णं तत्र विनिक्षिपेत्। 78
वृषबीजमनुस्मृत्य गन्धपुष्पादिनार्चयेत्॥
पूर्वादीशानपर्यन्तं विन्यसेदष्टकुम्भकान्। 79
पाद्यं पूर्वे न्यसेत्तत्र आग्नेय्यां पुष्पमुच्यते॥
आचमनं दक्षिणे न्यस्य शङ्खोदकं तु नैरृते। 80
अर्घ्यं पश्चिमतो न्यस्य बिल्वोदकं तु वायवे॥
उत्तरे पञ्चगव्यं तु ईशाने रत्नोदकं न्यसेत्। 81
गन्धादिनार्चयेत्तत्र देवतान्विन्यसेत्ततः॥

In Public domain. Digitization Muthulakshmi Research Academy

प. 44

वृषभं मध्यमे न्यस्य उक्षाणं पूर्वतो न्यसेत्। 82
गोपतिश्चाग्नि दिग्भागे शृङ्गिणश्चैव दक्षिणे॥
नैर्ऋत्यां नन्दिनं चैव पश्चिमे तु पशोः पतिम्। 83
विषाणी वायुदिग्भागे शङ्कुकर्णं तथोत्तरे॥
महोदकन्तथैशान्यां विन्यसेत् कलशेषु च। 84
कलशान् पूर्वदिग्भागे शालिना स्थण्डिलं कुरु॥
अष्टपत्रं समालिख्य दर्भैश्चैव परिस्तरेत्। 85

ध्वजपटम्

ध्वजपटं विन्यसेत्तत्र लक्षणेन समन्वितम्॥
उत्तमं दशहस्तं तु मध्यमं नवहस्तकम्। 86
अधमं चाष्टहस्तं तु (मध्यमं नवहस्तकम्)॥

In Public domain. Digitization Muthulakshmi Research Academy

प. ४४

अर्धाधिके त्रितालं तु ध्वजदैर्घ्यमिहोच्यते। ८७

षट्तालमुत्तमं प्रोक्तं पञ्चतालं तु मध्यमम्॥

अर्धाधिकत्रितालं तु कन्यसन्त्विह प्रोच्यते। ८८

पटविस्तारमेवं तु चतुर्भागैकमेव वा॥

ब्राह्मणस्य भवेच्छ्वेतं क्षत्रियस्य च रक्तकम्। ८९

पीतं वैश्यमिह प्रोक्तं कृष्णवर्णं तु शूद्रकम्॥

विस्तरेण समं पुच्छं पुच्छार्धं शिखरं भवेत्। ९०

मध्यमे वृषभं लाञ्छनं स्थितं वा शयनं तु वा॥

वृषभं श्वेतवर्णं तु रक्तवर्णं तु शृङ्गकौ। ९१

खुराणां रक्तवर्णं तु पीतं लाङ्गलमेव वा॥

In Public domain, Digitization Muthulakshmi Research Academy

प. 44

नेत्रौ श्वेतमही चैव ----- रक्तमयी तथा। 92

वृषभं पद्मपीठं तु मणिमालाविभूषितम्॥

पार्श्वौ दीपद्वयौ न्यस्य छत्रमूर्ध्वे तु कारयेत्। 93

द्वौ पार्श्वौ चामराभ्यां तु लेखयेद्वृषभं ततः॥

पूर्वेद्युरधिवासं स्यात् ध्वजदण्डेन संयुतम्। 94

प्रोक्षयेदम्भसा चैव हृदयेन तु मन्त्रतः॥

P. 107 गन्धपुष्पादिना पूज्य वृषगायत्रिमन्त्रतः। 95

पूर्वादीशानपर्यन्तं वृषमूर्तिं न्यसेत्ततः॥

तदन्ते लोकपालांश्च पूजयेत्तु विशेषतः। 96

तद्बाह्ये पूजयेत्तत्र लोकपालास्त्रमेव च॥

In Public domain. Digitization Muthulakshmi Research Academy

प. ४४

तस्यैव पूर्वदिग्भागे शालिना स्थण्डिलं कुरु। 97

पद्ममष्टदलं लिख्य दर्भैश्चैव परिस्तरेत्॥

तदूर्ध्वे विन्यसेच्छूलं पूजयेत्तु विशेषतः। 98

वामादीनां तु शक्तीनां शूलमूले प्रतिष्ठितम्॥

कुमारं फलके न्यस्य कुम्भेतु वरुणं न्यसेत्। 99

तटीश्चैवाग्निदैवत्यं सरस्वतीं चैव दण्डके॥

पीठे तु पार्वतीं न्यस्य भूमिभागे वसुन्धराः। 100

गन्धपुष्पैश्च धूपैश्च षण्णवत्येन पूजयेत्॥

पुण्याहं वाचयेत्तत्र ताम्बूलं दापयेत्ततः। 101

ततो होमं प्रकुर्वीत स्थण्डिलं चतुरश्रकम्॥

In Public domain. Digitization Muthulakshmi Research Academy

प. ४४

शिवाग्निं जनयेत्तत्र अग्निमुखं च हूयते । 102

समिधाज्यचरुं लाजान् सर्षपञ्चैव हूयते ॥

पञ्चब्रह्मेन संयुक्तमीशानादीनि हूयते । 103

प्रत्येकं शतमर्धं वा तदर्धं वाभि हूयते ॥

वृषाधिवासनं प्रोक्तं ध्वजारोहणकं शृणु । 104

ध्वजारोहणमेवं तु वक्ष्यामि मुनिसत्तम ॥

श्वेतवर्णध्वजं चैव राजराष्ट्र विवर्धनम् । 105

वण्यं वै रक्तवर्णं तु स्तम्भनं पीतवर्णकम् ॥

विजयं कपिलाभं च कृष्णं चैवाभिचारकम् । 106

धूम्रं व्याधिप्रदं चैव एवमेव क्रमेण तु ॥

In Public domain. Digitization Muthulakshmi Research Academy

प. ४४

यान्यात् कामयते कामान्तांस्तान्यैसाधयेद्ध्वजम्। 107

वर्णाद्धूम्र्यमवर्णं तु क्षीराभं सर्वशान्तिकम्॥

शङ्खस्फटिकमुक्ताभं रक्षार्थं शान्ति पुष्टिदम्। 108

पूर्वाह्णे ब्राह्मणप्रीतिर्मध्याह्ने राजवृद्धिदम्॥

रात्रौ च वैश्यशूद्राणां वर्धनं क्रमशस्ततः। 109

ध्वजस्थानमहं वक्ष्ये श्रूयतां कमलासन॥

पीठगोपुरयोर्मध्ये वृषस्य पुरतोऽपि वा। 110

पीठाग्रे वाथ कुर्याच्च ध्वजस्थानं विधीयते॥

क्रमुकं वेणुदण्डं वा चन्दनं वापि खादिरम्। 111

चम्पकं देवदारुश्च स्तम्बको बिल्वकैरपि॥

In Public domain. Digitization Muthulakshmi Research Academy

प. ४४

अवक्रं निर्व्रणं चैव कृमिकोटरवर्जितम्। 112

P. 108. प्रासादस्य समं वापि प्रासादग्रीवमेव वा॥

वृषस्थलसमं वापि गोपुरोत्सेधमेव वा। 113

तुलान्तञ्च तलान्तं वा दण्डस्योत्सेधमुच्यते॥

हस्तसंख्येन वा कुर्यात् त्रिंशद्धस्तमथापि वा। 114

द्वादशं दशहस्तं वा ध्वजस्योत्सेधमुच्यते॥

सप्तत्रिंशाङ्गुलं वापि चतुर्विंशातिरेव वा॥। 115

द्वाविंशत्यङ्गुलं वाथ नाहस्तस्य विधीयते॥

वेण यष्टिन्तरो ग्राह्य दावक्रन्निर्व्रणं ततः॥। 116

ऽाकपर्वं विनाशार्थं द्विपर्वेण भयंकरम्॥

In Public domain. Digitization Muthulakshmi Research Academy

प.४४

त्रिपर्वं व्याधिना पीड्यञ्चतुष्पर्वं विनाशनम् । ११७

पञ्चपर्वं भयं लोके षट्पर्वं श्रियमावहेत् ॥

सप्तपर्वान् क्षयान् गाव अष्टपर्वसुवर्धते । ११८

नवपर्वं कुलक्षीणं दशवै सर्वकामदम् ॥

एकादश पुत्रकाम द्वादशं पुष्टिकामदम् । ११९

इत ऊर्ध्वं न कर्तव्यं हस्तमानं ततः शृणु ॥

षट्तालं पञ्चतालं वा तस्याग्रे घटिकां न्यसेत् । १२०

आधारफलकां त्राणि याज्ञीलै वृक्षसंभवैः ॥

हस्तमात्रान्त संज्ञेयं हस्तार्धं मात्रमेव वा । १२१

सुषिरद्वयसंयुक्तं क्रमुकं वेणुना सह ॥

In Public domain. Digitization Muthulakshmi Research Academy

प. ४४

यौजयेच्चैव विप्रेन्द्र शिल्पिना-च तथैवच। /22

पञ्च षट् सप्तमङ्गुल्य वेणु दण्डस्य नाहकम्॥

रज्जुना बन्धयेत्तत्र दर्भेण वेष्टयेत्ततः। /2

कनिष्ठाङ्गुल प्रमाणेन तन्तुना रज्जुरुच्यते॥

अ... टिका मूलान्त द्विगुणञ्चैव कारयेत' /24

माणवाक शुचिर्भूत्वा प्रोक्षयेदम्भसा ततः॥

नववस्त्र परिधान स्सोष्णीष स्सोत्तरीयकम्। /25

अन्य ध्वजं बन्ध कुर्यात ---- ग्रामप्रदक्षिणम्॥

तस्यान्ते चास्त्रराजानं अन्नलिङ्गं समायुतम्। /2

नानाध्वजसमायुक्तं नानापिञ्छसमायुतम्॥

In Public domain. Digitization Muthulakshmi Research Academy

प. ४४

नानाजनसमाकीर्णां नानावाद्यसमायुतम्। 127

नानाछत्रसमायुक्तं ब्रह्मघोषसमन्वितम्॥

मङ्कुरसंयुक्तं नृत्तगेयसमन्वितम्। 128

अग्रतः पृष्ठतो गत्वा आचार्यो यजमानकः॥

शनैः प्रदक्षिणं कृत्वा ध्वजस्थानं प्रवेशयेत्। 129

अवटं खानयेत्तत्र हस्तद्वय प्रमाणतः॥

P.109 तस्य मूले प्रकर्तव्यं वेदिलक्षणसंयुतम्। 130

षट् . . . .॥

तालमध्येन विन्यस्य स्वर्णकूर्ममेव च। 131

पुण्याहं वाचयेत्तत्र प्रोक्षयेच्छुद्धवारिणा॥

In Public domain. Digitization Muthulakshmi Research Academy

हृदयेन तु मन्त्रेण क्षालयेद्ध्वजदण्डकम्। 132

दर्भमालाभिरावेष्ट्य पुष्पमालासमन्वितम्॥

वृषगायत्रिमन्त्रेण प्रोक्षयेत् कलशोदकैः। 133

उत्थाप्य ध्वजदण्डं तु व्योमव्यापि समुच्चरन्॥

वालुकेन हृदा चैव पूरयेदवटं ततः। 134

तस्य मूले प्रकर्तव्यं वेदिलक्षणसंयुतम्॥

षट्तालं पञ्चतालं वा चतुस्थालमथापि वा। 135

(स्ता?)

विस्तारं प्रोच्यते विप्र उत्सेधं तु तदर्धकम्॥

तदूर्ध्वे पद्मं संकल्प्य अष्टपत्रं सुशोभनम्। 136

एकमेखलमेवं स्यान्मेखलात्रयमेव वा॥

In Public domain. Digitization Muthulakshmi Research Academy

प. ४४

उत्सेधं तु त्रिधा भज्य एकैकं मेखलोच्छ्रयम्। 137
अधस्तान्मेखला चैव भूमिदेवीं च विन्यसेत्॥
श्रीदेवीं मध्यमे पूज्य तृतीये वा सरस्वती। 138
त्रिमेखलेषु विप्रेन्द्र शक्तयस्त्रीणि कल्पयेत्॥
एकमेखलया कुर्याद्भूमिदेवीं न्यसेत्ततः। 139
एवमेव प्रकारेण पीठं कुर्याद्विशेषतः॥
यागस्थाने तथा देवं स्नापयेत् कलशेन तु। 140
स्थाने वृषभ देवं तु गन्धपुष्पादिनार्चयेत्॥
वृषगायत्रिमन्त्रेण पश्चात् सूत्रं तु बन्धयेत्। 141
उद्धृतं तु क्रमेणैव उद्धारो ध्वजमेव हि॥

In Public domain. Digitization Muthulakshmi Research Academy

प. ४५

रज्जुयन्त्रेण वा कुर्यात् ध्वजमारोपयेत्ततः। /42

कुम्भोदरो वृषश्चैव पाशहस्तो महोत्कटम्॥

शूलहस्तो पिनाकीच आषा नाडि दण्डिमुण्डयः। /4:

प्रतानीचाष्टदिक्श्चैव पूर्वादीशान्त विन्यसेत्॥

पूजयेत् गंन्धपुष्पेण धूपदीपैस्समान्वितम्। /4८

स्थण्डिलं कारयेत्तत्र चतुद्रोणेन शालिना॥

पुण्याहं कारयेत्तत्र कलशान्नव विन्यसेत। /4

मध्ये वृषभकुम्भं तु वृषमन्त्रेण विन्यसेत॥

इन्द्रादीशानपर्यन्तं विन्यसेत कलशान् ततः। /4

सवस्त्रान् सापिध्यानांश्च लोकपालाधिदैवतान्॥

In Public domain. Digitization Muthulakshmi Research Academy

प-४४

स्थापयित्वा यथान्यायं वृषगायत्रिमन्त्रतः। /147

P.110. निवेदयेत्तु मुद्गान्नं दध्योपदंशसंयुतम्॥

तत्काले तु प्रजार्थीनां पिण्डान् भोजयेत्ततः। /148

कुक्कुटाण्डप्रमाणेन पिण्डं कुर्यात्तु देशिकः॥

वृषगायत्रिमन्त्रेण पिण्डं दद्यात्तु देशिकः। /149

वृषभं भत्रं?वत स्मृत्य त्रिः कृत्वा तु प्रदक्षिणम्॥

कर्तव्य . . . . ज मूले समाश्रितः। /150

पार्वं कृत्वा तु विप्रेन्द्र चातुर्वर्णं तु नारिणाम्॥

अन्त्यजातिस्तु सर्वेषां प्रतिलोमांश्च कारयेत्। /151

आचार्यं पूजयेत पश्चात वस्त्रहेमाङ्गुलीयके॥

ताम्बूलं दापयेत तस्मै जनान् सर्वान् विशेषतः। /152

इति वीरतन्त्रे —— ध्वजारोहणविधि-

चतुश्चत्वारिंशत पटलः॥

In Public domain. Digitization Muthulakshmi Research Academy

T NO 30

पटलः 45

॥ भेरीताडनविधिपटलः॥

इत ऊर्ध्वं प्रकर्तव्यं भेरीताडनमुत्तमम्।
प्रातर्मध्याह्नसायाह्ने ध्वजमारोपयेत्ततः॥ 1
तद्रात्रौ ताडयेद्भेरीं लक्षणेन समन्वितम्।
लक्षणं संप्रवक्ष्यामि शृणुष्व कमलासन॥ 2
आसनं वन्दनं वापि वकुलं च शिरीषकम्।
व्याघ्रवृक्षेण वा कुर्यात भेरी वा पटहं तु वा॥ 3
आयामं तु त्रिहस्तं स्यादुत्तमं तु विधीयते।
पञ्चतालं तु मध्यं स्यात षडङ्गुलविहीनकम्॥ 4
अधमं चैतदुद्दिष्टं त्रिविधं चोच्यते मया।
आयामस्य समं नाहं मध्ये पटहमुच्यते॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 45

वक्त्रं वै द्वादशाङ्गुल्यन्नमवैर्वा सप्त एववा।

एवमेव क्रमेणैव कृत्वा पटहमुत्तमम्॥ 6

गोचर्मेण तु बन्धं स्यात् महाध्वनिसमायुतम्।

मड्डुकै हाहक्कैश्चैव हंसध्वनिसमायुतम्॥ 7

झल्लरी झर्झरी मोहैः करण्डीका समान्वितम्।

अन्यैश्च सर्ववाद्यैश्च यथालाभेन तर्पयेत्॥ 8

प्रासादस्याग्रतश्चैव मण्डपं कारयेत्ततः।

मण्टपस्य तु मध्ये तु गोमयेनानुलेपयेत्॥ 9

स्थण्डिलद्वितयं कृत्वा शालिना च तथैवच।

अष्टद्रोणेन शालि स्यात् स्थण्डिलौद्वौ तु कारयेत्॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प. 45

तदर्धं तण्डुलैर्युक्तं प्रोक्षयेदम्भसा ततः।

पद्मं विलिख्य तन्मध्ये दर्भैश्चैव परिस्तरेत्॥ 11

पटहस्य तदाकारस्थण्डिलं कारयेत्ततः।

P. 111 पटहं विन्यसेत्तत्र नववस्त्रसमन्वितम्॥ 12

तदग्रे स्थापयेच्छूलं अस्त्रमन्त्रेण देशिकः।

गन्धैः पुष्पैश्च धूपैश्च दीपैश्चरु निवेदयेत्॥ 13

एवं वै पूजयेच्छूलं पश्चाद्भेरीं समर्चयेत्।

उत्तराभिमुखो भूत्वा अर्चयेद्गन्धपुष्पकैः॥ 14

आपोहिष्ठेति मन्त्रेण प्रोक्षयित्वा कुशाम्भसा।

पटहं विन्यसेत्तत्र हृदयेन तु पूजयेत्॥ 15

दक्षिणे रुद्रमभ्यर्च्य वामे विष्णुरिति स्मृतम्।

ब्रह्माणं पूजयेन्मध्ये एवमेव क्रमेण तु॥ 16

In Public domain. Digitization Muthulakshmi Research Academy

प.45

वासुकी चर्मसूत्रे तु वलयौ रविचन्द्रमा।

कौमारस्सप्तकोलं तु मुद्गरे तु व्यवस्थितिः॥ 17

कोणदण्डेन संयुक्तं पूजयेद्वस्त्र मन्त्रतः।

वाद्यकंच समाहूय स्नानकर्म समाचरेत्॥ 18

शुक्लवस्त्र परीधानं गन्धमाल्यं तु लेपनम्।

नन्दिकेश्वर बाहु स्यान्नन्दि मन्त्र समन्वितम्॥ 19

अर्चयित्वा यथान्यायं गन्धपुष्पादिना ततः।

पटहस्यैव विप्रेन्द्र हविर्निवेदयेत्ततः॥ 20

आचार्यं पूजयेत्तत्र वाद्यकं पूजयेत्ततः।

वामदेवेन मन्त्रेण - - - - - - - - - -॥ 21

In Public domain. Digitization Muthulakshmi Research Academy

प. 45

ताडयेच्छिवमन्त्रेण आचार्यो मन्त्रविग्रहाः।

वाद्यको ताडयेत् पश्चात् नन्दिमन्त्रेण संयुतम्॥ 22

कुलोद्भूतो विदीनाज ताडयेत्तालमेव च।

चच्चत्पुटं तु प्रथमे चाचपुट द्वितीयके॥ 23

इन्द्रस्य समतालं तु अग्नौ बद्धावणं भवेत्।

यमस्य कौशिका प्रोक्ता नैऋत्या मल्लतालकम्॥ 24

वारुण्या ण्डक्कुरं विद्याद्वायव्यमुज -- दं भवेत्।

सौम्ये तु भद्रतालं च ऐशान्यां कोटिका भवेत्॥ 25

एतै_तालैश्च संयुक्तं वाद्यकान् वादयेत्तदा।

ततो ग्राम बिन्दद्यात् लक्षणेन समन्वितम्॥ 26

In Public domain. Digitization Muthulakshmi Research Academy

प. 45

नानाध्वजसमायुक्तं नानाछत्रसमायुतम्।
धूपदीपसमायुक्तं नानापिञ्छसमायुतम्॥ 27
शङ्ख दुन्दुभिनिर्घोषैः गीतवाद्यसमाकुलम्।
त्रिशूलेन समायुक्तं अन्नलिङ्गसमायुतम्॥ 28
एवमेव प्रकारेण कुर्याद्ग्रामप्रदक्षिणम्।
विमानप्रदक्षिणं कुर्याच्छिवभक्तसमन्वितम्॥ 29
P. 112 ध्वजपीठे बलिं दद्यात् परिवारबलिं ददेत्।
ब्रह्माद्यैशानपर्यन्तं ग्रामे चैव बलिं ददेत्॥ 30
आद्याग्य तीर्थदिवसमावाह्य सर्वदैवतान्।
सर्वेषां तु गणानां तु भूतानां तु पिशाचकैः॥ 31
तदाप्रभृति तीर्थान्तं रात्रौ ग्रामबलिं ददेत्।

In Public domain. Digitization Muthulakshmi Research Academy

प. 45

ध्वजमूले तु चा बाह्य बलिस्तत्रैव विनिक्षिपेत् । 32

एवं कृते महेशान्ते, राजराष्ट्र सुखावहम् ॥

भेरीताडनमेवोक्तं यागस्य मण्डपं शृणु । 33

इति वीरतन्त्रे भेरीताडनविधि-

पञ्चचत्वारिंशत्पटलः ॥

In Public domain. Digitization Muthulakshmi Research Academy

पटलः ४६

॥ यागमण्डपलक्षण पटलः॥

यागस्य मण्डपं वक्ष्ये शृणुष्व कमलासन।
प्रतिष्ठा चोत्सवे चैव दीक्षायां प्रोक्षणेऽपि च॥ 1
महाशान्त्यादिकालेषु यागमण्डपमुच्यते।
पूर्वमेवं मया प्रोक्तं भूमिसंग्रहणं द्विज॥ 2
प्रासादस्याग्रतश्चैव याम्ये वा वारुणेऽपि वा।
इन्द्रमीशानयोर्मध्ये मध्ये चानलचक्रयोः (श?)॥ 3
याम्याग्नेययोर्मध्ये सौम्येशानमध्यमे।
कारयेन्मण्डपं तत्र लक्षणेन समन्वितम्॥ 4
द्वादशं दशहस्तं वा नवहस्ताष्टहस्तकम्।
सप्त षट् पञ्च हस्तं वा सप्त - - - - न्योच्यते॥ 5

In Public domain. Digitization Muthulakshmi-Research Academy

प. 46

प्रागग्रं दशसूत्रं स्यादुदगग्रं तथैव च ।

ऽकाशीति पदं कृत्वा प्रोक्षयेद्गन्धवारिणा ॥ 6

मध्ये नवपदं चैव. वेदीस्तत्र प्रकल्पयेत् ।

वेदिकारत्निवोत्सेध दर्पणोदरवत् कृतम् ॥ 7

षोडश स्तम्भसंयुक्तं चतुर्द्वारसमन्वितम् ।

मध्यमे तु पदे चैव होमकुण्डं विधीयते ॥ 8

पूर्वे तु चतुरश्रं च दक्षिणे पश्चिमे तथा ।

उत्तरे चैव विप्रेन्द्र कुण्डं स्याच्चतुरश्रकम् ॥ 9

विदिक्षु वृत्तकुण्डं स्यात् त्रिमेखलसमन्वितम् ।

सर्वेषां चतुरश्रं वा सर्वेषां वृत्तमेव वा ॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प. 46

यावत्पीठाकृतिश्चैव कुण्डं स्या ------ तु ईशानम्।
ईशान इन्द्रयोर्मध्ये वृत्तकुण्डमिति स्मृतम्॥ 11
नवाग्नि वाथ पञ्चाग्निरेकाग्निर्वाधि कारयेत्।
त्रिमेखलसमायुक्तमेकमेखलमेव वा॥ 12
पुण्याहं वाचयेत्तत्र प्रोक्षयेत पञ्चगव्यकैः।
P.113. चतुस्तोरणसंयुक्तं चतुर्द्वारेषु देशिकः॥ 13
उत्तमं पञ्चहस्तोच्चं मध्यमं चतुर्हस्तकम्।
त्रिहस्तं तालुसंयुक्तमधमं त्विति कथ्यते॥ 14
उत्सेधयार्धञ्च विस्तारं पकोचोर्ध्वसमायुतम्।
पलत्रयसमायुक्तं शरलं तालसमं भवेत्॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

प.46

मात्राङ्गुलेन संयुक्तं मध्यमं पञ्च एव च।
उत्तमं सप्तदर्भैश्च हस्तमान प्रलम्बितम्॥ 16
तस्याग्रे चैव रज्जुश्च कुर्याद्वै - - - -।
वितानोपरि सञ्छिन्नं मुक्तास्रक् दामसंयुतम्॥ 17
दिग्ध्वजं विन्यसेत्तत्र चतुस्तालप्रमाणतः।
पूर्वायां श्यामवर्णं तु आग्नेय्यां रक्तवर्णकम्॥ 18
याम्यायां कृष्णवर्णं तु मुक्ताभं नैर्ऋते तथा।
पश्चिमे पीतवर्णं तु वायव्यां नीलमेव च॥ 19
सौम्यायां स्फटिकाभं च ईशान्यां धूम्रमुच्यते।
लोकपालस्य रूपं तु ध्वजानां मध्यमे न्यसेत्॥ 20

In Public domain. Digitization Muthulakshmi Research Academy

प. 46

दर्पणं पूर्णकुम्भंच वृषभं युग्मचामरम्।

श्रीवत्सा स्वस्तिका शङ्खं दीपो देवाष्टमङ्गलम्॥ 21

वज्रं शक्तिंच दण्डंच खड्गं पाशं तथाङ्कुरम्।

गदा त्रिशूलचक्रंच पद्मं चेति दशायुधम्॥ 22

शिल्पिना कारयेत्तत्र लक्षणेन समन्वितम्।

हस्तमात्रप्रमाणेन कारयेदष्टमङ्गलम्॥ 23

दशायुधानिश्च कारयेच्छिल्पिना ततः।

क्षालयेत्तं मृदाचैव शुद्धतोयेन संयुतम्॥ 24

पुण्याहं वाचयेत्तत्र प्रोक्षयेच्छिवमन्त्रतः।

वेदिबाह्ये न्यसेच्छालि तत्समं समलंकृतम्॥ 25

In Public domain. Digitization Muthulakshmi Research Academy

प. ४६.

तस्योपरि न्यसेदस्त्रमष्टमङ्गलसंयुतम् ।

दुर्भोपरि न्यसेच्चैव कूर्चेनैव द्विधाय च ॥ 26

अस्त्रं प्र ? न्यसेत्कुम्भान् स्वस्वनामेन संयुताम् ।

एवमेव न्यसेद्विद्वान् अष्टमे नवमे व च ॥ 27

गन्धपुष्पादिनाभ्यर्च्य प्रासादेन तु मन्त्रतः ।

वज्रादीन् चर्चयेत्तत्र स्वस्वनामेन मन्त्रतः ॥ 28

हविर्निवेदयेत्तत्र ताम्बूलं दापयेत्ततः ।

ततो होमं प्रकर्तव्यमेकं वा पञ्चमेव वा ॥ 29

प्रोक्षयेत् कुम्भतोयेन आयुध्यानष्टमङ्गलान् ।

P.114. आचार्यः पूजनं कृत्वा पादार्थीन् पूजयेत्ततः ॥ 30

इति वीरतन्त्रे (याग) मण्डपलक्षण -

षट्चत्वारिंशत्पटलः ॥

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 47

॥ अधिवासनविधिपटलः॥

अधिवासनविधिं वक्ष्ये संक्षेपात्छृणु पद्मज।
उत्सवस्यादिरात्रौ तु प्रारभेद्धिवासनम्॥ 1
प्रासादस्याग्रतः कुर्याच्छालिना स्थण्डिलं तथा।
विन्यसेत्पालिकादीनि मध्यमे सोकुम्भकम्॥ 2
हृदयेन तु मन्त्रेण पालिकान्वापयेत्ततः।
सुगुप्ते देशे संस्थाप्य पालिकादीन्यथाक्रमम्॥ 3
कौतुकं बन्धयेत्पश्चाच्छिवाग्रे स्थण्डिलं कुरु।
प्रतिमं विन्यसेत्तत्र अस्त्रं चैव तु विन्यसेत्॥ 4
सौवर्णमूर्णा सूत्रं वा स्थालिकोपरि विन्यसेत्।
कार्पासं सूत्र वा कुर्यात् प्रोक्षयेद्धृदयेन तु॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 47

प्रतिमं प्रासादमन्त्रेण बन्धयेत् कौतुकं ततः।

ताम्बूलं दापयेत् पश्चात् जनान् सर्वान् विशेषतः॥ 6

मण्डलं वेदिमध्ये तु अष्टद्रोणेन शालिना।

तण्डुलैस्तिलसंयुक्तं दर्भैश्चैव परिस्तरेत्॥ 7

शिवकुम्भं प्रतिष्ठाप्य वर्धनीं तस्य वामतः।

ससूत्रान् सापिधानांश्च सवस्त्रान्वारिपूरितान्॥ 8

पञ्चरत्नसमायुक्तान् शिवमन्त्रेण स्थापयेत्।

रत्नानि विन्यसेद्धेमं गौरीबीजेन विन्यसेत्॥ 9

गन्धपुष्पादिना पूज्य धारयेच्छिरसोपरि।

नानावाद्यसमायुक्तं नानापिञ्छसमायुतम्॥ 10

नानागेयसमायुक्तं नानादीपसमन्वितम्।

विमान --- क्षिणं कुर्यात् प्रविशेद्यागमण्डपम्॥ 11

In Public domain. Digitization Muthulakshmi Research Academy

प. 47

पुण्याहं वाचयेत्तत्र प्रोक्षयेदम्भसा ततः।
आचार्यश्च शुचिर्भूत्वा मन्त्रदेहसमन्वितम्। 12
स्थण्डिलं कारयेत् सम्यक् पूर्वोक्तेन विधानतः।
गन्धपुष्पादिनाभ्यर्च्य हृदयेन तु मन्त्रतः॥ 13
वेदिमध्ये न्यसेत्तत्र कुम्भं व्योमव्यापि समुच्चरन्।
यज्ञमूर्तिं प्रवक्ष्यामि एकवक्त्रसमन्वितम्॥ 14
चतुर्भुजं त्रिणेत्रं च सौम्यरूपसमन्वितम्।
पद्ममध्ये सुखासीनं जटामकुटसंयुतम्॥ 15
सर्वाभरणसंयुक्तं कृष्णापरशुधारिणम्।
वरदाभयहस्तं च दिव्याम्बरधरं हरम्॥ 16

In Public domain. Digitization Muthulakshmi Research Academy

प. 47

P.115. इत्थं रूपं शिवं ध्यात्वा गौरीं वै ध्याययेत्ततः।

द्विनेत्रा श्चरुवदना द्विदेजा श्च सुयौवनम्॥ 17

प्रसान्तमनसा श्चैव किंचित्प्रहसिताननाम्।

सर्वाभरणसंयुक्तां वर्धनी मध्यमे न्यसेत्॥ 18

प्रासादद्वारवत्कृत्वा यागमण्टपमेवच॥

द्वारस्याभिमुखश्चैव विन्यसे द्यागमूर्तिनम्॥ 19

वर्धनी विन्यसेद्वामे गौरीबीजेन मन्त्रतः।

पूर्वादीशानपर्यन्तमष्टकुम्भान् क्रमान्न्यसेत्॥ 20

सवस्त्रान् सापिधानांच सहिरण्यान् सकूर्चकान्।

वेदिकाश्चै(व): दिग्भागे शलं वै स्थापयेत्ततः॥ 21

In Public domain. Digitization Muthulakshmi Research Academy

प. 47

अनन्ता दिशिखण्डन्तान् विन्यसेत् घटमध्यमे।

अर्चयेद्गन्धपुष्पाद्यैः स्वस्वनामैर्विशेषतः॥ 22

वज्रं शक्तिं च दण्डं च खड्गं पाशं तथाङ्कुशम्।

गदा त्रिशूलं पद्मं च चक्रं चेति दशायुधम्॥ 23

पूर्वादीशान दिग्भागे पूजयेत् स्वस्वमन्त्रकैः।

पद्मास्त्रं नैरृते भागे चक्रं चैशानगोचरे॥ 24

दर्पणं पूर्णकुम्भं च वृषभं युग्मचामरम्।

श्रीवत्सं स्वस्तिकं शङ्खं दीपो देवाष्टमङ्गलम्॥ 25

पूर्वादीशान पर्यन्तं विन्यसेद्देशिकोत्तमः।

गन्धपुष्पादिनाभ्यर्च्य तत्तत्स्वनाममन्त्रतः॥ 26

In Public domain. Digitization Muthulakshmi Research Academy

प. 47

द्वारकुम्भान् न्यसेत् पश्चात् स्वस्वमन्त्रेण वाचयेत्।

ततो होमं प्रकुर्वीत लक्षणेन तु देशिकः॥ 27

सायं प्रात हुतं कुर्याद्धोमद्रव्यसमायुतम्।

समिधाज्य चरुल्लाजान् सर्षपाश्च यवांस्तिलान्॥ 28

वेणुमुद्गश्च शालिंच दशद्रव्यमिहोच्यते।

समिधा सद्यमन्त्रेण आज्यं वामेन हूयते॥ 29

अघोरेण चरुं हुत्वा लाजं पुरुषेण तु।

सर्षपं ईशमन्त्रेण यवान् हृदयमन्त्रतः॥ 30

तिलं वै शिखया हुत्वा ... वणवा कवचेन तु।

नेत्रेण मुद्गलं हुत्वाथ शालीनास्त्रेन होमयेत्। 31

In Public domain. Digitization Muthulakshmi Research Academy

प. 47

अष्टोत्तरं शतं वापि पञ्चाशत्पञ्चविंशति।
हुत्वा चैव विशेषेण द्रव्यं प्रति विशेषतः॥ 32
द्रव्यान्ते व्याहृतिं हुत्वा परिषेचनमारभेत्।
सर्वद्रव्यसमायुक्तं हव्यवाहं समुच्चरन्॥ 33
स्विष्टमग्नेति मन्त्रेण जुहुयात्तदनन्तरे।
P 116. जयादिरभ्याधानञ्च राष्ट्रभृच्च क्रमाज्जुहेत्॥ 34
यागेश्वरादिदेवानां नैवेद्यं दापयेत्ततः।
कुर्यादध्ययनं तत्र चत्वारो वेदपारगान्॥ 35
प्रासाद मन्त्रं जप्त्वा तु स्तोत्रं जप्वा तु विशेषतः।
सायंप्रातर्बलिं दद्याद्धोमान्ते तु विशेषतः॥ 36

In Public domain. Digitization Muthulakshmi Research Academy

प. 47

॥ बलिविधिः ॥

बलिक्रमविधिं वक्ष्ये शृणुष्व कमलासन।

अन्नलिङ्गं प्रकर्तव्यं पूर्ववल्लक्षणान्वितम्॥ 37

चतुर्भुजं त्रिणेत्रं च दक्षिणे चैव शूलधृक्।

पाशं वामकरे चैव अभयं दक्षिणे करे॥ 38

वरदं वामहस्तं तु रौद्ररूपसमन्वितम्।

एवं पाशुपतं ध्यात्वा बलिलिङ्गं सुयोजयेत्॥ 39

बलिपात्रे न्यसेदन्नं सर्वद्रव्यसमायुतम्।

प्रथमं विघ्नरात्रं तु द्वितीयं भूतरात्रकम्॥ 40

तृतीयं ब्रह्मरात्रं तु चतुर्थं गान्धमुच्यते।

पञ्चमन्त्विन्द्ररात्रं स्यात् षष्ठं वै ऋषिरात्रकम्॥ 41

In Public domain. Digitization Muthulakshmi Research Academy

प. 47

सप्तमं वैष्णवं प्रोक्तमष्टमं राक्षसं तथा।

नवमं शैवमित्याहुरित्येते रात्रिदेवताः॥ 42

सप्ताहे चैव विप्रेन्द्र ब्रह्मरात्राधिदैवताः।

पञ्चाहे तु प्रकर्तव्यमिन्द्ररात्राधिवर्धयेत्॥ 43

त्र्यं चैवोत्सवं तत्र कारयेद्वैष्णवादिकम्।

एकाहमुत्सवे चैव शिवरात्रमिति स्मृतम्॥ 44

बलिद्रव्यमहं वक्ष्ये श्रृणुष्व कमलासन।

शुद्धान्नं दधिसंयुक्तमपूपं लड्डुकान्वितम्॥ 45

प्रथमेऽहनि दातव्यं विष्णुमन्त्रं समुच्चरन्।

पद्मपुष्पञ्च रजनील ... पायससंयुतम्॥ 46

In Public domain. Digitization Muthulakshmi Research Academy

प. 47

द्वितीयेऽहनि दातव्यं भूतमन्त्रं समुच्चरन् ।

पद्ममूलं कुशाग्रं च शाल्यन्नं घृतमिश्रकम् ॥ 47

तृतीयेऽहनि दातव्यं ब्रह्ममन्त्रमनुस्मरन् ।

हरिद्रान्नं सर्पिश्च नाळिकेरफलैर्युतम् ॥ 48

चतुर्थेऽहनि दातव्यं गन्धर्वमन्त्रमुच्चरन् ।

इन्द्रवल्ली हरिद्रान्नं प्रियङ्गु घृतसंयुतम् ॥ 49

पञ्चमेऽहनि दातव्यमिन्द्रमन्त्रमनुस्मरन् ।

गुळोदनं च सर्पिश्च कदळीपनससंयुतम् ॥ 50

षष्ठमेऽहनि दातव्य मृषीणामन्त्रमुच्चरन् ।

P. 117. गुळोदनं घृतं युक्तं बृहतीफलसंयुतम् ॥ 51

In Public domain. Digitization Muthulakshmi Research Academy

प. ४७

सप्तमेऽहनि दातव्यं वैष्णवं मन्त्रमुच्चरन् ।

माषान्नं घृतसंयुक्तं मांसच्छूपसमन्वितम् ॥ 52

अष्टमेऽहनि दातव्यं राक्षसं मन्त्रमुच्चरन् ।

शुद्धान्नं दधिसंयुक्तं लाजापूपसमन्वितम् ॥ 53

कदलीफलसंयुक्तं घृतेनैव परिप्लुतम् ।

नवमेऽहनि दातव्यं शिवमन्त्रमनुस्मरन् ॥ 54

कुक्कुटाण्डप्रमाणेन बलिं दद्याद्विशेषतः ।

ब्रह्मादीशानपर्यन्तं बलिपीठे बलिं क्षिपेत् ॥ 55

यन्त्रपीठं प्रकर्तव्यं तालमात्रप्रमाणतः ।

मात्राङ्गुलेन कर्तव्यं विस्तारायामन्तु तत्समम् ॥ 56

In Public domain, Digitization Muthulakshmi Research Academy

प. ४७

षडङ्गुलं तदुत्सेधं मेखलात्रयसंयुतम्।
मेखलोच्चद्वयङ्गुलयं वेशनं तावदेव तु ॥ 57

यन्त्रपीठमिदं प्रोक्तं मिदमन्यच्छृणुष्वथ।
हस्तमात्रं तु विस्तारमुत्सेधं नालमात्रकम् ॥ 58

त्रिमेखलासमं कृत्वा उत्सेधं तु विधीयते।
विस्तारं तु त्रिधा कृत्वा ह्येकैकद्विद्विहस्तकम् ॥ 59

मृद्भिर्वा याज्ञिकैर्वापि कृत्वा पीठं विशेषतः।
रङ्गुष्वारूढतो वापि रथे ग्रामौ व्रजेत्ततः ॥ 60

बलिक्रममहं वक्ष्ये श्रृणुष्व कमलासन।
प्रथमे तु पताकंच द्वितीये वाद्यकास्तथा ॥ 61

In Public domain. Digitization Muthulakshmi Research Academy

प.47

तृतीये समधी प्रोक्ता श्चतुर्थे शूलमुच्यते।
पञ्चमे वान्नालिङ्गं तु वितानवस्त्रसंयुतम्॥ 62
दशायुधानि परितद्धारयेच्छिरसोपरि।
धूपदीपसमायुक्तं घण्टारव समन्वितम्॥ 63
ह्यवमेव क्रमेणैव बलिं कृत्वा तु देशिकः।
चण्डरुद्राय गोस्थाने व्याप्य ... द्रायच॥ 64
कूपे तु शङ्कुकर्णं स्यात् गङ्गायाश्च नदी तथा।
क्षेत्रेषु क्षेत्रपालं स्यात् सभास्थाने सरस्वती॥ 65
दुर्गा ज्येष्ठा बलिं दद्यात् गोपुरे भीमरुद्रकम्।
आद्यालये महामोटी बलिं दद्याद्विशेषतः॥ 66

In Public domain. Digitization Muthulakshmi Research Academy

प.47

प्रणवादिनमोऽन्तं च बलीनां पदमध्यमम् ।

बलिं दद्याद्विशेषेण सर्वलोकसुखावहम् ॥ 67

एवमेव बलिं कुर्यात् बलिपीठे विनिक्षिपेत् ।

बलिपीठे तु विप्रेन्द्र अन्नलिङ्गं विशेषतः ॥ 68

P.118 कौतुकं बलिदानान्तं कुर्यात् ग्रामप्रदक्षिणम् ।

यन्त्ररङ्गं समायुक्तं नानाविधैरनेकशः ॥ 69

नानाजनपदैर्युक्तं नानाध्वजसमन्वितम् ।

नानावाद्यसमायुक्तं नानापिञ्छसमन्वितम् ॥ 70

प्रथमे च पताकाश्च द्वितीये वाद्यकद्यथा ।

तृतीये डोलयन्त्रं च अश्वयन्त्राश्चतुर्थके ॥ 71

In Public domain. Digitization Muthulakshmi Research Academy

प. 47

पञ्चमे नृत्तयन्तांश्च तद्यष्टितरातकान्।

सप्तमे तु सुखासीनमष्टमे कोल्कको ततः॥ 72

नवमे तु वृषण - - - - - - - - दशमे ततः।

गङ्गाधरन्तथै द्वादशं नृत्तरूपकम्॥ 73

भिक्षाटनं तदन्ते तु अर्धनारी श्चतुर्दश।

चन्द्रशेखरमेवोक्तं पञ्चदशं विशेषतः॥ 74

षोडशे हरिरर्धं तु तदन्ते कालहा व्रजेत्।

तदन्ते त्रिपुरघ्नस्तु अषादश विशेषतः॥ 75

बिम्बकोर्ध्वे तु विप्रेन्द्र उमास्कन्दहितं व्रजेत्।

चण्डेश्वरं तु विंशञ्च दन्ते महेश्वरान् विदु॥ 76

In Public domain. Digitization Muthulakshmi Research Academy

प. 47

ग्रामप्रदक्षिणं कृत्वा बलिदानस्य देशिकः।
अन्यदेशे न कर्तव्यं मश्रुत्वात् कदाचन॥ 77
आलयं प्रविशेद्विद्वान् परिवेषमथोच्यते।
मण्डपं कारयेत्तत्र प्रपां वापि कारयेत्॥ 78
दक्षिणापिमुखो वापि पूर्वापि मुखेववा।
प्रासादस्याग्रतो वापि दक्षिणे चोत्तरेऽथवा॥ 79
महामर्यादौ मर्यादौ कुर्या नोदमण्डपम्।
कौतुका विन्यसेत्तत्र निर्माल्यं च विसर्जयेत्॥ 80
स्नानं कुर्यात्तु विप्रेन्द्र गन्धपुष्पादिनार्चयेत्।
देवस्य दक्षिणे भागे आग्ने चैव तु देशिकः॥ 81

In Public domain. Digitization Muthulakshmi Research Academy

प. 47

उत्तरे नृपतिं विद्यात् द्वौ पार्श्वौ योषिता न्यसेत्।
नर्दको मर्दकाद्या मुत्तरे गायवंशकः॥ 82
दक्षिणे नैव तु शवाना मुत्तरे समयान् स्थितान्।
देवस्य सन्निधौ चैव गणिका नृत्तसंयुतान्॥ 83
तत्काले चैव विप्रेन्द्र पूर्वोक्तविधिना सह।
रक्षादीपं प्रकर्तव्यं दिनदेवाय शूलिने॥ 84
अर्चयेद्गन्धपुष्पाद्यैर्दद्याद्वै धूपदीपकम्।
लवणञ्चैव पुष्पाद्यैः पुष्पमर्घ्यं तथैव च॥ 85
पृथक्पात्रे विनिक्षिप्य गणिका धारयेत्क्रमात्।
P.119. रक्षादीपं शिवे दद्यात् बलिपीठे विसर्जयेत्॥ 86
एवमेव प्रकारेण दिनं प्रति समाचरेत्।

इति वीरतन्त्रे अधिवासनविधि
सप्तचत्वारिंशत्पटलः॥

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 48.

॥ यात्राकौतुकबन्धनविधिपटलः॥

वैष्णवे दिवसे चैव नृत्तरूपं प्रदर्शयेत्।
राक्षसानां तु दिवसे वनयात्रां समारभेत्॥ 1
पूर्वादीनि चतुर्दिक्षु गम्यतां ······ वन।
त्रिपुरान्तकरूपं तु श्चेदो युतयकन्धरेत्॥ 2
युद्धारम्भप्रभावेन सर्वयुधधराजनाः।
केचिद्धनुर्धराश्चैव केचिद् खड्गधरास्तथा॥ 3
केचित्तोमरहस्ताश्च केचित् गदाधराः।
एवमेव दिवाकुर्याद्रात्रौ कौतुकबन्धनम्॥ 4
सौवर्णं रजतं वापि क्षौमं कार्पासमेववा।
कौतुकं चैव शूलं च बन्धयेत् कौतुकं दृढ॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 48

शिवाग्रे मण्डपे चैव - - - - - - नावरिरेत्ततः।

स्थालिकां विन्यसेत्तत्र तण्डुलानुपरिन्यसेत॥ 6

तस्योर्ध्वे कौतुकं न्यस्य प्रोक्षयेद्धृदयेन तु।

गन्धपुष्पादिनाभ्यर्च्य प्रासादेन तु मन्त्रतः॥ 7

शूलेनैव समायुक्तं कुर्याद्ग्राम प्रदक्षिणम्।

नानादीपसमायुक्तं नानावाद्यसमन्वितम्॥ 8

प्रविशेदालयं तत्र कौतुकं बन्धयेद्धृदा।

पूर्वोक्तेन तु मन्त्रेण शूलं वै बन्धयेत्ततः॥ 9

तत्तु विप्रेन्द्र मानस्तोकेति मन्त्रतः।

तीर्थसंग्रहणं कुर्याच्छिवाग्रे मण्डपं ततः॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प. 48

शालिना स्थण्डिलं कृत्वा दर्भैश्चैव परिस्तरेत्।
मध्यमे विन्यसेत्कुम्भं (स)? वस्त्रं सापिधानकम्॥ 11
पूर्वादीशानपर्यन्तं कलशानष्ट विन्यसेत्।
हेमं तत्रैव निक्षिप्य गन्धपुष्पादिनार्चयेत्॥ 12
समुद्रे वापि नद्यां वा तटाके वा विशेषतः।
तिले समतलं कृत्वा स्थापये ···· स्ततः॥ 13
अनन्तादि शिखण्ड्यन्ता विद्येश्वरांश्च विन्यसेत्।
दिक्बन्धेन तु कर्तव्यमस्त्रमन्त्रेण देशिकः॥ 14
आवाहयेत्तु तीर्थां च पुण्यस्थानं तथैव च।
साधितै[ः] कलशैस्तत्र शूलं वै स्थापयेत्ततः॥ 15
प्रविशेदालयं तत्र गन्धपुष्पादिनार्चयेत्।
इति वीरतन्त्रे यात्राकौतुकविधि.

अष्टचत्वारिंशत्पटलः॥

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 49

P.120. ॥ अथ चूर्णोत्सवविधिपटलः॥

चूर्णोत्सवं प्रवक्ष्यामि शृणुष्व कमलासन।

कौतुकबलिदानान्ते कुर्याद्ग्राम प्रदक्षिणम्॥ 1

पश्चात् चूर्णोत्सवं कुर्यात् प्रासादाग्र ततोऽपि वा।

कौतुकस्याग्रतो वापि चूर्णमभ्युक्ष्य लूखलेत्॥ 2

वायव्यां दिशि दिग्भागे वामे कौतुक ये वि वा।

गोमयालेपनं कृत्वा स्थण्डिलं शालिना कुरु॥ 3

अष्टद्रोणसमायुक्तं तदर्धं तण्डुलान्न्यसेत्।

पक्वामष्टदलं न्यस्य दर्भैश्चैव परिस्तरेत्॥ 4

तस्याग्रे स्थण्डिलं कृत्वा लूखलं च विशेषतः।

प्लक्षोदुम्बरमश्वत्थं मदं वै नवतु लूखलम्॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 49

मंसलन्दायसे - - - - - - - - - - - - - न बन्धयेत्।

क्षालयेदस्त्रमन्त्रेण स्थापयेद्धृदयेन तु ॥ 6

वस्त्रेणैव समाच्छाद्य स्वर्णेनैव तु शोसितुम्।

लूरवल - - - - - - न्येस्य मध्येन हृदयेन तु ॥ 7

व्योमव्यापिं समुच्चार्य चूर्णयेद्देशिकोत्तमः।

- - - - व्यजनैर्युक्तं गणिका चूर्णयेत्ततः ॥ 8

सर्वगन्ध प्रवक्ष्यामि एलालवङ्ग संयुतम्।

तक्कोलं चैव जातीच गणिका चूर्णयेत्ततः ॥ 9

चूर्णं तु कलशे स्थाप्य सकूर्चान् सापिधानकान्।

सवस्त्रान् हेमसंयुक्तान् गन्धपुष्पादिनार्चयेत् ॥ 1

In Public domain. Digitization Muthulakshmi Research Academy

प. 49

चूर्णं तु शिरसा धार्या विमानप्रदक्षिणं कुरु।
मूलबिम्बे न्यसेत्तत्र चूर्णं चैव तु तैलकम्॥ 11
कौतुकं चास्त्रराजानं हृदयेनैव दापयेत्।
भक्तानां परिवाराणां चूर्णं दद्याद्विशेषतः॥ 12
ग्रामप्रदक्षिणं कुर्याच्छूलचूर्णसमन्वितम्।
इन्द्रादिलोकपालानां चूर्णं दद्यात्तु देशिकः॥ 13
गेहं प्रविशयेत्तत्र तस्तीर्थं समाचरेत्।

इति वीरतन्त्रे चूर्णोत्सवविधि
एकोनपञ्चाशत् पटलः॥

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 50

॥अथ तीर्थविधिपटलः॥

तीर्थं चैव प्रवक्ष्यामि आलयाग्रे विशेषतः।

स्थण्डिलं शालिना कुर्यात् तण्डुलैस्तिलसंयुतम्

नव कुम्भान् समादाय पूजयेत् गन्धतोयकैः।

गौरीबीजेन मन्त्रेण वर्धनीं तस्य वामतः॥ 2

स्थापयित्वा तु विप्रेन्द्र विद्येश्वरसमन्वितम्।

P.121. स्वस्वनाम्नेन मन्त्रेण पूजयेत्तु विशेषतः॥ 3

कलशां शिरसा धार्या अष्टमङ्गलचास्त्रकम्।

कौतुकं शिवसंयुक्तं कुर्याद्ग्रामप्रदक्षिणम्॥ 4

समुद्रे वा तटाके वा नद्यां वापि विशेषतः।

तीरे समतलं कृत्वा शालिना स्थण्डिलं कुरु॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 50

प्रतिमां विन्यसेत् तत्र तस्याग्रे कलशं न्यसेत्।

अर्चयित्वा तु गन्धाद्यैश्शूलं कलशसंयुतम्॥ 6

आभ्ययदेव सर्वांश्च तीर्थानाहूय सर्वशः।

कौतुकं च विसृज्यैव प्रतिमं शूलमेव च॥ 7

शूलं वै स्नापयेत्कुम्भै जलक्रीडां च कारयेत्।

सह स्नानन्तु यो मर्त्यस्सर्वपापाद्विमुच्यते॥ 8

गेहं प्रविशयेत्तत्र यागशालां प्रवेशयेत्।

पूर्णाहुतिं च कृत्वा तु अग्निञ्चैव विसर्जयेत्॥ 9

वेद्यां साधितकुम्भैश्च स्नापयेच्छिवमादरात्।

स्नपनं कारयेत्तत्र लक्षणेन समन्वितम्॥ 10

In Public domain: Digitization Muthulakshmi Research Academy

प. 50

विशेषात् पूजनं कृत्वा शिवस्य पुरतोऽपिवा।

तद्रात्रौ चैव विप्रेन्द्र बलिं दद्याद्विशेषतः॥ ॥

अस्त्रमन्त्रेण विप्रेन्द्र शूलेनैव तु छेदयेत्॥।

अपूपेन समायुक्तं - - - - - - - - - - - - - - -॥ 12

सन्धिञ्चतुष्पथे चैव देवा - - - - - शानके॥।

उद्याने चैव तु पेच वने - - - - वैराग्मना॥ 13

बलिं दद्याद्विशेषेण राजराष्ट्रसुखावहम्॥।

इति वीरतन्त्रे तीर्थविधि-

पञ्चाशत्पटलः॥

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 51

(॥ ध्वजावरोहणविधिः ॥)

ध्वजावरोहणं वक्ष्ये यथावदनुपूर्वशः ।
तीर्थाहे वा तृतीये वा पञ्चाहे सप्तमेऽपि वा ॥ 1

ध्वजा(व)?रोहणं कुर्यात् चण्डयागसमन्वितम् ।
सप्ताहात्परमश्चैव स्नपनं तत्र कारयेत् ॥ 2

शान्तिहोमं ततः कुर्यात् ध्वजा(व)?रोहणं कुरु ।
चण्डेशाश्चग्रतश्चैव गोमयेनानुलेपयेत् ॥ 3

शालिना विकिरेत्तत्र शाल्यर्धं तण्डुलैरपि ।
तिलान्विन्यस्य विप्रेन्द्र दर्भैश्चैव परिस्तरेत् ॥ 4

पद्ममष्टदळं लिख्य प्रोक्षयेद्धृदयेन तु ।
नवकुम्भान् समादाय सूत्रेण परिवेष्टयेत् ॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 51

गन्धोदकेन संपूज्य चण्डमन्त्रमनुस्मरन्।

P.122 स्नापयेच्चैव चण्डेशं चण्डमन्त्रेण बुद्धिमान्॥ 6

नैवेद्यं दापयेत्पश्चात् ताम्बूलं दापयेत्ततः।

चण्डेशस्याकृतिं कृत्वा ब्रह्मचारी शुचिर्भवेत्॥ 7

नववस्त्रपरीधानस्सोष्णीषस्सोत्तरीयकः।

पुष्पमाल्यैरलंकृत्य गन्धचन्दनकादिभिः॥ 8

भोजयेच्चैव विप्रेन्द्र सर्वोपदंशसंयुतम्।

अंकहस्तसमायुक्तं भस्मोद्धूलितविग्रहम्॥ 9

चण्डमन्त्रं न्यसेत्तत्र ध्वजंस्थाने प्रवेशयेत्।

शिबिकोर्ध्वे न्यसेत्तत्र ध्वजस्थाने प्रवेशयेत्॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प. 51

शिबिकोर्ध्वे न्यसेत्तत्र चण्डेशप्रतिमन्त्रतः।

ध्वजाग्रे स्थाण्डिलं कृत्वा स्थापयेत कल [शा]? ... न्नव॥ 11

सवस्त्रं सहिरण्यं च सकूर्चं सापिधानकम्।

वृषमन्त्रमनुस्मृत्य ध्वजं वै स्थापयेत्ततः॥ 12

मुद्गान्नं दापयेत पश्चात् वृषबीजमनुस्मरन्।

दिशां बलिं ततः कृत्वा ध्वजाश्चैव विसर्जयेत॥ 13

ध्वजावरोहणं कृत्वा हृदयेन तु मन्त्रतः।

टंकोच्छेदयेत्तत्र ध्वजवेदीं विशेषतः॥ 14

श्रत्नदेवसमायुक्तं ततो ग्रामबलिं ददेत्।

लाजासक्तुसमायुक्तं हरिद्रान्नं दधिसंयुतम्॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

प. 51

सर्वोपदंशसंयुक्तं बलिं दद्याद्विशेषतः।
सन्धिस्थं पीठमुद्वास्य टङ्केनैव तु छेदयेत्॥ 16
प्रविश्य भवनं पश्चात् बलिपीठे बलिं क्षिपेत्।
आचार्यश्चैव विप्रेन्द्र पादप्रक्षालनं कुरु॥ 17
स्नपनं कारयेत्तत्र लक्षणेन समन्वितम्।
आचार्यं पूजयेत्तत्र वस्त्रधान्यादिकाञ्चनैः॥ 18
भक्तानां परिचाराणां वस्त्रादीनि प्रदापयेत्।
गणिकाश्चैव दासीनां दक्षिणां दापयेत्ततः॥ 19
एवं यः कुरुते मर्त्यश्चोत्सवं विधिपूर्वकम्।
कुलैकविंशमुद्धृत्य शिवलोकं स गच्छति॥ 20

In Public domain. Digitization Muthulakshmi Research Academy

प. 51

वेवितांश्च मनुष्यांश्च गजाश्वादीनि सर्वशः।

गच्छेच्छिवपुरं दिव्यं यावन्तोद्भूतिसंप्लवम्॥ 21

शिववत्मोदते सर्वमिति शास्त्रस्य निश्चयः।

उत्सवस्य विधिः प्रोक्तं प्रायश्चित्तविधिं शृणु॥ 22

इति वीरतन्त्रे षट्सहस्रसंहितायां

: (उत्सवविधि).

ध्वजावरोहण विधि प्राकपञ्चाशत-

पटलः॥

In Public domain. Digitization Muthulakshmi Research Academy

अथवा दारुणा चैव अन्तःपुरं प्रकल्पयेत ।
पूजयेच्चैव विप्रेन्द्र प्रासादं कारयेत्ततः ॥ 6
प्रासादं भिन्नमेव स्यात् पूर्वेण शिरं भवेत् ।
आग्नेय्यां वह्निना दग्ध्यं दक्षिणे मरणं भवेत् ॥ 7
नैरृत्यां धनलाभं च वारुण्यां धान्यमेव च ॥
वायव्यां बन्धुबुद्धिं स्यादुत्तरे पुत्रवर्धनम् ॥ 8
ऐशान्यां शिवमाप्नोति एवमेव क्रमेण तु ॥
खात्वं व्यपोह्य सर्वं तु सकलं केन्नबन्धयेत ॥ 9
पुण्याहं वाचयेत्तत्र स्नपनं कारयेत्ततः ।
प्रासादं नष्टमेवं स्यात् प्रासादं चैव कारयेत ॥ 10

Public domain. Digitization Muthulakshmi Research Academy

T-30

पटलः 52.

P-123.

॥अथ प्रायश्चित्तविधिपटलः॥

शिवं प्रणम्य विधिवत् ब्रह्मा वचनमब्रवीत्।
प्रायश्चित्तं कथं देव तत् सर्वं ब्रूहि मे प्रभो॥ 1

साधु साधु महाप्राज्ञ यन्त्वया परिचोदितम्।
तत्सर्वमखिलं वक्ष्ये शृणुष्व कमलासन॥ 2

प्रायो विनाश इत्यर्थश्चित्तं सन्तानमुच्यते।
विनाशस्य तु संधानं प्रायश्चित्तमिति स्मृतम्॥ 3

प्रमादात् बुद्धिवैषम्यात् द्रव्याणां च परीक्षयात्।
अकृतानां विनष्टानां प्रायश्चित्तं विधीयते॥ 4

प्रासादे पतिते भिन्ने बालस्थानं तु कारयेत्।
प्रासादं पूर्ववत् कृत्वा जलसंप्रोक्षणं कुरु॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 52

स्थापयेल्लक्षणैर्युक्तमिदमन्य शृणुष्वथ।
पूर्वस्थानगतं लिङ्गमन्यस्थानगतं भवेत्॥ 11
तल्लिङ्गं च विसर्ज्याथ नवलिङ्गं प्रतिष्ठितम्।
पूर्वदेशे न चल लिङ्गं किञ्चिदेव तु संस्थितम्॥ 12
स्वस्थाने स्थापयेद्विद्वाञ्जलसंप्रोक्षणं कुरु।
लिङ्गं पीठमेवं वा स्फुटिते दग्धमेव वा॥ 13
बालस्थानं प्रकर्तव्यं पूजां कुर्वीत देशिकः।
व्यपोह्येव तु तल्लिङ्गं स्थापयेन्नवलिङ्गकम्॥ 1
नद्यां वापि गर्जैर्वाथ उद्धरेच्छ तदण्डकम्।
तल्लिङ्गं स्थापयेद्यन्य देशि लक्षणसंयुतम्॥

प. 52

सूतकैः प्रेतकैश्चैव शवैर्वा स्पृश्यते ततः।

जलसंप्रोक्षणं कुर्याल्लक्षणेन समन्वितम्॥ 16

अष्टबन्धविहीनं तु कारयेदष्टबन्धनम्।

गुळ स्लाक्षामधूच्छिष्टं सर्जरस्समन्वितम्॥ 17

P. 124 लिङ्गश्चैवान्यजातीनां स्पर्शयेत . . . . . ।

जलसंप्रोक्षणं कुर्यात् समीपे स्नपनं भवेत्॥ 18

गर्भगेहे सुधाहीने सुधाकर्म समाचरेत्।

शान्तिहोमं ततः कुर्यात् स्नपनं तत्र कारयेत्॥ 19

प्रतिमस्याङ्गहीनं तु शिल्पिना कारयेत्ततः।

योजयेत्प्रातिमं विप्र स्नपनं तत्र कारयेत्॥ 20

In Public domain. Digitization Muthulakshmi Research Academy

प. 52

प्रतिमन्त्रैव देवेशं परितो वीश्वरैर्युतम।

शयने शाययेत् बिम्बं परितो होममाचरेत्॥ 21

हुत्वा प्रतिष्ठा मार्गेण स्थापयेत्तद्देवच।

पीठं वापि प्रभां हीनां शिल्पिना कारयेत्ततः॥ 22

योजयेत् प्रतिमां विप्र स्नपनं तत्र कारयेत।

आयुधानि मृगाद्यानि आभरणानि तु चैव हि॥ 2

भिन्ने च स्फुटिते चैव प्रमादाच्छेदनेऽपि च।

पूर्ववत् कारयेद्धोमा च्छिल्पिना च तथैवच॥ 2

जलसंप्रोक्षणं कृत्वा शान्तिहोमं तु कारयेत।

उत्सवेषु च कालेषु प्रमादमेव तु संभवेत्॥ 2।

In Public domain. Digitization Muthulakshmi Research Academy

प. 52

सद्यो गन्धादिना पूज्य शिवमष्टशतं जपेत् ।

शैववीथिंन्ततो गत्वा आलयं प्रविशेत्ततः ॥ 26

पूर्ववत् पारिमान्या वा संप्रोक्षणादि कारयेत् ।

पुरणं लिङ्गे स्फुटिते भिन्ने छिन्ने तथैव च ॥ 27

ज्वरादिपीडनं कुर्यादुपशान्तिं करोति च ।

दिशाहोमं ततः कुर्याल्लक्षणेन समन्वितम् ॥ 28

चतुर्दिक्षु चतुर्वेदैः कुर्याद्ध्ययनं ततः ।

अष्टोत्तरशतप्रस्थः क्षीराभिषेकमुच्यते ॥ 29

सामेधाज्य चरूं लाजा सक्तुश्चैव तु हूयते ।

ईशान . . . . . . न्त ईशान्यां दिशि होमयेत् ॥ 30

In Public domain. Digitization Muthulakshmi Research Academy

प. 52

अष्टोत्तरशतं चैव होमयेद्देशिकोत्तमः।

स्नपनं कारयेत्तत्र अष्टोत्तरशतं ततः॥ 31

एवमेव क्रमेणैव सप्ताहं कारयेद्द्विज।

दिने दिनेच विप्रेन्द्र ब्राह्मणान् भोजयेत्ततः॥ 32

शैवान् भोजयेत्तत्र पर्यष्टि परिचारकैः।

आचार्यं भोजयेत्तत्र वस्त्रधान्यादिकाञ्चनैः॥ 33

दिनान्ते चैव विप्रेन्द्र रात्रौ ग्रामबलिं दद्यात्॥

मुद्गान्नन्दधिसंयुक्त - - - - - पत्रसंयुतम्॥ 34

ब्रह्मादीशानपर्यन्तं स्वस्वनामेन निक्षिपेत्।

P.125 ईशानान्ते बलिं कुर्याद्देवदेव क्रमेण तु॥ 35

In Public domain. Digitization Muthulakshmi Research Academy

प. 52

नित्यार्चना विहीने तु शान्तिहोमं तु कारयेत्।

सन्ध्यादिक्रमणञ्चैव द्विगुणं पूजयेत्ततः॥ 36

सन्ध्यास्व द्वित्रयो हीने पञ्चगव्याभिषेचनम्।

शान्तिहोमं ततः कुर्यात् तत्संख्या पूजयेच्छिवम्॥ 37

एकाहे त्रितये वापि पञ्चाहे वा विहीनके।

शान्तिहोमं ततः कुर्यात् स्नपनं तत्र कारयेत्॥ 38

दिशाहोमं-चार्धमासे तु स्नपनं चैव कारयेत्।

इति ऊर्ध्वं तु मास स्यात् जलसंप्रोक्षणं कुरु॥ 39

स्थिरलिङ्गमिदं प्रोक्तं चललिङ्गमथ श्रृणु।

In Public domain. Digitization Muthulakshmi Research Academy

प. 52 ॥ चललिङ्ग प्रायश्चित्तम् ॥ 39

ऽकाहाति विहीने तु द्विगुणं पूजयेत्ततः।
त्रिंशदा दिवसादूर्ध्वं स्नपनं कारयेत्ततः॥ 40
षण्मासात् परितो विप्र जलसंप्रोक्षणं कुरु।
नित्याग्नौ च विहीने तु द्विगुणं होममुच्यते॥ 41
नैवेद्यञ्च विहीने तु द्विगुणञ्च निवेदयेत्।
परिवारे तु विच्छिन्ने स्थापयेत् परिवारकान्॥ 42
तन्मन्त्रेण शतं हुत्वा स्नपनं कारयेत्ततः।
गर्भगेहे दीपहीनं पुण्याहं तत्र कारयेत्॥ 43
दीपं संयोजयेत्तत्र प्रासादेन तु मन्त्रतः।
नित्योत्सव दीपहीने तु पुण्याहं तत्र कारयेत्॥ 44

In Public domain. Digitization Muthulakshmi Research Academy

प. 52

पुनर्दीपं समायोज्य पुनर्नित्योत्सवं कुरु ।

शङ्खनृत्त विहीने तु स्नपनं तत्र कारयेत् ॥ 45

नित्योत्सवे चान्नलिङ्गं पतति हीनमेव वा ।

शान्तिहोमं ततः कुर्यान्नवलिङ्गं प्रकल्पयेत् ॥ 46

स्नपनं तत्र कर्तव्यं नित्योत्सवन्तत कुरु ।

प्रतिमे पतिते नापि स्नपनं तत्र कारयेत् ॥ 47

भिन्नत्र स्फटि . . . . ।

जलसंप्रोक्षणं कृत्वा पश्चान्नित्योत्सवं कुरु ॥ 48

वाद्यहीनं तु तत्काले शिवमन्त्रोत्तरं तु नेत ।

श्वानकाकादिभि स्पृष्टे लिङ्गे वा प्रतिमेऽपि वा ॥ 49

In Public domain. Digitization Muthulakshmi Research Academy

प. 52

पञ्चगव्येन संप्रोक्ष्य शान्तिहोमं तु कारयेत्।

काले चोत्सवहीने तु स्नपनं तत्र कारयेत्॥ 50

बलिकर्मविहीने तु स्नपने न्दिवसेन्तथा।

पञ्चाहे बलिहीने तु दिशाहोमं तु कारयेत्॥ 51

P. 126. पुनर्बलिक्रमं कुर्यात् पूर्वोक्तविधिना सह।

बलिद्रव्यविहीने तु द्विगुणं च प्रयोजयेत्॥ 52

ग्रामप्रदक्षिणे काले कौतुकं शूलमेव वा।

पतिते चैव विप्रेन्द्र अस्त्रमन्त्रेण देशिकः॥ 53

शिवमष्टोत्तरं जप्त्वा प्रदक्षिणं ततः कुरु।

भिन्ने वा अङ्गहीने तु प्रतिशूलं तथैव च॥ 54

In Public domain. Digitization Muthulakshmi Research Academy

प. 52

अस्त्रं कृत्वा तु दर्भेण प्रोक्षयेदस्त्रमन्त्रतः।
आवाह्य शूलं तत्रैव बलिशेषं समाचरेत्॥ 55
पूर्ववत् क्षालयेद् विप्र जलसंप्रोक्षणं कुरु।
अष्टमङ्गलरूपं वा आयुधं वा विहीनके॥ 56
तत्तन्मन्त्रेण होतव्यं अष्टोत्तरशतं पृथक्।
तत्स्वरूपं पुनः कृत्वा प्रोक्षयेत् पूर्ववत् क्रमात्॥ 57
ध्वजैर्वा पतिते भिन्ने छिन्ने नष्टेऽथवा पुनः।
स्नपनं तत्र कुर्वीत चण्डयागं तु कारयेत्॥ 58
मूर्तिहोमन्तु कर्तव्य ध्वजमुत्थापयेत् क्रमात्।
चण्डयागविहीने तु स्नपनं तत्र कारयेत्॥ 59

In Public domain. Digitization Muthulakshmi Research Academy

प. 52

स्नपने च तया (था?) हीने द्विगुणं स्नपनं भवेत्।
यागशालाविहीने तु शान्तिहोमं हुनेत्ततः॥ 60
तद्देशे दीपहीने तु शान्तिहोमं समाचरेत्।
दीपं तत्रैव संयोज्य तद्दोषशमनाय च॥ 61
द्विगुणं होमयेद्विप्र समिद्धीने विशेषतः।
गन्धपुष्पविहीने तु धूपहीने तथैव च॥ 62
पुण्याहं कारयेत्तत्र द्विगुणं दापयेत्ततः।
आचार्यस्तु विप्रेन्द्र प्रमादाद्व्याधिसंभवे॥ 63
अन्यैः प्रमादमुत्पन्ने स्नपनं कारयेत् बुधः।
पुत्रपौत्रादिना चैव तच्छिष्येण तु कारयेत्॥ 64

In Public domain. Digitization Muthulakshmi Research Academy

प. 52

पुरतो वृषभं हीनं शान्तिहोमं तु कारयेत् ।

वृषभं तत्र संस्थाप्य स्थापयेद्विधिना सह ॥ 65

बाह्यपीठे विहीने तु स्नपनं तत्र कारयेत् ।

शिल्पिना कारयेत्पीठं स्थापयेल्लक्षणैर्युतम् ॥ 66

परिवारार्चने हीने पुण्याहं कारयेत्ततः ।

पुनः पूजां समभ्यर्च्य तद्दोषशमनाय च ॥ 67

नैमित्तिकस्य कर्मां तु विच्छेदं संभवेदिह ।

पुण्याहं वाचयेत्तत्र पुनः कर्म समारभेत् ॥ 68

वारोत्सव विहीने तु शान्तिहोमं तु कारयेत् ।

P.127. स्नपनं तत्र कुर्वीत पुनर्वारोत्सवं कुरु ॥ 69

In Public domain. Digitization Muthulakshmi Research Academy

प. 52

अमावास्यां विहीने तु स्नपनं तत्र कारयेत् ।

शान्तिहोमं ततः कुर्यादमावास्यां पुनः कुरु ॥ 70

मासोत्सव विहीने तु शान्तिहोमं तु कारयेत् ।

स्नपनं तत्र कुर्वीत पुनर्मासोत्सवं कुरु ॥ 71

संक्रान्ति स्नपने हीने शान्ति होमं तु कारयेत् ।

प्राकारे मण्टपे वापि . . . . ॥ 72

पुण्याहं वाचयेत्तत्र पुनः स्नपनमाचरेत् ।

प्रासादे वाथ गर्भे वा वल्मीकं दृश्यते ततः ॥ 73

खनित्वा चास्त्र मन्त्रेण वालुकैः पूरयेत्ततः ।

शान्तिहोमं ततः कुर्यात् स्नपनं तत्र कारयेत् ॥ 74

In Public domain. Digitization Muthulakshmi Research Academy

प.52

प्राकारमण्डपे वापि प्रासादस्य समीपगे।

धर्माश्चतुर्दशान्दग्धं स्त्रीणाञ्च ऋतुसंभवे॥ 75

तत्काले पञ्चगव्यं तु तदेवं प्रोक्षयेत्ततः।

पुण्याहं कारयेत्तत्र स्नपनं कारयेत्ततः॥ 76

महाहविर्निवेदन्तु आचार्यं पूजयेत्ततः।

--- त बाल्यञ्च विप्रेन्द्र दोषहीनं भवेत्ततः॥ 77

पुण्याहं वाचयित्वा तु पुनर्दीप्यन्तु योजयेत्।

अग्निकुण्डे विहीने तु शान्तिहोमं तु कारयेत्॥ 78

पूर्ववद्धि न्यसेदग्निं तद्दोषशमनाय च।

होमगर्भे प्रतिष्ठायां प्रोक्षणे चोत्सवेऽपि वा॥ 79

अन्येषु सर्वकार्येषु दीक्षा······विहितो द्विजः।

शान्तिहोमं ततः कृत्वा स्नपनं तत्र कारयेत्॥ 80

In Public domain. Digitization Muthulakshmi Research Academy

प. 52

पुनर्दीक्षाभियुक्तं तु कारयेत् सर्वकर्मसु।
त्रैवर्णिककुले जाता स्त्रीणा ---- वसंयुतम्॥ 81
लिङ्गं वा कौतुकं वापि समीपे ऋतुसंभवेत्।
प्राकारे गोपुरे चैव पञ्चगव्येन शुद्ध्यति॥ 82
पुण्याहं कारयेत्तत्र शान्तिहोमं तु कारयेत्।
स्नपनं तत्र कर्तव्यं तद्दोषशमनाय च॥ 83
स्पृशेद्वापि -- विप्रेन्द्र जलसंप्रोक्षणं कुरु।
मन्त्रहीने क्रियाहीने द्रव्यहीनस्य कालके॥ 84
पुण्याहं वाचयेत्तत्र पुनः कुर्यात्तथैव च।
उपदंशादि विच्छिन्ने पुण्याहं वाचयेत्ततः॥ 85

In Public domain. Digitization Muthulakshmi Research Academy

प. 52

उपदंशं पुनर्दद्यात वस्त्रहीनं तु तद्वच।
पोठपूजाविहीने तु पुण्याहं वाचयेत्ततः॥ 86
P. 128 पुनः पूजा प्रकर्तव्यं पूर्वोक्तविधिना सह।
शुद्धनृत्तविहीने तु कुर्यात्स्नपनमुत्तमम्॥ 87
तत्काले गणिका चैव पातिते स्नपनं भवेत।
शान्तिहोमं ततः कुर्यात शुद्धनृत्तं तु कारयेत॥ 88
प्रासादे वान्तहारे वा मण्डपे वा तथैव च।
गणिका - - त्य वर्जे वा रज्जो दृष्टेन संभवे॥ 89
पुण्याहं कारयेत्तत्र स्नपनं कारयेत्ततः।
दिशाहोमं ततः कुर्यान्महाहविर्निवेदयेत॥ 90

In Public domain. Digitization Muthulakshmi Research Academy

प. 52

बहिर्प्राकारके चैव शावमुत्पाद्यते यदि।

पुण्याहं कारयेत्तत्र शान्तिहोमं तु कारयेत्॥ ९।

प्रायश्चित्तमिदं प्रोक्तं क्षीरस्नानं शृणुष्वथ।

इति वीरतन्त्रे प्रायश्चित्तविधि-

द्विपञ्चाशत्पटलः॥

In Public domain. Digitization Muthulakshmi Research Academy

पटल: 53

॥ अथ क्षीरस्नानविधिपटलः ॥

किं ···· धानो हि क्षीरस्नानविधिं परम्।
....

ातत्सर्वं समासेन वक्तुमर्हसि मे प्रभो॥ 1

तत्सर्वमखिलं वक्ष्ये श्रूयतां चतुरानन।

अना ·········· कालेषु ज्वरमारी प्रवर्तते॥ 2

महारोगे समुत्पन्ने युद्धारम्भे तथैव च।

शत्रूणां पीडने काले क्षीरस्नानं विधीयते॥ 3

उत्तमं कापिला क्षीरं मध्यमे श्वेतजं भवेत्।

अधमं रक्तजं प्रोक्तं स्नापयेद्देशिकोत्तमः॥ 4

नन्दा भद्रा सुरभिस्सुशीला समनस्तथा।

पञ्च गावस्समुत्पन्ना लोकानुग्रहकाम्यया॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 53

तासां वर्गेषु जातानां क्षीरं संग्राह्य देशिक।
क्षीरस्नानं त्रिधा प्रोक्तमुत्तमं मध्यमाधमम्॥ 6
धारोष्णपयसा चैव स्नापयेद्धृदयेन तु।
अधमं चैतदुद्दिष्टं मध्यमं च ततः शृणु॥ 7
गोक्षीरं गृह्य सर्वांश्च एकभाण्डे तु पूरयेत्।
शिवस्य पुरतो विप्र गोमयेनानुलेपयेत्॥ 8
शालिना स्थण्डिलं कृत्वा पुण्याहं वाचयेत्ततः।
सूत्रपादं प्रकर्तव्यं शास्त्रदृष्टेन तन्तुना॥ 9
चतुर्दशानि सूत्राणि पूर्वाभिमुखमेव च।
उत्तराग्रं तथा सूत्रं विन्यसेद्देशिकोत्तमः॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प. 53

मध्ये नवपदं स्थित्वा तत् बाह्येकं परित्यजेत्।

तद्बाह्यावरणात् बाह्ये पदमेकं तु ह्रासयेत्॥ 11

P.129. द्वारार्धञ्च तु दिक्षु पदमेकं तु ह्रासयेत्।

मध्यमे नवपदे चैव शालिना विकिरेत्ततः॥ 12

साल्यर्धे तण्डुलं न्यस्य तण्डुलार्धं तिलान्यसेत्।

परिस्तरे तु दर्भाभिः प्रोक्षयेद्धृदयेन तु॥ 13

सुदृढ निष्कलंकांश्च आढकेनैव पूरितान्।

कलशान् ग्राहयेत्तेन सूत्रेण वेष्टयेत्ततः॥ 14

क्षालयेद्वारिणा चैव ईशानेन तु प्रोक्षयेत्।

मध्यमे शिवकुम्भं तु क्षीरेणैवाभिपूरयेत्॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

प. 53

वर्धनीं तस्य वामे तु पूरयेत् क्षीरमेव च।
शिवबीजेन मन्त्रेण स्थापयेच्छिवकुम्भकम्॥ 16
गौरीबीजेन वर्धन्यां स्थापयेद्देशिकोत्तमः।
सवस्त्रं सहिरण्यं च सकूर्चं सापिधानकम्॥ 17
गन्धपुष्पादिनाभ्यर्च्य स्थापनं तु समारभेत्।
प्रथमावरणे चैव कलशानष्ट विन्यसेत्॥ 18
द्वितीयावरणे चैव विंशतिः कलशान्न्यसेत्।
तृतीयावरणे चैव षट्त्रिंशत् कलशान्न्यसेत्॥ 1
चतुर्थावरणे चैव चतुश्चत्वारिंकं भवेत्।
क्षीरेण पूरयेत् कुम्भान् सवस्त्रान् सापिधान-
कान्॥ 2

In Public domain. Digitization Muthulakshmi Research Academy

प. 53

विन्यसेत्तु विशेषेण देवतानां शृणुष्वथ।
प्रथमावरणे चैव विद्येश्वरांश्च विन्यसेत्॥ 21
द्वितीयावरणे चैव विघ्नेशस्तत्र देवता।
तृतीयावरणे चैव ब्रह्मा तत्राधिदेवता॥ 22
गन्धैः पुष्पैश्च धूपैश्च दीपैश्चैव निवेदयेत्।
ततो होमं प्रकर्तव्यं नवपञ्चैकमेव वा॥ 23
कुण्डं वा स्थण्डिलं वापि चतुरश्रं वृत्तमेव वा।
अग्निमुखं च संकल्प्य पूर्वोक्तेन क्रमेण तु॥ 24
समिधाज्यचरूं लाजान् सर्षपांश्च यवान्तिलान्।
मुद्गमाषसमायुक्तं नव द्रव्यमिहोच्यते॥ 25

In Public domain. Digitization Muthulakshmi Research Academy

प. 53

समिधातीशमन्त्रेण आज्यंच पुरुषेणतु।
अघोरेण चरुं हुत्वा लाजान् वामेन चैव हि ॥ 26
सर्षपान् सद्यमन्त्रेण यवान् हृदयमन्त्रतः।
तिलान् वै शिरमन्त्रेण मुद्गं तु शिखया युतम् ॥ 27
माषं नेत्रेण हुत्वाथ यथाक्रमेण हूयते।
अष्टोत्तरशतं हुत्वा तदर्धं पञ्चविंशति ॥ 28
हुतसंख्या इति प्रोक्ता द्रव्यान्ते व्याहृतिं हुनेत्।
P.130 घृतमीक्षेति मन्त्रेण जुहुयात्तदनन्तरम् ॥ 29
हुत्वान्ते यदस्येति पूर्णाहुतिमथाचरेत्।
आचार्यं पूजयेत्तत्र पदार्थान् पूजयेत्ततः ॥ 30

In Public domain. Digitization Muthulakshmi Research Academy

प. 53

प्रासादेन तु मन्त्रेण स्नापयेच्छिवकुम्भके।
गौरीबीजेन मन्त्रेण वर्धनीं स्नापयेत्ततः॥ 31
शेषान् कलशांश्चैव स्नापयेत्तु यथाक्रमम्।
पञ्चाशत्पञ्चविंशाद्धिः स्थापयेत् स्नपनोक्तवत्॥ 32
पूर्वोक्तविधिनानेन स्नापयेत् कलशं ततः।
दधिस्नानं प्रकर्तव्यं घृतस्नानं तु तद्वच॥ 33
क्षीराभिषेकमेवोक्तं कुण्डानां लक्षणं शृणु।

इति वीरतन्त्रे षट्सहस्रसंहितायां
क्षीराभिषेकविधिः त्रिपञ्चाशत्पटलः॥

In Public domain. Digitization Muthulakshmi Research Academy

पटल: 54

॥ अथ कुण्डलक्षणविधिपटलः ॥

देवदेवं प्रणम्यादौ पप्रच्छन् पितामहः ।
कुण्डानां लक्षणं किंचित् तत्सर्वं ब्रूहि मे प्रभो ॥ 1

...तेषां लक्षणं चैव आयुधानष्टमङ्कलान्
स्रुक्स्रुवाणां विधिं चैव श्रृणुष्व कमलासन ॥ 2

कुटी दहनमाचष्टे यन्त्राग्निरुसमिधाहुतिः ।
दहत्यशेषभावेन तत्कुण्डमिह संज्ञकः ॥ 3

प्रतिष्ठाद्युत्सवे काले जलसंप्रोक्षणं तथा ।
स्नपने दीक्षाकाले तु पवित्रारोहणादिषु ॥ 4

...वमादिषु कालेषु वर्त्तयेत्कुण्डमेव च ।
. . . . . . ले चैव दर्पणोदरवत् कृतम् ॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 54

त्रीणि सूत्राणि पूर्वाग्रमुदगग्रं तथैव च।
हस्तमात्रप्रमाणेन मात्राङ्गुलसमान्वितम्॥ 6
वर्तयेत् चतुरश्रं तु भावयेत्तत्क्रमेण तु।
योन्यादिसर्वकुण्डानि चतुरश्रे प्रजायते॥ 7
पूर्वे तु चतुरश्रमाग्नेयामश्वत्थपत्रवत्।
याम्यायामर्धचन्द्रं च नैर्ऋत्यां तु त्रिकोणकम्॥ 8
वारुण्यां वर्तुलं चैव वायव्यां पञ्चकोणकम्।
सौम्यायां सप्तकोणं तु ईशान्यामष्टकोणकम्॥ 9
एवमेव क्रमेणैव कुण्डानि वर्तयेत्ततः।
कर्णसूत्रस्य मोक्षांशं पश्चिमे विन्यसेत्ततः॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प. 54

वर्त्तयेत्तेन मानेन कोणान्तन्तु विशेषतः।

दक्षिणे चोत्तरे वृत्तं कारयेद्देशिकोत्तमः॥ 11

P. 131. सप्तांशं विभजेत् कर्णमिन्द्रेणैकांशकं न्यसेत्।

कोणादि तत्र सूत्रं च विन्यसेद्देशिकोत्तमः॥ 12

एवमेव क्रमेणैव कुण्डं योन्याकृतिर्भवेत्।

चतुरश्रस्य कर्णं तु ग्राहयेत्तु द्विजोत्तमः॥ 13

ततो विसृज्य क्षेत्रार्धं शेषं कुर्यात् त्रिभागिकम्।

भागमेकं न्यसेत् पूर्वे मध्यात् पूर्वादि भ्रामयेत्॥ 1

वर्तुलं कृतमेवं तु तत्रार्धं धनुरुच्यते।

अष्टभागकृतं क्षेत्रमेकभागं तु दक्षिणे॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

प. 54.

उत्तरे चैकभागं तु ऽाकभागं तु पूर्वके ।

- - - - - - - - व विप्रेन्द्र तेन मानेन सूत्रकम् ॥ 16

ऽावमेव क्रमेणैव त्रिकोणं प्रोच्यते क्रमात् ।

सप्तभागाकृतं क्षेत्रं विन्यसेत् पूर्वमेकशः ॥ 17

तस्मान्मध्यं गृहीत्वा तु वृत्तं कृत्वा तु देशिकः ।

कर्णार्धमष्टधा भित्त्वा कर्णार्धेन समन्वितम् ॥ 18

तेन मानेन प्राच्यादि पञ्चकोणं करोति हि ।

- - त्वाकोंशा तु क्षेत्रं स्यात् पूर्वमेकेन विन्यसेत् ॥ 19

तस्मान्मोध्य घ्रहीत्वा तु वृत्तकुण्डं करोति हि ।

क्षेत्रद्वात्रिंशदंशं तु क्षेत्रार्धेन तु योजयेत् ॥ 20

In Public domain. Digitization Muthulakshmi Research Academy

प. 54

मध्यात् कर्णं गृहीत्वा तु चतुर्दिक्षु च लाञ्छयेत् ।
लाञ्छनमत् कोणकं गृह्य ग्रातदभ्यन्तरस्य तु ॥ 26
अष्टकोणं प्रकर्तव्यं सूत्रमानेन देशिकः ।
अथवान्यत्प्रकारेण कुण्डं कुर्यात्तु देशिकः ॥ 27
यावदश्रं भवेत्पीठं तावदश्रं तु कुण्डलम् ।
मेखलां च प्रकर्तव्यं विस्तारोत्सेधतस्समम् ॥ 28
ऊर्ध्वे तु चतुरङ्गुल्यं मध्यमं तु त्र्याङ्गुलम् ।
P. 132 अधस्ता मेखला विप्र द्व्यङ्गुल मिहोच्यते ॥ 29
योनिं प्रकल्पयेद्विद्वा मेखलोपरि देशिकः ।
विस्तारं चतुरङ्गुल्यं सप्ताङ्गुलं तु दैर्घ्यकम् ॥ 30

In Public domain. Digitization Muthulakshmi Research Academy

प. 54

सप्ताश्रं कुण्डमित्युक्तं प्रागादि विन्यसेत्ततः।
वसुभागन्द्री कृतं क्षेत्र दक्षिणे चार्धभागतः॥ 21
उत्तरे चार्धभागं तु विन्यसेद्देशिकोत्तमः।
तस्मान्मध्यं गृहीत्वा तु कृत्वा षट्कोणमेव च॥ 22
पूर्वे च पश्चिमे चैव द्वौ द्वौ कर्णमिहोच्यते।
दक्षिणे चोत्तरे चैकं कोणमित्यभिधीयते॥ 23
पूर्व‥ द्वृत्तकुण्डं तु कुर्याद्वै देशिकोत्तमः।
अष्टपद्मसमं कृत्वा पद्मकुण्डमिहोच्यते॥ 24
क्षेत्रं चैव चतुर्विंशद्भागं कृत्वा तु देशिकः।
अभ्यन्तरे तु विन्यस्य चतुर्दिक्षु विशेषतः॥ 25

In Public domain. Digitization Muthulakshmi Research Academy

प. 54

गजोष्ठसदृशाकारं मेखलानां तु नालकम्।
हस्तमात्रं खनेत् भूमिं विस्तारन्तलदेव तु॥ 31
निम्नोन्नतक्षयं कुर्याद्दर्पणोदरवत् कृतम्।
मध्ये नाभिं प्रकल्प्याथ ऽकाङ्गुलं तु विष्टरम्॥ 32
कुण्डानां लक्षणं प्रोक्तं मस्त्राणां लक्षणं शृणु।
वज्रं शक्तिञ्च दण्डञ्च खड्गं पाशं तथाङ्कुशम्॥ 33
गदा शूलञ्च चक्रञ्च पद्मञ्चेति दशायुधम्।
सौवर्णं रजतं ताम्रं याज्ञकं वृक्षमेव वा॥ 34
प्लक्षोदुम्बरमश्वत्थं वटञ्चैव तु खादिरम्।
वैकङ्कतमयं वापि कुर्यादस्त्रमनुत्तमम्॥ 35

In Public domain. Digitization Muthulakshmi Research Academy

प. 54

द्वात्रिंशदङ्गुलं दैर्घ्यं मात्राङ्गुलेन कारयेत् ।

विस्तारश्च षडङ्गुल्यं घान्तदर्धमिहोच्यते ॥ 36

षडङ्गुलप्रमाणेन शूलं कृत्वा तु देशिकः ।

मध्यपत्रमृजुं कृत्वा बहिर्वक्रन्तु पार्श्वयोः ॥ 37

तदग्रो गणिका चैव अङ्गुलोर्ध्वं तु कारयेत् ।

तदग्रो गण्डिकां कुर्यादर्धाङ्गुलेन कारयेत् ॥ 38

षडङ्गुलपरीणाहं मध्ये दण्डं प्रकल्पयेत् ।

मध्यमे गण्डिकां कुर्यादङ्गुलद्वयमानतः ॥ 39

तदूर्ध्वे तदधश्चैव द्वाभ्यामङ्गुलिना कुरु ।

एवमेव क्रमेणैव द्वयोरग्रं तु शूलवत् ॥ 40

In Public domain. Digitization Muthulakshmi Research Academy

प. 54

एवं वज्रं समाख्यातं शक्तिलक्षणमुच्यते।
चतुरङ्गुलविस्तारं दीर्घं पूर्ववदेव तु॥ 41
द्वयोरग्रन्तु विप्रेन्द्र शल्लस्यं मध्यपत्रवत्।
तस्योच्छ्रयं षडङ्गुलयमेकाङ्गुलेन गण्डिका॥ 42
मध्यमे गण्डिकां कुर्याद्द्वङ्गुलद्वयमेव च।
तदूर्ध्वे तदधश्चापि द्वाभ्यामङ्गुलिना भवेत्॥ 43
गण्डिकां तत्र कर्तव्यं शक्तिलक्षणमुच्यते।
वज्रवत् फलका चैव तदूर्ध्वे गण्डिकाङ्गुलिः॥ 44
अष्टाङ्गुलन्तु विस्तार तस्या दण्डस्यैव विशेषतः।
घटस्योच्छ्र षडङ्गुलयन्तदधो गण्डिकाङ्गुलिः॥ 45

In Public domain. Digitization Muthulakshmi Research Academy

प. 54

षडङ्गुलप्रमाणेन दण्डनाहमिहोच्यते।

पूर्ववद्दीर्घमेवं स्यान्मध्ये वक्रं तथैवच॥ 46

P.133 वक्रादूर्ध्वक्रमेणैव कुशं कुर्याद्विचक्षणः।

मूले तु फलकां कृत्वा विस्तारं तु षडङ्गुलम्॥ 47

तदूर्ध्वे वृत्ताकारं फलकां कारयेत्ततः।

तद्दीर्घफलकां कृत्वा मध्ये पाशं तु लेखयेत्॥ 48

अङ्कुशस्य प्रमाणेन प्रवक्ष्याम्यनुपूर्वशः।

दीर्घं तु पूर्ववत् कृत्वा अग्रे सूचीमुखं तथा॥ 49

अग्रात् षडङ्गुले चैव अधस्ताद्वक्रसूचिना।

चतुरङ्गुलदैर्घ्यं तु नाहमेकाङ्गुलं भवेत्॥ 50

नावमङ्कुशपद्मं च दण्डनाहं षडङ्गुलम्।

गदा दण्डवत् कृत्वा अग्रे सूचिं तु कारयेत्॥ 51

In Public domain. Digitization Muthulakshmi Research Academy

प. 54

त्रिशूलं पूर्ववत् कृत्वा त्रिपत्रं पालिकायुतम्।

पालिका तु चतुष्कोणे वृषभं स्थापयेत्पुनः॥ 52

एवं शूल समाख्याता चक्रलक्षणमुच्यते।

चक्रं तु शूलवन्मानं वृत्तरूपमिहोच्यते॥ 53

द्वादशारसमायुक्तं मध्ये नाभिसमायुतम्।

एवं चक्र समाख्यातं पद्मं चैव शृणुष्वथ॥ 54

मुकुळं चाष्टाङ्गुलं प्रोक्तं तदधो गण्डिकाङ्गुलम्।

पञ्चाङ्गुलं तु विप्रेन्द्र दण्डनाहमिहोच्यते॥ 55

(एवं पद्म समाख्यातं अष्टमङ्गलमुच्यते।)

षोडशाङ्गुल दैर्घ्यं स्यादष्टाङ्गुलं तु विस्तरम्।

अधस्तात्तत्तु षडङ्गुलयं पद्मं चैव तु कारयेत्॥ 56

In Public domain. Digitization Muthulakshmi Research Academy

प. 54.

एवं पद्म समाख्यातं अष्टमङ्गलमुच्यते।
दर्पणं पूर्णकुम्भं च वृषभं युग्मचामरम्॥ 57
श्रीवत्सं स्वस्तिकं शङ्खं दीपो देवाष्टमङ्गलम्।
विन्यसेत् फलकामध्ये अष्टमङ्गलमुच्यते॥ 58
षड्विंशदङ्गुलं दैर्घ्यं विस्तारं तु दशाङ्गुलम्।
वर्णेन लेखयित्वा तु लाञ्छये च्छिलिपेना ततः॥ 59
तद्रूपमासनायुक्तं लेखयेदष्टमङ्गलम्।
स्रुवस्य लक्षणं वक्ष्ये चतुर्विंशतिचाङ्गुलिः॥ 60
दीर्घमेवं समाख्यातं वृत्तं चैव षडङ्गुलम्।
कण्ठन्त्र्यङ्गुलं प्रोक्तम्मान पूज्या क्षयं भवेत्॥ 61

In Public domain. Digitization Muthulakshmi Research Academy

प. 54

दण्डमूले तु विप्रेन्द्र नाहं चैव षडङ्गुलिः।

नासिकावत् बलिं कृत्वा स्रुवलक्षणमुच्यते॥ 62

स्रुक्लक्षणमथो वक्ष्ये विविधं चोच्यते मया।

षट्त्रिंशदङ्गुलायाममष्टाङ्गुलं तु विस्तरम्॥ 63

P. 134. उत्सेधं तु षडङ्गुल्यं फलकां चैव कारयेत्।

अग्रं चैव त्रिभागैकं सप्ताङ्गुलं तु दैर्घ्यकम्॥ 64

अनुपूर्वात् क्षयं कृत्वा निम्नोन्नतविवर्जितम्।

रसाङ्गुल.. विस्तारं कर्णश्चैव समाहितः॥ 65

कर्णोच्चन्तु द्व्यङ्गुल्यं तदधो फलका भवेत्।

अष्टाङ्गुलेन वेदि स्याद्विस्तारं तावदेव तु॥ 66

In Public domain. Digitization Muthulakshmi Research Academy

प॰ 54

वेदिबाह्ये तु परितः पट्टिकार्धाङ्गुलेन तु।

मध्यमे चतुरङ्गुल्यं बिलं चैव तु कारयेत्॥ 67

परितो बिलबाह्ये तु पट्टिकार्धाङ्गुलेन तु।

द्वयोः पार्श्वकयोर्मध्ये यवद्वयं तु निम्नकम्॥ 68

चतुरङ्गुलं बीड (पीठ) निम्नं कृत्वा चैव तु देशिकः।

बलाच्चैव तु मुखान्तं स्यात् खान्तं कनिष्ठमानतः॥ 69

पद्मपृष्ठसमाकार मधः पद्मसमन्वितम्।

गजोष्ठसदृशाकारं मत्स्यपृष्ठाकृतिर्भवेत्॥ 70

गण्डिकाश्चैव कर्तव्यमङ्गुल्यास्त्रयमुच्यते।

तदधो गण्डिका बाह्यान्तदधो गण्डिकाङ्गुलि॥ 71

In Public domain. Digitization Muthulakshmi Research Academy

प. 54

दण्डं षडङ्गुलं नाहं दण्डमूले घटो भवेत ।

द्वयङ्गुलप्रमाणेन घटं कृत्वा तु देशिकः ॥ 72

स्रक्लक्षणमिदं प्रोक्तं तोरणानां शृणुष्वथ ।

पञ्चहस्तप्रमाणेन उत्तमं तोरणोच्छ्रवम् ॥ 73

चतुर्हस्तं मध्यमं प्रोक्तं तालहीनं तु चाधमम् ।

उत्सेधं तु विस्तारं फलका चैव विन्यसेत् ॥ 74

तदूर्ध्वे तु द्वयङ्गुलयं विन्यसेद्देशिकोत्तमः ।

एवं तोरणमाख्यातं दर्भ मालां शृणुष्वथ ॥ 75

उत्तमं सप्तदर्भैश्च मध्यमं पञ्च उच्यते ।

अधमं त्रीणि दर्भाणि तदग्रे रज्जुरुच्यते ॥ 76

In Public domain. Digitization Muthulakshmi Research Academy

प.54

हस्तं प्रलम्बयेद्धीमान् कारयेद्दर्भमालकान्।

परिधी लक्षणं वक्ष्ये अवक्रन्तीर्व्रणान् शुभान्॥ 77

द्वात्रिंशदङ्गुलायामं त्रिस्रा परिधो भवेत्।

षट्त्रिंशदङ्गुलामन्त्रीयाशद्दर्भैः परिस्तरेत्॥ 78

चतुरङ्गुलमानेन ग्रधितन्तु प्रदक्षिणम्।

चत्वारि विस्तरं कुर्यादाज्यस्थाल्यादिकं श्रृणु॥ 79

आज्यस्थालीं प्रणीता च प्रोक्षणी च तथैव च।

विस्तारं च षडङ्गुलयमुत्सेधं तु द्वयङ्गुलम्॥ 80

समिधा लक्षणं वक्ष्ये द्वादशाङ्गुलदैर्घ्यकम्।

P.135 आज्यं स्रुव वृ पूर्णाञ्च तिलादीन् शक्तिमात्रकम्॥ 81

In Public domain. Digitization Muthulakshmi Research Academy

प.54.

अन्नमक्षप्रमाणेन गुळं वै तत्प्रमाणतः।
द्रव्यस्रवेण होमं तु अन्त्यं हस्तेन हूयते॥ 82
स्थालिकां चैव कर्तव्यं हस्तमात्रप्रमाणतः।
तदर्धञ्च तदूर्ध्वं तु कुर्याद्वित्तानुसारतः॥ 83
पीठोच्चं तु त्रिपादींश्च कर्तव्यं देशिकोत्तमः।
कूर्चानां लक्षणं वक्ष्ये अधमं तु त्रिदर्भकैः॥ 84
मध्यमं पञ्चदर्भैस्तु सप्तदर्भैस्तु चोत्तमम्।
प्रदक्षिणावर्त्तसंयुक्तं तदग्रे ग्रन्थितं भवेत्॥ 85
कूर्चानां लक्षणं प्रोक्तं वस्त्राणां लक्षणं शृणु।
अधमं चाष्टहस्तं स्या मध्यमं दशहस्तकम्॥ 86

In Public domain. Digitization Muthulakshmi Research Academy

प- 54

उत्तम द्वादशं हस्तं विस्तारं पञ्चतालकम्।

वस्त्र लक्षणमेवोक्तं वितानस्य विधिं शृणु।। 87

षडस्तं चैव दीर्घं स्यात् अष्टतालं तु विस्तरम्।

वितानलक्षणं प्रोक्तमेवमेव क्रमेण तु।। 88

कुण्डानां लक्षणं प्रोक्तं शान्तिहोमं शृणुष्वथः।

इति वीरतन्त्रे कुण्डलक्षणविधि...

(चतुः)पञ्चाशत् पटलः।।

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 55

॥ शान्तिहोमविधि पटलः ॥

शान्तिहोमं कथं देव दिशाहोमं कथं प्रभो।

मूर्त्तिहोमं कथं शम्भो ब्रूहि मे परमेश्वरः॥ 1

शान्तिहोममहं वक्ष्ये शृणुष्व कमलासन।

पूर्वोक्तमण्डपं वापि अग्निशाला यथापिवा॥ 2

अग्निकुण्डेषु होतव्यं स्थण्डिले वापि कारयेत्।

चतुरश्रं वाथ वृत्तं वा अग्निकुण्डं तु कारयेत्॥ 3

त्रिमेखलासमायुक्तमथवा ऽकमेखला।

ऽावं तत्रैव संकल्प्य दर्पणोदरवत् कृतम्॥ 4

शोधनं क्षालनं चैव शोषणं पाचनं तथा।

मथित्वा तु गृहीत्वा तु हृदयेन प्रतिष्ठितः॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 55

काष्ठं शिरसा दद्यात् ज्वालयेदस्त्रमन्त्रतः ।
उपस्थानं शिरसा कृत्वा परिस्तरणमेवच ॥ 6
दश दर्भैस्समायुक्तं पूर्वे चैव परिस्तरेत् ।
दक्षिणे पश्चिमे चैव उत्तरे च परिस्तरेत् ॥ 7
परिधी दक्षिणे न्यस्य पश्चिमे चोत्तरे न्यसेत् ।
पात्राणां साधनं चैव हूयते क्रमशस्ततः ॥ 8
समिधा पञ्चब्रह्मेण आज्यं चैव षडङ्गकैः ।
P.136. अघोरेण चरुं हुत्वा जुहुयाच्च गताहुति ॥ 9
द्रव्यं प्रति विशेषेण व्याहृतिं जुहुयात्ततः ।
सर्वद्रव्यसमायुक्तं हव्यवाहु समुच्चरन् ॥ 10
स्विष्टमग्नेति मन्त्रेण जुहुयात्तदनन्तरे ।
हुत्वान्ते तु यदस्येति हुनेत पूर्णाहुतिं ततः ॥ 11
शान्तिहोममिति ख्याता दिशाहोमं ततः शृणु ।

इति वीरतन्त्रे शान्तिहोमविधि-
(पञ्च)?
चतुःपञ्चाशत्पटलः ॥

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 56 ।। दिशाहोमविधिपटलः ।।

अनुक्तं यद्भवेद्दोषं शान्तिहोमेन शाम्यति ।
दिशाहोमं प्रवक्ष्यामि शृणुष्व चतुराननः ।। 1
प्रासादस्य चतुर्दिक्षु दिशाहोमं तु कारयेत् ।
अग्निमुखं च संकल्प्य पूर्वोक्तेन विधानतः ।। 2
हस्तमात्रेण विप्रेन्द्र स्थण्डिलं कारयेत्ततः ।
प्रासादस्य चतुर्दिक्षु पूर्वे तु चतुरश्रकम् ।। 3
दक्षिणे चार्धचन्द्राभं वृत्तं चैव तु वारुणे ।
पद्मं चैव तु सौम्यायां कुण्डं वा स्थण्डिलं तु वा ।। 4
प्लक्षं चैव तु पूर्वायामुदुम्बरं च दक्षिणे ।
अश्वत्थं वारुणे चैव वटश्चोत्तरे दिशि ।। 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 56

स्तथा। ?

ऽर्वविधैस्समिद्भिश्च हूयते देशिकोत्तमः।

सहस्रं वा तदर्धं वा अष्टोत्तरशतं तु वा।। 6

सद्यादीशानपर्यन्तं जुहुयाच्च शताहुति।

(आज्येन चरुणा चैव)

स्तण्डिलैस्तिलमिश्रैश्च ईशानेन शताहुतिः।। 7

? द्रव्यान्ते चैव द्रव्यान्ते व्याहृति जुहुयात्ततः।

सर्वद्रव्यसमायुक्तं हव्यवाहं समुच्चरन्।। 8

स्विष्टमग्नेति मन्त्रेण जुहुयात्तदनन्तरे।

हुत्वान्ते तु यदस्येति पूर्णाहुति हुनेत्ततः।। 9

दिशाहोममिदं प्रोक्तं मूर्तिहोमं ततः शृणु।

In Public domain. Digitization Muthulakshmi Research Academy

प. 56

॥ मूर्तिहोमम् ॥

शिवाग्रे मण्डपं कृत्वा स्थण्डिलं शान्तिभिः कुरु।
मध्यमे स्थापयेत् कुम्भं ससूत्रं सापिधानकम्॥ 1

सवस्त्रं सहिरण्यं च सकूर्चं वारिपूरितम्।
अभितः कलशानष्टौ अष्टमूर्तिश्च विन्यसेत्॥ 2

आदित्यश्च तथा वाग्निसोमो धरणिरेव च।
आकाशश्चैव वायुश्च वरुणो यजमानकम्॥ 3

P.137 पूर्वादीशानपर्यन्तं पूजयेत् गन्धपुष्पकैः।
पञ्चब्रह्मेण संपूज्य गन्धपुष्पादिना ततः॥ 4

कलशान् बाह्य ते विप्र अष्टदिक्ष्वष्ट होमयेत्।
समिधाज्यचरुक्षीरं -- यवेन सह देशिकः॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

T. 30

प. 56

ह्येकैकाष्टशतं चैव ईशानादि न हूयते । ?
पश्चात्तु स्नापयेत्तत्र मूलबेरे विशेषतः ॥ 6
हविर्न्निवेदयेत् पश्चात् च्छिवस्य परमेष्ठिनः ।
मूर्तिहोममिति ख्यातं वास्तुहोममथा श्रृणु ॥ 7

॥ वास्तुहोमम् ॥

प्रासादे मण्डपे चैव लिङ्गस्थापनकर्मणि ।
प्रतिमास्थापने चैव सभाकूटगाकके ॥ 1
उद्याने वापि विप्रेन्द्र वास्तुहोमं तु कारयेत् ।
आदिशैवेन कर्तव्यमथवा दीक्षितेन वा ॥ 2
समरीयपदे कृत्वा स्थाण्डिलं सिंहतेन वा ।
स्थाण्डिलस्य तु पूर्वे तु जलावस्तन्तु विन्यसेत् ॥ 3

In Public domain. Digitization Muthulakshmi Research Academy

प. 56

य?
आज्याधिश्रवणं कुर्यात् पूर्वोक्तेन विधानतः।
स्रुवस्रुचैव गृहीतव्यं संस्कारं पूर्ववत् कृतम्॥ 9

दक्षिणोत्तरे चैव उत्तरे परिधिं न्यसेत्।
? आघार परि समिधा न्यस्त्वा परिषेचनं ततः कुरु॥ 10

कुण्डी मध्यं तु दद्यात्तु अघोरं चैव हूयते।
सद्यादीशान पर्यन्त दिक्षु मध्ये च होमयेत्॥ 11

चरुं हुत्वार्थ भस्मन्नाज्यं वास्तोष्पतेति च।
वास्तु देवतानां तु घृतेनैव तु होमयेत्॥ 12

वास्तु दैवतानामानि स्वाहान्तं चैव हूयते।
पायसान्नं कुलं युक्तं घृतेनैव परिप्लुतम्॥ 13

In Public domain. Digitization Muthulakshmi Research Academy

प. 56

शुद्धतोयेन संपूर्य होमं तत्रैव निक्षिपेत्।
पलाशपूर्वशाखैश्च तस्य मध्ये तु निक्षिपेत्॥ 4
गन्धपुष्पादिनाभ्यर्च्य उल्लेखनं तु कारयेत्।
तिस्रः पूर्वमुखा रेखा तद्वदुत्तरमेव च॥ 5
अघोरास्त्रेण मालिख्य प्रोक्षयेत् पुरुषेण तु।
हृदयेनाग्निं निक्षिप्य उपस्थानं तथैव च॥ 6
परिस्तरेत्तु दर्भाभिः पूर्वोक्तेन परिस्तरेत्।
पात्राणि साधयेत्तत्र अग्नेरुत्तरतो बहिः॥ 7
प्रणीतामुत्तरे स्थाप्य ब्रह्माणं दक्षिणे यजेत्।
इन्द्रादिलोकपालांश्च पूजयेत्तु स्वदेशतः॥ 8

In Public domain. Digitization Muthulakshmi Research Academy

प. 56.

वास्तुदेवान् बलिं दत्त्वा लोकपालबलिं क्षिपेत्।
P.138 जयातिरभ्याधानं च राष्ट्रभृच्चैव हूयते ॥ 14
आज्येन चरुणा चैव हव्यवाह समुच्चरन्।
स्विष्टमग्नेति मन्त्रेण जुहुयात्तदनन्तरे ॥ 15
आज्येनैव यदास्येति स्विष्टकृद्धूयते क्रमात्।
परिषेचनं ततः कृत्वा परिधान्या निधापयेत् ॥ 16
विसर्जयेत्तु ब्रह्माणं दक्षिणां दापयेत्ततः।
प्रणीतोदकेन संप्रोक्ष्य पवमानमुदीरयन् ॥ 17
आचार्यं पूजयेत्तत्र वस्त्रधान्यादिकाञ्चनैः।
सवत्सां गां प्रदद्यात्तु आचार्याय विशेषतः ॥ 18

In Public domain. Digitization Muthulakshmi Research Academy

प. ५६

आचार्यन्दक्षिणाहीने क्रियाया निष्फलतां व्रजेत।

क्रियां शरीरमित्युक्तं दक्षिणा जीव उच्यते॥ १९

क्रियान्दक्षिणाहीने निर्जीवज्यान्तु निष्फला।

तस्मात्सर्वप्रयत्नेन आचार्यः पूजयेत् सदा॥ २०

वास्तुहोममिति ख्याता सकलाराधनं शृणु।

इति वीरतन्त्रे बट्=यां शान्ति दिशा -

(बट्?)

मूर्त्तिवास्तुहोम पञ्च पञ्चाशत् पटलः॥

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 57

॥अथ सकळाराधनविधिपटलः॥

शिवं प्रणम्य विधिवत् परिपृच्छत् पितामहः।
सकळाराधनं कोवा तत्सर्वं ब्रूहि मे प्रभो॥ 1
तत्सर्वमखिलं वक्ष्ये शृणुष्व चतुरानन।
जलस्नानं पुरा कृत्वा भस्मस्नानं समाचरेत्॥ 2
प्रतिमस्याग्रतश्चैव गोमयेनानुलेपनम्।
उत्तराभिमुखो भूत्वा पूर्वाभिमुखमेव वा॥ 3
कूर्चं तत्रैव निक्षिप्य आसीनश्चैव देशिकः।
तस्यैव वामभागे तु दर्भैश्चैव परिस्तरेत्॥ 4
गन्धपुष्पं च धूपं च दीपं चैव तु विन्यसेत्।
पाद्यमाचमनं चार्घ्यं हृदयेन तु विन्यसेत्॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 57

दर्भैः प्रच्छादयेद्विद्वा त्रिशिरोमन्त्रेण देशिकः।

त्रिपादं मध्यमे चैव शङ्खं चैव तु विन्यसेत्॥ 6

कूर्चेन वा कुशैर्वापि प्रोक्षयेदम्भसा ततः।

रेचकं पूरकं चैव कुम्भकं च समाचरेत्॥ 7

अङ्गुष्ठतर्जनीभ्यां तु हुंकारेण समान्वितम्।

फट्कारेण समायुक्तं दशदिक्षु च शोधयेत्॥ 8

हस्ताभ्यां संस्पृशेत्पूर्वं कादिपादान्तमेव च।

ईशमङ्गुष्ठे न्यस्य तर्जन्यां चैव देशिकः॥ 9

P. 139. शेषाङ्गुलाग्र विप्रेन्द्र अङ्गुष्ठेन तु विन्यसेत्।

पुरुषं तर्जनि न्यस्य अघोरं मध्यमे न्यसेत्॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प. 57

अनामिकां वामदेवं तु सद्यं कनिष्ठिके न्यसेत् ।
षडङ्गं विन्यसेत्तत्र पूर्वोक्तेन विधानतः ।। ।।
हृदये हृदयं न्यस्य शिरसि शिर विन्यसेत् ।
शिखायां तु शिखां न्यस्य कवचं स्तनमध्यतः ।।12
अस्त्रं हस्तप्रदेशे तु नेत्रं नेत्रेषु विन्यसेत् ।
ईशाना मूर्ध्नि विन्यस्य मुखे तत्पुरुषं न्यसेत् ।।13
अघोरं हृदये न्यस्य गुह्ये वामं प्रकल्पयेत् ।
सद्योजातं न्यसेत्पादौ विन्यसेत्तु विशेषतः ।। 14
ब्रह्माणं मूर्ध्नि विन्यस्य ललाटे चेश्वर न्यसेत् ।
मुखे विष्णु न्यसेद्विद्वान् कर्ण --- रश्विनी न्यसेत्
15

In Public domain. Digitization Muthulakshmi Research Academy

प. 57

कर्णे तु पितरश्चैव इन्द्रश्च हृदये न्यसेत् ।

आदित्यं दक्षिणे बाहुस्सोमं विन्यस्य वामके ॥ 16

कुक्षेरग्निं न्यसेत्तत्र यम मेढ्रे च विन्यसेत् ।

वारुणं दक्षिणे जानुरपरे वायुरुच्यते ॥ 17

विश्वेदेवाश्च विप्रेन्द्र द्वौ पादौ विन्यसेत्ततः ।

विन्यसेत् सृष्टिमूर्त्तीनां सृष्टिन्यासमुदाहृतम् ॥ 18

स्थितिमूर्तिश्च विप्रेन्द्र स्थितिन्यासमुदाहृतम् ।

संहारमूर्त्तिनां चैव संहारन्यासमुच्यते ॥ 19

पूजितस्य तु देहे तु विन्यसेद्देवमेव तु ।

एवं न्यस्य विधानेन पश्चात्पूजनमारभेत् ॥ 20

प्रतिमाश्च व्रतश्चैव पीठ लक्षणसंयुतम् ।

In Public domain. Digitization Muthulakshmi Research Academy

प. 57

॥ प्रतिमाग्रे पीठलक्षणम् ॥

तालमात्र प्रविस्तारन्तदर्धञ्चोच्छ्रयं भवेत्।
त्रिमेखलासमायुक्तमथवा एकमेखलम् ॥ 1
मात्राङ्गुलेन कर्तव्य मेखलाच्च द्वयङ्गुलम्।
वेशनं तद्वदेव स्याद्दर्पणोदरवत् कृतम् ॥ 2
प्रतिमानां च सर्वेषां पीठके मार्चनं यजेत्।
प्रतिमे वार्चयेद्विप्र गन्धपुष्पान्तसंयुतम् ॥ 3
चलं चैवाचलं चैव द्विविधं प्रतिमं भवेत्।
चलं लोहमयं प्रोक्तं चलञ्च चतुर्विधम् ॥ 4
शिलैर्वा मृण्मयैर्वापि भित्तिचित्रे पटेऽपि वा।
एवं चतुर्विधं प्रोक्तं अचलं द्विजोत्तमः ॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 57

शैलजं प्रतिमञ्चैव अभिषेकन्तु कारयेत्।

P.140 मृण्मयं भित्तिचित्रं पटञ्चैव तु प्रोक्षयेत्॥ 6

लोहजे प्रतिमञ्चैव स्नापयेत् प्रोक्षयेत्तु वा।

प्रासादे प्रतिमं स्थाप्य भित्तिचित्रे पटेऽपिवा॥ 7

पीठे संपूजयेत्तत्र परिवारसमन्वितम्।

नैवेद्यं दापयेत्तत्र नित्योत्सवं तु कारयेत्॥ 8

केवलं स्थापितमिदं मन्यच्छृणुष्वथ।

शिवलिङ्गस्य स्थाने तु स्थापितं प्रतिमन्ततः॥ 9

परिवारं न कर्तव्यं श्रीपिबिल्वञ्च न कारयेत्।

केवलं स्थापिते चैव सिंहं पत्र तथैव च॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प. 57

वि ---- ासनादूर्ध्वे तु कल्पयेद्देशिकोत्तमः।
गर्भावरणसंयुक्तं पूजयेत्तु विधानतः॥ 11

निष्कलाश्रितं यत्तु आसनावरणायुतम्।
गन्धपुष्पादिना चैव अर्चयेत्तु विशेषतः॥ 12

लिङ्गं वा प्रतिमां वापि स्वस्वरू ------ ।
प्रतिमाणक्य सर्वेषां तिष्ठिन् तत् येनमेव वा॥ 1:

स्नानादिसर्वकार्येषु आसीनश्चैव कल्पयेत्।
आसीनं तत्र सकलं पूजयेत्तु विशेषतः॥ 14

लिङ्गं वा प्रतिमां वापि स्वस्वरूपेण भावयेत्।
अन्नरूपं न कर्तव्यं कर्तव्यश्चे क्षिनाशनम्॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

प. 57.

पूजापर्युषितं सर्वं हृदयेन विसर्जयेत्।
वस्त्रमाभरणं चैव क्षाळये च्छुद्धिरुच्यते॥ 16
आवाहयेत्तु सद्योन वामेन स्थापयेद्बुधः।
पाद्याद्यर्घ्याचमनीयं च दद्यात् पूर्ववदेव तु॥ 17
पञ्चब्रह्मेण मन्त्रेण अभिषेकं तु कारयेत्
वस्त्रं दत्वात्वघोरेण गन्धं वै शिरसा ददेत्॥ 18
पुष्पमीशानमन्त्रेण धूपं दद्याच्च वामतः।
दीपं सद्योन. दद्याच्च हृदयेन हविर्ददेत॥ 19
ताम्बूलं शिरसा दद्यादेवमेव क्रमेण तु।
पूर्वोक्तेन क्रमेणैव गर्भावरणकं यजेत॥ 20

In Public domain. Digitization Muthulakshmi Research Academy

प. 57

? शिवद्विजानां न कर्तव्यमन्ये चैव न कारयेत्।

एवं यः कुरुते मर्त्यः सर्वपाप विमुच्यते ॥ २।

सकलाराधनं प्रोक्तं विघ्नेशं स्थापनं श्रृणु।

इति वीरतन्त्रे षट्सहस्रसंहितायां

सकलाराधन विधि (सप्त?) षट् पञ्चाशत् पटलः ॥

— · —

In Public domain. Digitization Muthulakshmi Research Academy

पटलः ५४

P-141 ॥ विघ्नेशस्थापनविधिपटलः॥

अस्मिन् तन्त्रे सुरेशानी विघ्नेशस्थापनं कथम्।

तत्सर्वं श्रोतुमिच्छामि भगवन् वक्तुमर्हसि॥ 1

साधु साधु महाप्राज्ञ यत्त्वया परिचोदितम्।

तत्सर्वमखिलं वक्ष्ये शृणुष्व कमलासन॥ 2

भूताश्चैव पिशाचाश्च राक्षसाश्चासुरास्तथा।

लोके द्रव्यात् बुभुक्षन्ते तेषां विज्ञाय पूजयेत्॥ 3

ग्रामे वा नगरे वापि पत्तने खेटकेऽपि वा।

प्रासादं कारयेत्तत्र शास्त्रदृष्टेन कर्मणा॥ 4

भूमिं समतलं कृत्वा कर्षणं कारयेत्ततः।

व्योममन्त्रापि जपित्वा तु कर्षयेद्देशिकोत्तमः॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 58

तस्मिन् देशे तु विप्रेन्द्र बीजानि वापयेत्ततः।

पक्वे सन्ति च सर्वाणि गोगणान्निवेदयेत् ॥ 6

शाल्यं विमोचयेत्तत्र पांसुना पूरयेत्ततः।

दर्पणोदरवत् कृत्वा गोमयेनानुलेपयेत् ॥ 7

वास्तुदेवान् समभ्यर्च्य सर्वकर्माणि कारयेत्।

पूर्वोक्ते चैव नक्षत्रे योगे च करणान्विते ॥ 8

प्रथमेष्टिकां प्रकर्तव्यं स्थिरराशौ विशेषतः।

द्वारस्य दक्षिणे पार्श्वे प्रथमेष्टान्तु विन्यसेत् ॥ 9

दर्भासनं ततः कुर्याल्लक्षणेन समन्वितम्।

शिलाभिरिष्टकाभिर्वा दारुमृद्भिरथापि वा ॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प. ५४

प्रासादं च प्रकर्तव्यं लक्षणेन समन्वितम्।

नवहस्तं पञ्चहस्तं वा त्रिहस्तं वापि कारयेत्॥ ।1

अर्धमण्डपसंयुक्तं विमानं कारयेद्बुधः।

प्रासादस्य बहिर्विद्वान् प्राकारं कारयेत्ततः॥ ।2

प्रासादस्य चतुर्दिक्षु बलिपीठं प्रकल्पयेत्।

त त पञ्चतालोत्तमं विद्धि चतुस्तालं तु मध्यमम्॥ ।3

तं त्रितालमधमं प्रोक्तं विस्तारोत्सेधतः समम्।

षोडशांशे विभज्यं तु उपानं मेकभागिकम्॥ ।4

जगती भ्यञ्चातुर्भागं त्रिभागं कुम्भमुच्यते।

ऽकेन पट्टिकां कुर्यात् ग्रीवा चैव त्रियंशकम्॥ ।5

In Public domain. Digitization Muthulakshmi Research Academy

प. 58

द्व्यंशेन पट्टिकां कुर्यात् कम्पमेकेन कारयेत्।
पीठोत्सेधं चतुर्भागं पद्ममूर्ध्वे प्रकल्पयेत्॥ 16
प्रतिमा लक्षणं वक्ष्ये श्रृणुष्व चतुरानन।
उत्तमं लोहजं प्रोक्तं मध्यमं तु शिलामयम्॥ 17
P. 142. अधमं दारुमृद्भिश्च प्रतिमाँ शुभा - - - ।
सौवर्णञ्चैव सौभाग्य मोक्षार्थं रजतं भवेत्॥ 18
ताम्रेण पुत्रकामी च आयसञ्चाभिकारकम्।
चलितं लोहजं चैव रत्नजं दारुजं तु वा॥ 19
पुनः प्रतिष्ठां कुर्वीत शास्त्रोक्तेन विधानतः।
स्थापितं तु परार्थं स्यात् अन्यदात्मार्थमुच्यते॥ 20
चतुर्भुजं त्रिणेत्रं च करण्डमकुटान्वितम्।
आसीनं वा स्थितंवापि वाहनारूढमेव वा॥ 21

In Public domain. Digitization Muthulakshmi Research Academy

प. 58

नृत्तं व्याख्यानरूपं तु सर्वाभरणभूषितम्।

नानाभरणसंयुक्तं नागयज्ञोपवीतिनम्॥ 22

किङ्किणीनूपुरोपेतं सर्वलक्षणसंयुतम्।

पञ्चतालेन कुर्यात्तु प्रतिमां कारयेच्छुभम्॥ 23

पञ्चांशेन भविष्यज्यन्तु ओष्ठार्धन्तु त्रिभागकम्।

पादोच्चं तु द्वितालं तु कुर्यात् प्रतिममुत्तमम्॥ 24

कचस्तं गजहस्ते तु दक्षिणे तु स्वदन्तकम्।

वामे पाशसमायुक्तं दक्षिणे चाक्षसूत्रकम्॥ 25

टङ्कं स्याद्वामहस्ते तु पद्मासनोपरि स्थितम्।

एवंलक्षणसंयुक्तं प्रतिमां कारयेद्बुधः॥ 26

In Public domain. Digitization Muthulakshmi Research Academy

प. 58

श्वेतर्कमूले कुरियात्मत्र साध्ये विशेषतः।
षड्भुजेनैव कर्तव्यं परत्र्यक्रजयो स्थिता ॥ 27
गर्भन्तु नवधा कृत्वा पञ्चांशेनोत्तमं भवेत्।
मध्यमं चतुरंशेन त्रियंशमधमं भवेत् ॥ 28
द्वियंशमेकमंशे वा प्रतिमं कारयेत्ततः।
तालसंख्याक्रमं वक्ष्ये अधमं तालमुच्यते ॥ 29
द्वितालं मध्यमं प्रोक्तं त्रितालञ्चोत्तमं भवेत्।
यजमानेच्छया युक्तं शिल्पिना कारयेत्ततः ॥ 30
मन्त्रोद्धारमहं वक्ष्ये श‍ृणुष्व कमलासन।
कामदं मोक्षफलदं सर्वपापविनाशनम् ॥ 31

In Public domain. Digitization Muthulakshmi Research Academy

प. 58

सुलग्ने सुमुहूर्ते च सुनक्षत्रे विशेषतः।

शुद्धस्नानमनुप्राप्य शुद्धिं कृत्वा ततो बुधः॥ 32

तत्रैव गुरुमावाह्य पूजयेत्तु विशेषतः।

अकारादिक्षकारान्तं मक्षराणि विलिख्ययेत्॥ 33

विनायकस्य बीजं तु तेषां मध्ये समुच्चरन्॥।

द्विवर्गस्य तृतीयं तु प्रथमस्य चतुर्थकम्॥ 34

सप्तवर्ग तृतीयं तु बिन्दुनाद समन्वितम्॥।

P. 143. मूलमन्त्र मिदं प्रोक्तं विघ्नेश्वर पङ्कज॥ 35

ह्रस्व ब्रह्म समाख्याता दीर्घं हृंगानि चोच्यते॥।

बृहोदरश्च विघ्नेश न्नायकं वीरमेव च॥ 36

In Public domain. Digitization Muthulakshmi Research Academy

गजाननं गजकर्णं लम्बोदरं तथैव च।

भक्ष्यप्रियं च विप्रेन्द्र मूर्त्तयेष्टौ प्रकीर्तिताः॥ 37

एषां चैव तु मूर्त्तीनां स्वनाम्नाद्यक्षरैर्युतम्।

बिन्दुनादसमाक्रान्तं प्रणवाद्यमिहोच्यते॥ 38

तस्य यन्त्रं वदामीह सर्वाशुभनिवारणम्।

भूर्जैर्वा तालपत्रैर्वा शुभं रक्षेत्तु धातुना॥ 39.

लिखित्वाष्टदलं पद्मं केसराढ्यसकर्णिकम्।

संलिखेत् कर्णिकामध्ये मूलमन्त्रं समाहितः॥ 40

विन्यसेत्त्वष्टपत्रेषु अष्टमूर्त्त्याक्षरान् बुधः।

लाक्षावृत्तां तु गुलिकां काञ्चनेन समावृतम्॥ 41

In Public domain. Digitization Muthulakshmi Research Academy

प. 58

पूजयेच्च विशेषेण मूलमन्त्रेण होमयेत्।

गुलिका धारयेत् पश्चात् कण्ठे वा कटिरेववा॥ 42

सर्वरोग - - - - - - सिंगदृश्यत् गजं यथा।

मन्त्रोद्धार मया प्रोक्तं प्रतिष्ठा विधिमथ शृणु॥ 43

रोहिण्यादित्य पुष्येषु न्दुहस्त पौषतिरुत्तरा।

स्वाती च स्थापने प्रोक्ता प्रतिष्ठा ग्जक्षमेव च॥ 44

स्थिरराशौ तु कर्तव्यमुभ राशौ मथापि वा।

अष्टमस्था ग्रहास्सर्वे नेष्टा वै स्थापनेषु च॥ 45

ातेषां स्थापने र्युक्तं विभवस्यातु(नु?)रूपतः।

पूर्वोक्त लक्षणैर्युक्तं प्रतिमं कारयेत्ततः॥ 46

In Public domain. Digitization Muthulakshmi Research Academy

प. 58

प्रासादस्याग्रतः कुर्यात् मण्डपं चतुरश्रकम्।
त्रिहस्तं पञ्चहस्तं वा षट्सप्ताष्टनवं तथा॥ 47
स्तम्भैष्षोडशभिर्युक्तं पङ्क्तिमानमथोच्छ्रयः।
आसनं खदिरं वापि जातिस्तम्बकमेववा॥ 48
क्रमुकं वेणुदण्डं वा अवक्रं निर्व्रणं तथा।
स्तम्भानि कारयेद्धीमान् प्रपां पूर्वोक्तवत्क्रमात्॥ 49
मध्यमे वेदिकां कुर्यात् परतः कुण्डमुच्यते।
मण्डपस्य तु मध्ये तु रत्नन्यासं तु कारयेत्॥ 50
वज्रं पूर्वे तु विन्यस्य आग्नेय्यां तु प्रवालकम्।
मरकतं दक्षिणे स्थाप्य नैर्ऋत्यां मौक्तिकं न्यसेत्॥

In Public domain. Digitization Muthulakshmi Research Academy

प. 58.

वारुण्यां पद्मरागं तु वैडूर्यं वायुगोचरे।
इन्द्रनीलं तु सौम्यायामैशान्यां स्फटिकं न्यसेत्॥ 52
P.144 मध्यमे चैव माणिक्कं विन्यसेत्तु विशेषतः।
रत्नानामप्यलाभे तु सुवर्णं विन्यसेत्ततः॥ 53
ततो देवं समायोज्य हृदयेन तु मन्त्रतः।
सुस्निग्धं कारयेत्तत्र शिल्पिनं पूजयेत्ततः॥ 54
एवमेव प्रकर्तव्यं लोहजानां विशेषतः।
अन्येकां स्थापनादौ तु विन्यसेत्तु विचक्षणः॥ 55
नयनमोक्षणं वक्ष्ये शृणुष्व कमलासन।
सुमुहूर्त्ते सुनक्षत्रे नेत्रद्वययुते दिने॥ 56

In Public domain. Digitization Muthulakshmi Research Academy

प. 58

नयनं मोक्षणं कुर्यात्पूर्वोक्ते मण्डपे शुभे।
गोमयेनोपलिप्याथ शालिना स्थण्डिलं कुरु॥57

अष्टद्रोणेन शालीश्च तदर्धं तण्डुलैरपि।
विकीर्य नववस्त्रेण दर्भैश्चैव परिस्तरेत्॥58

तत्रैव प्रतिमां स्थाप्य पूर्वाभिमुखमेव वा।
प्रच्छादयेत्ततो बिम्बं नववस्त्रेण देशिकः॥59

अभितः कलशानष्टौ विन्यसेत्तोयपूरिताः।
सवस्त्रान् सहिरण्यांश्च अष्टमूर्त्तिश्च संयुतान्॥60

गन्धपुष्पैश्च धूपैश्च हृदिना पूजयेत्ततः।
इन्द्रादीशानपर्यन्तं लोकपालान् समर्चयेत्॥61

In Public domain. Digitization Muthulakshmi Research Academy

प. 58

आक्षिहोमं ततः कुर्यात् आज्येनैव तु देशिकः।

अग्निमुखं च संकल्प्य नेत्रमन्त्रेण हूयते॥ 62

अष्टोत्तरशतं हुत्वा पूर्णाहुतिमथाचरेत्।

हेमसूच्या लिख्य नैत्रे माचार्यशिल्पिभिस्सह॥ 63

पक्ष्मरेखां समालिख्य तन्मध्ये तु कृष्णमण्डलम्।

ज्योतिर्मण्डलमालिख्य नेत्रमन्त्रसमन्वितः॥ 64

हेमदूर्वया चैव मध्वाज्यं विन्यसेत्ततः।

ताम्रपात्रेऽथ कांस्यैर्वा मधुत्रैव तु विन्यसेत्॥ 65

मधुवायेतिमन्त्रेण मधुना तापयेत्ततः।

घृतम्मिक्षेतिमन्त्रेण घृतंचैव तु तर्पयेत्॥ 66

In Public domain. Digitization Muthulakshmi Research Academy

प-58

गणानां त्वेति मन्त्रेण सवत्सां गां प्रदर्शयेत् ।

ततो ब्रह्म समुच्चार्य ब्राह्मणान् दर्शयेत्ततः ॥ 67

प्रोक्षयेत् ब्राह्मणान्तत्र साक्षतं सकुशोदकम् ।

प्रच्छन्नं पटमावर्ज्य जनान् सर्वान् प्रदर्शयेत् ॥ 68

प्रोक्षयेत् कलशान् विप्र पञ्चब्रह्मेण संयुतम् ।

गीतवाद्यसमायुक्तं वीणावेणुरवैस्सह ॥ 69

गेयं नृत्तसमायुक्तं जयशब्दैस्समन्वितम् ।

P.145 ततः प्रतिमामुद्धृत्य शुद्धिं कृत्वा तु देशिकः ॥ 70

पञ्चामृत् पञ्चगव्यैश्च पञ्चाङ्गैश्च समन्वितम् ।

पुण्याहं वाचयेत्तत्र पवमानेन प्रोक्षयेत् ॥ 71

In Public domain. Digitization Muthulakshmi Research Academy

प. 58

रथे वा शिबिकायां वा प्रतिमा रोप्य भक्तितः।
ग्रामप्रदक्षिणं कुर्यात् जले चैवाधिवासयेत्॥ 72
प्रतिमां पञ्चगव्येन स्नापयेत्कुदयेन तु।
नववस्त्रेण संवेष्ट्य कूर्चेणास्त्रेण संयुतम्॥ 73
मूलमन्त्रेण विप्रेन्द्र जले चैवाधिवासयेत्।
चतुष्पादुसमायुक्तं प्रपां कृत्वा तु देशिकः॥ 74
अभितः कलशानष्टौ विद्येश्वरसमान्वितम्।
सवस्त्रान् सहिरण्यांश्च विन्यसेत्तु विशेषतः॥ 75
एकरात्रि त्रिरात्रं वा पञ्चरात्रमथापि वा।
जलाधिवासनं सर्वालंकारसंयुतम्॥ 76

In Public domain. Digitization Muthulakshmi Research Academy

प. 58

जलादुत्तीर्य पूर्वेद्यु शुद्धिं कृत्वा तु कौतुकम्।
गन्धद्रव्यसमालोड्य लेपयेत् प्रतिमां ततः॥ 77
नववस्त्रेण संवेष्ट्य मूलमन्त्रेण देशिकः।
वेदिमध्ये न्यसेद्विप्र अष्टद्रोणेन शालिना॥ 78
शाल्यर्धं तण्डुलं न्यस्य तण्डुलार्धतिला न्यसेत्।
परिस्तरे तु दर्भाभिः शयनं पत्र कल्पयेत्॥ 79
अण्डजं मुण्डजं चैव रोमजं चर्मजं तथा।
समजेन समायुक्तं कल्पयेत् कल्पवित्तमः॥ 80
तस्योपरि न्यसेत् बिम्बं कूर्चेनैव समन्वितम्।
गन्धपुष्पादिना पूज्य हृदयेन तु मन्त्रतः॥ 81

In Public domain. Digitization Muthulakshmi Research Academy

प. 58

अभितः कलशानष्टौ विन्यसेन्मूर्त्तिसंयुतान् ।

बृहोदुरादुरादीन्विप्रेन्द्र विन्यसेत् स्वस्वनामतः ॥ 82

सवस्त्रान् सापिधानांश्च सहिरण्याः सकूर्चकान् ।

ईशान इन्द्रयोर्मध्ये प्रधानं कलशान् न्यसेत् ॥ 83

लोकपालांश्च कुम्भानि विन्यसेत् पूर्वमेव च ।

ततो होमं प्रकर्तव्यन्नवैर्वा पञ्च डाव वा ॥ 84

वृत्तं वा चतुरश्रं वा सर्वकुण्डानि कारयेत् ।

(विघ्नेशं तत्र संस्थाप्य मूलमन्त्रेण देशिकः)

(गन्धपुष्पादिना पूज्य पायसान्नं निवेदयेत्)

(लोकपालांश्च कुम्भानि विन्यसेत् पूर्वमेव च ।)

ईशान इन्द्रयोर्मध्ये प्रधानाग्निं विधीयते । 85

(प्लक्षाश्वत्थञ्च किञ्चिन्मनुष मात्रञ्च स्थापये-
द्विधिपूर्वकम् ।)

In Public domain. Digitization Muthulakshmi Research Academy

प. 58

P. 146. प्लक्षाश्वत्थश्च न्यग्रोधं बिल्वश्चैव विशेषतः।
उदुम्बरशमी चैव अपामार्ग खदिरी तथा॥ 86
पलाशश्चैव विप्रेन्द्र नवकुण्डेषु होमयेत्।
चतुर्दिक्षु च ईशान्यां पञ्चकुण्डेषु होमयेत्॥ 87
सर्वेषामप्यलाभे तु पलाशसमिधायुतम्।
समिधाज्यचरूं लाजान् सक्तुमाषयवांस्तथा॥ 88
? कदलीफलसंयुक्तं ... होमयेद्देशिकान्।
हुत्वा भुक्त्वा स्पृशेत् बिम्बं द्रव्यं प्रति विशेषतः॥ 89
द्रव्यान्ते व्याहृतिं हुत्वा संप्रोक्ष्य श्चैव हूयते।
लड्डुकं नाळिकेरं च मातुळुङ्गं फलानि च॥ 90

In Public domain. Digitization Muthulakshmi Research Academy

प. 58

सर्वभक्ष्यञ्च पनसं गणानां त्वेति होमयेत्।
सद्यो वाममघोरञ्च तत्पुरुषेण तथैव च॥११
हृदयञ्च शिरश्चैव शिखामन्त्रेण हूयते।
शतमर्धं तदर्धं वा होमयेद्वादिशैवकान्॥१२
(हृत्वा भुक्त्वा स्पृ··त् बिम्बं द्रव्यं प्रति विशेषतः।)
चतुर्दिक्षु चतुर्वेदैः कुर्याद्ध्ययनं ततः॥
ततः प्रभाते विमले पूर्णाहुतिमथाचरेत्।१३
स्नानवेद्यां समानीय स्नापयेन्मूलमन्त्रतः॥
गन्धपुष्पादिनाभ्यर्च्य पञ्चवर्णहविर्ददेत्।१४
जलादीन् स्नापयेद्विद्वान् देशे (?) विकेतु पदेऽपि च॥१५

In Public domain. Digitization Muthulakshmi Research Academy

प. 58

किञ्चिन्मानुषमादृश्य स्थापयेद्विधिपूर्वकम् । 95

यजनं -- प्रवक्ष्यामि शृणुष्व चतुरानन ॥

स्नानं कृत्वा यथा विद्वान् प्रविश्य भवनं ततः ॥ 96

प्राणायामं चरेत्तत्र पश्चाद्ब्रह्माणि विन्यसेत् ॥

अङ्गुष्ठादि कनिष्ठान्तं सृष्टिन्यासमुदाहृतम् । 97

हृदया पश्च विन्यस्य विघ्नेश हृदये न्यसेत् ॥

मधुश्च माधवश्चैव द्वारपालौ सुपूजयेत् । 98

पाद्यमाचमनं चार्घ्यं गन्धं पुष्पं च धूपकम् ॥

दीपश्चैव निवेद्यश्च प्रोक्षयेद्धृदयेन तु । 99

ततो लोहजबेरश्चेत् स्नात्वा पर्वणि पर्वणि ॥ 99 ।

In Public domain. Digitization Muthulakshmi Research Academy

प.58

(शैलजश्चेत् त्रिसन्ध्यायां स्नात्वा पर्वाणि पर्वाणि।)

शैलजश्चेत् त्रिसन्ध्यायां स्नात्वा गन्धोदकेनच॥100

मृण्मये भित्तिचित्रेवा पीठे कर्मार्चनं भवेत्।

पूर्वोक्तेनैव मार्गेण कल्पयेद्वासा त्रयात्॥ 101

सिंह पद्मञ्च विमलं यथाक्रमेण विन्यसेत्।

P.147 आवहयेत्तु विघ्नेशं मूलमन्त्रेण देशिकः॥ 102

पाद्यादीश्च हृदा दद्यात् शिरसा चन्दनं ददेत्।

पुष्पं वै शिखया चैव वामो धूपदीपकम्॥ 103

हविश्चैवास्त्रमन्त्रेण ताम्बूलं सद्यमन्त्रतः।

भक्ष्यं चैव गणानां त्वा ऽवमेवक्रमेण तु॥ 104

In Public domain. Digitization Muthulakshmi Research Academy

प. 58

पश्चादावरणं पूज्य गर्भावरणमेव च।

पुरुषं पूर्वदेशे तु अघोरं दक्षिणेन तु॥ 105

सद्यं पश्चिमतो न्यस्य वामदेवं तथोत्तरे।

ईशान्यामीशमन्त्रं तु आग्नेय्यां हृदयं न्यसेत्॥ 106

नैर्ऋत्यां तु शिखां पूज्य वायव्यां कवचं यजेत्।

ईशान्यां तु शिरश्चैव नेत्रमस्त्रं दिशासु च॥ 107

परिवारं तथा पूज्य तस्याग्रे मूलकं यजेत्।

शुक्रबृहस्पतिश्चैव अश्विन्याश्च तथैव च॥ 108

विश्वेदेवौ च विप्रेन्द्र ज्येष्ठायां तथैव च।

शास्ता चैव तु दुर्गां च प्रदक्षिणक्रमेण तु॥ 109

In Public domain. Digitization Muthulakshmi Research Academy

प. 58

विन्यसेत्तु विशेषेण पूजयेत् स्वस्वनामतः।

विबुधम्मीशादिग्भागे निर्माल्यन्धारकं न्यसेत् ॥ ॥10

अग्निकार्यं ततः कुर्याच्छास्त्रदृष्टेन कर्मणा।

पूर्वोक्तेन विधानेन अग्निमुखं च कल्पयेत् ॥ ॥11

आज्येनान्नसमायुक्तं पुष्पेणैव समन्वितम्

सप्ताहुतिञ्च विघ्नेशं मूलमन्त्रेण देशिकः ॥ ॥12

परिवाराश्च सर्वेषां स्वनाम्ना चैवमाहुतिः।

नित्योत्सवं ततः कुर्याद्विघ्नेशप्रतिमान्वितम् ॥ ॥13

प्रतिमं पात्रमध्ये तु विन्यसेद्हृदयेन तु।

ब्रह्मचारी शुचीभूत्वा सोष्णीषस्सोत्तरीयकम् ॥ ॥14

In Public domain. Digitization Muthulakshmi Research Academy

प. 58

॥ विघ्नेशोत्सवम् ॥

उत्सवं संप्रवक्ष्यामि शृणुष्व कमलासन।

पालिकाष्टकसंयुक्तं अङ्कुरानर्पयेत्ततः॥ ॥5

प्रासादस्याग्रतः कुर्यान्मण्डपं कारयेत्ततः।

मण्डपे शालिनास्तीर्य पालिकां मध्यमे न्यसेत्॥ ॥6

मुद्गमाषसमायुक्तं सर्षपेण समन्वितम्।

वापयेन्मूलमन्त्रेण तन्मध्ये सोमकुम्भकम्॥ ॥7

सुगुप्ते स्थापयेत्तत्र ध्वजारोहणमारभेत्।

ध्वजपटं पञ्चहस्तं वा सप्तहस्तमथापि वा॥ ॥8

विस्तारेण समं पुच्छं तदर्धशिखरं भवेत्।

P.148 क्रमुकं वेणुदण्डं वा स्कन्धत्रयसमन्वितम्॥ ॥9

In Public domain. Digitization Muthulakshmi Research Academy

प. 58

यष्टिना संघटित्वा तु ध्वजमारोपयेत्ततः।

मध्यमे वा च्छ्रये मूर्ध्नं पद्मसोपरि देशिक॥ 120

छत्रदीपसमायुक्तं मूलमन्त्रेण रोपयेत्।

भेरीं तु ताडयेत्तत्र हृदयेन तु मन्त्रतः॥ 121

रात्रौ ग्रामबलिं दत्त्वा द्यादा भूत सर्वदेवतान्।

यागस्य मण्डपं कृत्वा ईशे वाग्निगोचरेत्॥ 122

वारुण्यां संनिधौ वापि कर्तव्यं यागमण्डपम्।

पञ्चषट्सप्तहस्तैर्वा षोडशास्तम्भसंयुतम्॥ 123

मध्यमे वेदिकां कुर्यात्तालमात्रोच्छ्रयं भवेत्।

वेदिबाह्ये तु परितः पञ्च कुण्डानि कारयेत्॥ 124

In Public domain. Digitization Muthulakshmi Research Academy

प. 58

ाकाग्निं वाथ कुर्वीत वृत्तकुण्डमिहोच्यते।

वेदीमध्ये न्यसेच्छाली दर्भैश्चैव परिस्तरेत्॥ 125

मध्यमे विघ्नकुम्भं तु मूलमन्त्रेण विन्यसेत्।

अभितः कलशानष्टौ विन्यसेच्छालिमध्यमे॥ 126

दर्भैश्चैव पिशानष्टौ बृहोदरादि विन्यसेत्।

सवस्त्रान् सापिधानाश्च सहिरण्यान् सवस्त्रकान् 127

मूलमन्त्रेण चाभ्यर्च्य होमं कुर्यात्तु दैशिकः।

समिदाज्यचरूं लाजानपूपेन समन्वितम्॥ 128

विद्यादीशान पर्यन्तं हुत्वा प्रत्येकं पञ्चविंशति।

गणानान्त्वेति हुत्वा तु ~~पूर्णाहु~~ पूर्णाहुति च दस्य च॥ 129

In Public domain. Digitization Muthulakshmi Research Academy

प. 58

ततो ग्रामबलिं दद्याद्विघ्नेश प्रतिमान्वितम् ।

शूलं परशु खड्गञ्च दण्डं पद्मांच संयुतम् ॥ 130

पञ्चायुधसमायुक्तं बलिं दद्याद्विशेषतः ।

प्रथमं भूतरात्रन्तु द्वितीयं गन्धमुच्यते ॥ 131

तृतीयमृषिरात्रं तु चतुर्थं मन्त्र रात्रिकम् ।

सिद्धानां पञ्चमं प्रोक्तं षष्ठं राक्षसमुच्यते ॥ 132

सप्तमं विघ्नरात्रं तु इत्येते रात्रिदैवता ।

पञ्चाहं ऋषिरात्रादि सिद्धादि त्र्यहं भवेत् ॥ 133

आज्ययुक्तोदनञ्चैव ब्रह्मादीनां बलिं ददेत् ।

कौतुकं बलिदानान्ते कुर्यात् ग्रामप्रदक्षिणम् ॥ 134

In Public domain. Digitization Muthulakshmi Research Academy

प-58

चूर्णोत्सवं ततःकुर्यात्ततस्तीर्थं समाचरेत् ।
स्नापयेत्कलशाँ तत्र हृदयेन तु देशिकः ॥ 135
जलक्रीडां पुनःकृत्वा प्रविशेदालयंप्रति ।
साधितैःकलशैस्तत्र स्नापयेन्मूलबेरकम् ॥ 136

P. 149. ॥ विघ्नेशास्नपनम् ॥

स्नपनं संप्रवक्ष्यामि शृणुष्व कमलासन ।
प्रागग्रं तु चतुस्सूत्रमुदगग्रं तथैव च ॥ 137
शालिना विकिरेत्तत्र मध्यमे स्थापयेद्घटम् ।
पूर्वादीशानपर्यन्तं कलशान्यष्ट विन्यसेत् ॥ 138
मध्यमे विन्यसेद्विघ्नं बृहोदरादि चाष्टधा ।
द्वितीयावरणे चैव विघ्नेश्वरांश्च देवतान् ॥ 139

In Public domain. Digitization Muthulakshmi Research Academy

प. 58

तद्धृतेन च धर्मादीन् क्रमात् पूज्य विशेषतः।
प्रधानकुम्भे स्वर्णस्य पात्रं पूर्वे तु विन्यसेत्॥ 140
आचमनीयश्चाग्ने तु अर्घ्यं वै दक्षिणस्य तु।
नैर्ऋत्यां गन्धतोयञ्च वारुण्यां तु कुशोदकम्॥ 141
वायव्यां पञ्चगव्यं तु सोमे क्षीरं तु विन्यसेत्।
ऐशान्यां दधिसंयुक्तं प्रथमावरणान्विते॥ 142
घृतण्डुलाजसक्तुञ्च पुष्पभस्मस्तथैव च।
रजनीचूर्णं तु कदळी तिलसर्षपसंयुतम्॥ 143
पनसानाळिकेरञ्च डाडिमी मातुळुङ्गकम्।
नारङ्गद्वयञ्चैव द्वितीयावरणे तथा॥ 144

In Public domain. Digitization Muthulakshmi Research Academy

प.58

सकूर्चं वस्त्रसंयुक्तं सद्रव्यं साधिदैवतम् ।
एवं वै स्नपनं कुर्यात् सर्वशान्तिकरं परम् ॥ 145
कुलैकवंशमुद्धृत्य गणलोकं स गच्छति ॥
स्थापने पञ्च निष्कन्तु उत्सवं तु द्विनिष्ककम् 114
स्नपनं वै निष्कमर्धं तु आचार्यस्य तु दक्षिणा ॥
मूर्तिपान् परिचाराणां यथाशक्त्या तु दक्षिणा । 14

इति श्रीरतन्त्रे विघ्नेशस्थापनार्चन-
स्नपनोत्सव सप्त [अष्ट ?] पञ्चाशत्पटलः ॥

In Public domain. Digitization Muthulakshmi Research Academy

पटल: 59

॥ अथ ब्रह्मोद्धारविधिपटलः॥

------ पवन ग्रह्य न्दशान्तेनैव भूषितम्।

उपैशान्तं समुद्धृत्य गदादैकादशेन च॥ 1

शूलस्यान्त समुद्धृत्य खड्गान्तस्यादयस्ततः।

वज्रान्ते तु समं भिन्नं कुबेरं वासवान्वितम्॥ 2

वरुणस्य पञ्चमन्ताह्य वासवेन समन्वितम्।

पवनस्य पञ्चमं पश्चात् द्वायव्यस्य त्रयोदशः॥ 3

गदान्तान्तां समुद्धृत्य वज्रपञ्चमभूषितम्।

पाशान्तान्तं समुद्धृत्य वह्नयस्तात् सुभूषितम्॥ 4

वज्रान्तेन तु संयुक्तं गदावासवसंयुतम्।

P. 150　वरुणस्य पञ्चमं पश्चात् वज्रेणैव समायुतम्॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 59

× पवनस्य पञ्चमं ग्राह्य षोडशेन समायुतम्।
अग्राद्यभि समुद्धृत्य वज्रान्तेन सभूषितम्॥ 6
सोन्तान्तं समुद्धृत्य वज्रान्तेन समन्वितम्।
चन्द्राद्यन्तु समुद्धृत्य वासवेन समन्वितम्॥ 7
शस्य पञ्चमं ग्राह्य वज्रेणैव समन्वितम्।
× पवनस्य पञ्चमं ग्राह्य षोडशेन समायुतम्॥ 8
वह्निश्चैव समुद्धृत्य वासवेन समन्वितम्।
गदान्तान्त समुद्धृत्य वज्रेणैव समायुतम्॥ 9
कुबेरस्य चतुर्थन्तु पतस्य तृतीयकम्।
वह्निबीजं समुद्धृत्य चक्रान्तेन समायुतम्॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प. 59

वम ------- ममुद्धृत्य वासवेन समायुतम्।
पवनस्य पञ्चमं गृह्य द्वादशान्तेन संयुतम्॥ ॥
"अनिलान्तान्तमुद्धृत्य चक्राद्येन समायुतम्।
कुबेरान्तान्त समुद्धृत्य इन्द्राद्येन समायुतम्॥ 12
पवनस्य पञ्चमं पश्चात् वासवस्य त्रयोदश।
अंत्रशस्य तृतीयन्तु वज्रेणैव समायुतम्॥ 13
कुबेरान्तान्तमुद्धृत्य इन्द्राद्येन समायुतम्।
चन्द्रस्यैव चतुर्थं तु वज्रान्तेन समायुतम्॥ 14
कृशानुश्च समुद्धृत्य वज्रेणैव समायुतम्।
कुबेरान्तं सवेनैव खड्गस्यैव तु पञ्चमम्॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

प. 59

वज्रान्तेन समायुक्तं गदावासवसंयुतम्।
पाशास्य पञ्चमं ग्राह्य वासवेन समन्वितम्॥ 16
मारुतन्तु समुद्धृत्य अग्निबीजमथोच्यते।
वासवेन समायुक्तं वायुपञ्चममेव च॥ 17
वासवेन समायुक्तं पाशान्तं वज्रसंयुतम्।
वारुणस्य पञ्चमं पश्चात् वज्रेणैव समायुतम्॥ 18
पवनस्य पञ्चमं प्रोक्तं षोडशेन समन्वितम्।
ईशान्तान्तं समुद्धृत्य वक्रेणैव विभूषितम्॥ 19
? धनदस्य चतुर्थं तु बीजं पुनरेव तु।
अग्निबीजं ततोर्ध्वन्तु वासवेन समायुतम्॥ 20

In Public domain. Digitization Muthulakshmi Research Academy

प. 59

वायुपञ्चममुद्धृत्य द्वादशान्तेन संयुतम्।

अनलस्य पञ्चमं पश्चात् वज्रेणैव समायुतम्॥ 21

पाशस्य पञ्चमं प्रोक्तं द्वादशान्तेन संयुतम्।

पवनस्य चतुर्थं तु वासवेन समन्वितम्॥ 22

P. 151 धनदस्य चतुर्थं तु षोडशस्वर संयुतम्।

सद्यादीशानाख्य धर्मकामार्थमोक्षदम्॥ 23

ब्रह्मोद्धारमिदं प्रोक्तं विजयमण्डलं श्रृणु।

इति वीरतन्त्रे षट् = यां

(द्याकोन षष्ठि)?

ब्रह्मोद्धारविधि अष्टपञ्चाशत पटलः

In Public domain. Digitization Muthulakshmi Research Academy

पटलः ६०

॥ विजयमण्डलपटलः॥

प्रणम्य शिरसा देवं पृच्छशेतिस्मं पितामहः।
विजयमण्डलमेवं तु ब्रूहि मे शशिभूषण ॥ 1

विजयमण्डलकं वक्ष्ये सर्वपापहरं परम्।
सर्वपूजाफलं चैव सर्वयज्ञ पितामह ॥ 2

जयदं सर्वदेवानां विजयञ्जयमण्डलम्।
? सृष्ट्वानाम तु षाभि ब्रह्मस्य पद ... दाधिका ॥ 3

विष्णु द्वितीयमाश्रित्य विष्णुशक्तिसमन्विता।
विजया पतिमानुषु भिस्सर्वानिस्य साधनम् ॥ 4

तस्मात सर्वप्रयत्नेन नराणां द्रापयेद्बुधः।
विप्रक्षत्रिय विट्छूद्रैश्चांन्यजातिस्तु वर्जयेत॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. ६०

आर्द्रायाञ्चैव नक्षत्रे मण्डले तत्र निक्षिपेत्।
पञ्चगव्येन संस्नाप्य महाहविर्निवेदयेत्॥ 6
आचार्यस्यानुकूलञ्च ब्राह्मी मण्डलकं लिखेत्।
प्रासादस्य पुरो भागे गोमयेनानुलेपयेत्॥ 7
ब्राह्मण्य द्वादशाङ्गुल्य क्षत्रियस्य दशाङ्गुलम्।
वैश्यस्याष्टाङ्गुलं चैव शूद्राणाञ्च षडङ्गुलम्॥ 8
तत्तत्जातीस्त्रियाणान्तु अङ्गुलाङ्गुलहीनकम्।
मण्डलं तत्र मध्ये तु पद्मपुष्पं तु विन्यसेत्॥ 9
प्रपां कृत्वा विशेषेण चन्द्रबिम्बं प्रभावतः।
मण्डलं तत्र विन्यस्य सहस्रं वा तदर्धकम्॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प. 60

आवृतस्य जननात् ताम्बूलं दापयेत् पृथक् ।
? नित्यं त्रिंशत् त्र्यतमावाष्टोत्तरं शतम् ॥ 11
पूर्वैश्चतुर्लक्षणैर्युक्तं मण्डलं शिवसन्निधौ ।
एवं संवत्सरं कृत्वा पूर्वरूक्षं समुद्धरेत् ॥ 12
संवत्सरत्रयं वापि पञ्चषट् सप्त चाष्टधा ।
यथा श्रद्धानुकालस्य नित्यम्मण्डलपूजनम् ॥ 13
कुण्डलान्तात्तदूर्ध्वे तु अङ्कुरार्पणमुत्तमम् ।
पालिका घटिका चैव शरावञ्च यथाक्रमम् ॥ 14
कुम्भवर्धनयायुक्तं स्थण्डिलन्तु तद्द्रकम् ।
अष्टद्रोणेन शालीनां तदर्धं तण्डुलं भवेत् ॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

प. 60

P.152. तदर्धे तु तिलं कुर्यात् सप्तबीजं तु रसङ्कुलम्।
अङ्कुरानर्पयित्वा तु ज्वलद्भिर्दीपसंयुतम्॥ 16
उत्तमं तु त्रिसन्ध्यायां मध्यमन्तु द्विसन्ध्यकम्।
अधमं चैकसन्ध्यायां नित्यदीपसमायुतम्॥ 17
एवं सोमार्कं पूर्वं मूलबेरं तु चार्चयेत्।
एवं सप्तदिनं कुर्याद्रात्रौ चावाधिवासयेत्॥ 18
प्रासादस्याग्रतः कुर्यान्मण्डपं चतुरश्रकम्।
षोडशस्तम्भसंयुक्तं चतुर्द्वारसमायुतम्॥ 19
चतुस्तोरणसंयुक्तं वितानध्वजसंयुतम्।
सर्वलक्षणसंयुक्तं सर्वालंकारशोभितम्॥ 20

In Public domain. Digitization Muthulakshmi Research Academy

प.60

स्थण्डिलं तु ततः कुर्याद्दृष्ट्रद्रोणैश्च शालिना।
तदर्धं तण्डुलं कुर्यात्तदर्धं तिलसंयुतम्॥ 21
पुण्याहं कारयेत्तत्र अधिवासनमारभेत्।
उमामहेश कुम्भं तु मूलबिम्बं तु पूजयेत्॥ 22
कौतुकं बन्धयेत्तत्र अधिवासनमेव वा।
स्थण्डिलात्तु तदूर्ध्वे तु कुम्भं चैव तु विन्यसेत्॥ 23
गन्धद्रव्य समायुक्त म्माल्योहं कुम्भपूरिते।
उशीरं चन्दनं चैव कर्पूरं चैव कुङ्कुमम्॥ 24
(एला लवङ्ग?) कोष्ठत्व (एतैल्लोम्यै) स्सुपूजयेत्।
होमयेत्तु विशेषेण सर्वद्रव्य समायुतम्॥ 25

In Public domain. Digitization Muthulakshmi Research Academy

प.60

साधयेत्कुम्भकान्तत्र सवस्त्रं सहिरण्यकम्।
ससूत्रं कूर्चसंयुक्तं पूजयेत्तु विशेषतः॥ 26
पूजान्ते तु हविः कुर्यान्मूलबेरं तु वार्चयेत्।
प्रभाते विमले कुर्यात् स्नानं कृत्वा तु दैशिकः॥ 27
विशेषात् पूजनं कुर्यात् सर्वातोद्यसमायुतम्।
नृत्तगेयसमायुक्तं स्तोत्रमङ्गळवाचकैः॥ 28
जयशब्दं समुच्चार्य हरशब्दं समाकुलैः।
स्नपनं तु ततः कुर्याद्यथाशास्त्रोक्तमार्गतः॥ 29
स्नपनान्ते हविः कुर्यात् हाहविर्निवेदयेत्।
देवानां स्वर्णपट्टं तु उमाहेमत्स्य मङ्गलम्॥ 30

In Public domain. Digitization Muthulakshmi Research Academy

प. 60

पट्टगोळकसंयुक्तं मूलबिम्बं विशेषतः।
स्थलिका दुर्वि घण्टा च महाघण्टां तु दा(ता)डयेत्॥ 31
वस्त्रन्नमानि संयुक्तं दापयेच्च शिवं तथा।
सप्तमण्डलमालिख्यं सप्तलोकान् सुपूजयेत्॥ 32
मण्डलादृर्शनं कृत्वा वृतनारिचनारिणाम्॥
P. 153. मण्डलं तु पृथक्कुर्यात् प्रत्येकं प्रस्थशालिना॥ 33
व्रीहिपर्वतमेवं तु तिलपर्वतमेववा++।
स्वर्णपर्वतमेवं तु लवणं पर्वमेव वा॥ 34
आ···शं पर्वतं कुर्यान्माषपर्वतमेववा++।
मुद्गपर्वतमेवं तु सप्तपर्वतमेव वा॥ 35

In Public domain. Digitization Muthulakshmi Research Academy

प. 60

पर्वतानां तु द्दश्यान्तु वृतनारीत्वनारिभिः।
आचार्यं पूजयेत्पूर्वं वस्त्राङ्गुलीयकादिभिः॥ 36
अधमं त्वेकनिष्कं तु मध्यमं तु द्विनिष्ककम्।
उत्तमं तु त्रिनिष्कं तु आचार्यस्य तु दक्षिणा॥ 37
परिचारकानां सर्वेषां वस्त्रदानं तु दापयेत्।
सर्वं महेश्वरैर्युक्तं बहुजानान्तु पूजयेत्॥ 38
चण्डेश्वरस्यै तद्यान्तु पूजयेत्तु विशेषतः।
चण्डेश्वरस्यै तद्यान्तु पूजयेत्तु विशेषतः॥ 39
वस्त्र धान्यं च ताम्बूलं काञ्चनं दापयेत्तदा।
तत्सन्निधौ जनान् सर्वान् नारीनामन्तु दापयेत्॥ 40

In Public domain. Digitization Muthulakshmi Research Academy

प. 60

सर्वानमावृतं कुर्यात्तत् गृहं प्रविशेत्ततः।
आचण्डालादि सर्वेषामन्नपानं च दापयेत्॥ 41

आर्द्रायां चैव नक्षत्रे देवेशं पूजयेत्ततः।
एवं यः कुरुते नारी शिवलोकं स गच्छति॥ 42

कुलैकविंशमुद्धृत्य शिवलोकं स गच्छति।

इति वीरतन्त्रे षट्-यां, विजयमण्डल-
[षष्टि]?
विधि एकोनषट् पटलः॥

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 61

॥ लिङ्गलक्षणविधिपटलः ॥

([illegible] लिङ्ग प्रतिष्ठाविधिः) ?

लिङ्गस्य लक्षणं सम्यक् प्रतिष्ठाविधिमेव च।

तत् सर्वं ब्रूहि मे नाथ श्रोतुमिच्छाम्यहं प्रभो ॥ 1

अथ वक्ष्यामि ते ब्रह्मन्(न्) लिङ्गलक्षणमुत्तमम्।

शैलजं रत्नजं चैव धातुजं दारुजं तथा ॥ 2

मृण्मयं क्षणिकञ्चेति षड्विधं लिङ्गमुच्यते।

चतुर्विधं तु शैलं स्यात् सप्तधा रत्नजं तथा ॥ 3

अष्ट(धा) धातुजं प्रोक्तं दारुजं षोडशोच्यते।

मृण्मयं द्विविधं प्रोक्तं क्षणिकं सप्तधोच्यते ॥ 4

श्वेत रक्तं तथा पीतं कृष्णं चैव चतुर्विधम्।

शैलजं लिङ्गमाख्यातं तस्य लक्षणमुच्यते ॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 61

गोक्षीरसन्निभं चैव शङ्खकुन्देन्दु सन्निभा ।

सा श्वेता समाख्याता जयदा लक्षणान्विता ॥ 6

पीतसुवर्णसदृशा रजनी पूर्णसान्निभा ।

P.154 शिलालक्षणसंयुक्ता धनधान्यसुखप्रदा ॥ 7

माषगुग्गुलुसंकाशा महिषाक्षनिभा तथा ।

मृग मुद्ग समाकारा प्रजावृद्धिकर स्मृता ॥ 8

शिला कृष्णा तु सर्वेषां सर्वसिद्धिप्रदायिका ।

विप्रक्षत्रियवैश्यानां प्रिया न स्मृदा ॥ 9

द्विजानां च नृपाणां च शिला रक्ता जयप्रदा ।

श्वेता प्रातिपदा प्रोक्ता ब्राह्मणानां विशेषतः ॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प.61

माणिक्यञ्च प्रवालञ्च वैडूर्यं स्फटिकं तथा।
मरकतं पुष्यरागञ्च नीलञ्चैव तु रक्तजा (त?)॥ 11

माणिक्यं श्रीप्रदं प्रोक्तं प्रवालं वश्यकारणम्।
आकर्षणे तु वैडूर्यं स्फटिकं पुत्रवृद्धिदम्॥ 12

विद्वेषं मरकतं कुर्यात् स्तम्भनं पुष्यरागकम्।
नीलं तु कारणे कार्ये रत्नजानां फलं भवेत्॥ 13

हेमं श्रीप्रदं प्रोक्तं रौप्यं राज्यप्रदाधिकम्।
ताम्रं पुत्रसमृद्ध्यर्थं कांस्यं विद्वेषकारकम्॥ 14

प्रोच्चाटने चारकूटमायुः संक्षयकारकम्।
सीसं करोगकरणं त्रिपु सायुर्विवर्धनम्॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

प. 61

एवन्तु धातुमयं प्रोक्तं ततो दारुजमुच्यते।
देवदारु समीवृक्षा पिप्पलं चन्दनं तथा ॥ 16
आसनं खदिरं चैव वकुळी शिंशुपा तथा।
मधूकपद्मं डुण्डूक कर्णिकारं तथैव च ॥ 17
त्रिकुसैकर्तरर्जुनिका चैव प्लक्षोदुम्बरकस्तथा।
एते वर्गास्तु चत्वारो द्विजातिक्रमयोगतः ॥ 18
मृण्मय द्विविधं प्रोक्तं पक्वापक्वप्रभेदतः।
सैकतं गोमयं चान्नं पैष्टं गौलं फलं तथा ॥ 19
नवनीतं च सप्तैते क्षणिकास्समुदाहृता।
सैकतं मोक्षकामीनां गोमयं रोगनाशनम् ॥ 20

In Public domain. Digitization Muthulakshmi Research Academy

प. 61

अन्नमन्नाद्यकामस्य पैष्टं पुष्टिप्रदायकम् ।

गौळं प्रीतिपदं प्रोक्तं फलमिष्टार्थसिद्धिदम् ॥ 21

हालकृन्नवनीतं च क्षणिकानां फलं भवेत् ।

क्षणिकानां तु लिङ्गानां न कुर्यात् पीठबन्धनम् ॥ 22

प्रयाणकाशकुनानां तु शुभाशुभ परीक्षकाः ।

विप्रस्सुकन्या गजचित्रमांसं

? पूर्णकुम्भान्तु फलप्रदीपम् ।

सितं च पुष्पं दधि गोवृषांश्च

ध्वजञ्च भेरीमुरवं शुभानि ॥ 23

In Public domain. Digitization Muthulakshmi Research Academy

प. 61

रिक्तकुम्भ शवकेश विकीर्णा

मगली च खरप्रेतकरूपम्।

P. 155. सर्प शात्रु पतिता क्षुध पीडा

- ... यात्रग शुभं सतता ॥ 24

सुनिमित्तं भवेत् गच्छे दुर्निमित्तमहे स्थितिः।

आचार्य शिल्पिभिश्चैव वस्त्राभरणभूषिता ॥ 25

? यस्मिन्देशे तथां कृत्वा प्रांमुखस्य पतिस्थितः।

तदः प्रदक्षिणीकृत्य दोषादोष ~~च्च~~ परीक्षयेत् ॥ 26

यातत पास्थि गण्डांश्च सक्लिन्नाक्षरवारिणी।

दुस्थानस्थाश्च संस्थांश्च क्रमान्तर नियोजिता ॥ 27

In Public domain. Digitization Muthulakshmi Research Academy

प. 61

वक्राश्चर्कराप्यश्च रूक्षारोदरिम् ।

रेखा बिन्दुकलीकाश्च वर्जयेत्तु शिलां बुधः॥ 28

सूत्रपादवदाकारो रेखामिव त्रिधा स्मृता ॥।

खर्जूरपत्र सदृशा दूर्ध्वस्तम्भ समन्वितम्॥ 29

वेणुं करवदाकार लूत याद समायुता ॥।

इक्षोरग्र समाकाराभिरिका पञ्चधा स्मृता॥ 30

कलंक कृष्णरोगाभं कृष्णाभूकसन्निमम् ॥।

शिखि पञ्च समाकारं कलंकन्त्रिविधं भवेत्॥ 31

त्रासं स्फटिकसंकाशं शुक्तिभ्यां नरसन्निभा।

त्रासोप त्रिविधो ज्ञेया चतुर्थं बिन्दुरुच्यते॥ 32

In Public domain. Digitization Muthulakshmi Research Academy

प. 61

जम्बूफल समाकारा स्नानचूचुकसन्निभा।

बिन्दुरेख समाख्यातं विमलं त्रिविधमुच्यते॥ 33

विमलं हेमसदृशं कांस्यं लोहस्य सन्निभम्।

दुरीकूपा समाकारा सर्वदोषकरा भवेत्॥ 34

कृष्णे कृष्णानि नश्यन्ति श्वेते कृष्ण सुगर्भिता।

भिरिका कृष्णशैले तु सितवर्णेन दूषिता॥ 35

खर्जूरपत्रसदृशा दूर्वास्तम्भाकृति श्शुभा।

कन्याकृता गृह्णाति धान्यकोन्माशनाय च॥ 36

कालकं रोगदं ज्ञेयं त्रासरं राष्ट्रवर्धनम्।

बिन्दुना पुत्रनाशं स्यात् छिन्नलास्सर्वदुःखिताः॥ 37

In Public domain. Digitization Muthulakshmi Research Academy

प. 61

दुरीविनाशायोद्यन्यं हन्ति तन्मलोदितं।

एवं परीक्ष्य बहुधा कर्तव्यं लक्षणान्वितम्॥ 38

एकवर्णशिलां ग्राह्य भुक्तिमुक्तिप्रदायका।

गृह्यते बहुवर्णान्तु सर्वदोषकरं भवेत्॥ 39

स्त्री पुंनपुंसका शैला बाला वृद्धा तु मध्यमा।

सुभेदैराकृतिभेदैर्लक्षयित्वा तु लक्षणम्॥ 40

घण्टाशब्दा तु पुंलिङ्गा स्वरहीना नपुंसका।

शतालशब्दा शिलायान्तु या शिला युवति स्मृता॥ 41

P. 156 दीर्घशब्दतया वृद्धा ह्रस्वा बाला इति स्मृता।

पुंलिङ्गेन भवेल्लिङ्गं स्त्रीलिङ्गं पिण्डिका भवेत्॥ 42

In Public domain. Digitization Muthulakshmi Research Academy

प. 61

पादाधारशिला कुर्यान्नपुंसकेन विशेषतः।
प्रासादस्य वशाल्लिङ्गं लिङ्गमानेन हर्म्यकम्॥ 43
यस्य गर्भगृहार्धं तु लिङ्गं कन्यसमुच्यते।
नवभागं तु पञ्चांशं मध्यमं लिङ्गमुच्यते॥ 44
पञ्चभागं त्रिभागं तु उत्तमं लिङ्गमुच्यते।
रत्नलोहं विशेषेण ब्रह्मणादि क्रमान्न्यसेत्॥ 45
श्रीप्रदं चैव सौवर्णं राजतं राज्यदं भवेत्।
ताम्रं पुत्रप्रदं ज्ञेयं कांस्यं वै दुष्टिकारणम्॥ 46
रोगनाशमिदं ज्ञेयं पैत्तकं लिङ्गमुच्यते।
श्वभ्रेण लरं छिन्नं कृत्वा कर्तव्या चेद्विनाशनम्॥ 47

In Public domain. Digitization Muthulakshmi Research Academy

प.61

अङ्गुल्यादिव तस्यन्तं सर्वेषां जातिरुच्यते।
रत्नलिङ्गं प्रवक्ष्यामि श्रृणुष्व चतुरानन॥ 48
स्फटिकं मरकतं चैव माणिक्कं पद्मरागकम्।
मौक्तिकं च तथा नीलं वैडूर्यं च प्रवाळकम्॥ 49
इन्द्रनीलं पुष्यरागं वज्रं चैव तु कारयेत्।
निर्दोषं रत्नसंयुक्तं यथालाभं तु पूजितम्॥ 50
स्वयोनिं पौष्टिकं ज्ञेयमन्योक्तं मोक्षकामदम्।
वज्राणां चैव सर्वेषां स्वप्रमाणेन कारयेत्॥ 51
(त्ना?) रक्तानां चैव सर्वेषां धातुजं पीठमुच्यते।
(मुख) गोपुरश्चतुर्भागं श्वभ्रमेकांश तत्समम॥ 52

In Public domain. Digitization Muthulakshmi Research Academy

प-61

लिङ्गतार त्रिभागं तु पीठविस्तारमुच्यते।

पीठतार त्रिभागैकं गोमुख्य स तु दैर्घ्यकम्॥ 53

वृत्तं वा चतुरश्रं वा षोडशांशेन भाजितम्।

घृतवारिन्तु चैकांशं मध्यांशेन पट्टिका॥ 54

पद्मतुण्ड श्चतुर्थांश द्वयंशं वलयं भवेत्।

धां?
अधः पद्मं तु। पञ्चांश मध्यर्थांशेन पट्टिका॥ 55

एवं पीठ समाख्याता -------नाम फलमुच्यते।

स्फटिकं पुत्रवृद्धि स्यान्मरकतं पुष्टिदं भवेत॥ 56

माणिक्क मुक्तिदं ज्ञेयं पद्मरागं धनार्थकम्।

मौक्तिकं धनलाभं तु सर्वसिद्धिस्तु नीलकम्॥ 57

In Public domain. Digitization Muthulakshmi Research Academy

प. 61

वैडूर्यञ्चायुवृद्धिः स्याद्राष्ट्रवश्यं प्रवालकम्।
स्तम्भनं पुष्यरागञ्च आकर्षणं तु वज्रकम्॥ 58
एवमेव क्रमेणैव विज्ञेयं रत्नस्य लक्षणम्।
P.157. बाणलिङ्गस्य विप्रेन्द्र सुप्रमाणेन कारयेत्॥ 59
एवं द्विविधमाख्यातञ्चलस्थापनकं शृणु।
रोहिण्यां च पुनर्वस्वौ पुष्ये मृगशिरस्तथा॥ 60
हस्ता च रेवती चैव स्वाती चैव त्रिरुत्तराः।
स्थिरराशौ तु कर्तव्यमुभयो वाथ कल्पयेत्॥ 61
प्रासादस्याग्रतः कुर्यान्मण्डपं चतुरश्रकम्।
षोडशस्तम्भसंयुक्तं गोमयेनानुलेपयेत्॥ 62

In Public domain. Digitization Muthulakshmi Research Academy

प. 61

शालिना स्थण्डिलं कृत्वा तस्योर्ध्वे पालिका न्यसेत्।
चतुर्दिक्षु च विप्रेन्द्र पालिका विन्यसेत् क्रमात्॥ 63
नवाहैर्वापि सप्ताहैः पञ्चाहैर्वा विशेषतः।
अङ्कुराण्यर्पयेत्पूर्वं पूर्वोक्ते विधिना सह॥ 64
प्रतिष्ठामण्डपं कृत्वा पूर्वे कल्पं तु सत्तमः।
नदीतीरेऽथ कोष्ठे वा पर्वते वा विशेषतः॥ 65
उद्याने रुद्ध्य देशे वा गृहे वापि विशेषतः।
त्रिहस्तं पञ्चहस्तं वा सप्तहस्तमथापि वा॥ 66
षोडशस्तम्भसंयुक्तं मध्यमे वेदिका भवेत्।
चतुर्दिक्षु च ईशान्यां कुण्डं कुर्याच्च देशिकः॥ 67

In Public domain. Digitization Muthulakshmi Research Academy

प. 61

यावदुच्चं भवेत्पीठं तावदुच्चं तु कुण्डकम्।
वृत्तपीठस्य लिङ्गस्य वृत्तकुण्डमिहोच्यते॥ 68
मण्डपं भूषयेद्विद्वान् पूर्वोक्तेन विधानतः।
प्रतिमां क्षालयेत्तत्र पञ्चगव्येन देशिकः॥ 69
पुष्पमाल्यैरलंकृत्य कुर्याद्ग्रामप्रदक्षिणम्।
विमानप्रदक्षिणं वाथ कर्तव्यं देशिकोत्तमः॥ 70
प्रविशेन्मण्डपं तत्र जले चैवाधिवासयेत्।
नद्यां वापि तटाके वा हृदयेन तु मन्त्रतः॥ 71
प्रासादेन तु मन्त्रेण जलभाण्डेऽधिवासयेत्।
एकरात्रं त्रिरात्रं वा जले चाप्यधिवासयेत्॥ 72

In Public domain. Digitization Muthulakshmi Research Academy

प. 61

पूर्वादीशानपर्यन्तं कलशानष्ट विन्यसेत्।

सवस्त्रान् सहिरण्यांश्च विद्येश्वरसमन्वितान्॥ 73

लोकपालबलिं दद्यात् तत्तन्मन्त्रेण देशिकः।

जलादुत्तीर्य पूर्ववल्लिङ्गं प्रक्षालयेत्ततः॥ 74

प्रविश्य मण्डपं तत्र पञ्चगव्येन स्नापयेत्।

शुद्धिं कृत्वा विशेषेण पुण्याहं वाचयेत्ततः॥ 75

वेदिमध्ये न्यसेच्छालिं अष्टद्रोणसमन्वितम्।

तदर्धं तण्डुलं न्यस्य तण्डुलार्धं तिलं न्यसेत्॥ 76

P. 158. पद्ममष्टदलं लिख्य दर्भैश्चैव परिस्तरेत्।

शयनं पञ्चधा कल्प्य यथापूर्वोक्तमार्गतः॥ 77

In Public domain. Digitization Muthulakshmi Research Academy

प. 61

अण्डजञ्चैव विप्रेन्द्र पक्षिणां पिञ्छसंभवम् ।
मुण्डजन्तु दुकूलं वा कार्पासकमथापि वा ॥ 78
रक्तकम्बलकमेवोक्तं रोमजन्तु विधीयते ।
वृक्षत्वद्धेन कर्तव्यं चर्मजं तु विधीयते ॥ 79
वामजञ्चैव तु विप्रेन्द्र कुशेनैव तु कारयेत् ।
शयने शाययेद्देवं प्रासादन्तु मन्त्रतः ॥ 80
सर्वगन्धं समालोड्य लेपयेल्लिङ्गमेव वा ।
प्रकारं पश्चिमे पीठं शयने शाययेद्दृढा ॥ 81
नवकुम्भं समादाय सूत्रेण सह वेष्टयेत् ।
शुद्धोदकेन संपूर्य शरावेण पिधाय च ॥ 82

In Public domain. Digitization Muthulakshmi Research Academy

प. 61

लिङ्गाधिवासनात्पूर्वे तोरणानर्चयेद्बुधः।
द्वारकलशं विन्यस्य द्वारपालान् समर्चयेत्॥ 83
इन्द्रादीशानपर्यन्तं लोकपालककुम्भकान्।
स्थापयेद्विधिना विप्र स्वैःस्वैर्नामैर्विशेषतः॥ 84
ईशान्यां स्थापयेद्विप्र शिवकुम्भं च वर्धनीम्।
वर्धनीं गौरिबीजेन विन्यसेद्देशिकोत्तमः॥ 85
पूर्वादीशानपर्यन्तं विन्यसेद्वृकुम्भकान्।
दशायुधान् प्रकर्तव्यं स्वर्णैनैव तु देशिकः॥ 86
कुम्भमध्ये विनिक्षिप्य अस्त्रमन्त्रसमन्वितम्।
विद्येश्वरान्न्यसेत्तत्र स्वस्वं नामेन मन्त्रतः॥ 87

In Public domain. Digitization Muthulakshmi Research Academy

प. 61

गन्धैः पुष्पैश्च धूपैश्च दीपैश्चैव तु सुपूजयेत् ।
नैवेद्यं पायसा दद्याद्धृदयेन तु मन्त्रतः ॥ 88
ततो होमं प्रकुर्वीत लक्षणेन समान्वितम् ।
समिधाज्यचरूं लाजान् सर्षपांश्च यवांस्तिलान् ॥ 89
मुद्गमाषं च विप्रेन्द्रै क्रमशो हूयते पुनः ।
समिधानीशमन्त्रेण पुरुषेणाज्यमेव च ॥ 90
अघोरेण चरुं हुत्वा लाजान्वामेन चैव हि ।
सर्षपं सद्यमन्त्रेण हृदयेन यवन्तथा ॥ 91
तिलांस्तु शिरसा हुत्वा मुद्गन्तु शिखया सह ।
कक्षेति मन्त्रेण घृतं चैव तु हूयते ॥ 92

In Public domain. Digitization Muthulakshmi Research Academy

प. 61

आपोराजानि मन्त्रेण चरुं हुत्वा तु देशिकः।
रात्रौ जागरणं तत्र स्वप्नानी - परीक्षयेत्॥ 93
ततः प्रभाते विमले पूर्णाहुतिमथाचरेत्।
P.159. प्राकाग्निं वाथ पश्चाग्निं कुर्याद्वै देशिकोत्तमः॥ 94
वृद्धाग्निं देशिकेनैव कर्तव्यं होमकर्मणि।
होमं न कारयेद्विद्वान् समिधाज्यचरुं विना॥ 95
चित्तादींश्च जयादींश्च राष्ट्रभृच्चैव हूयते।
सर्वद्रव्यसमायुक्तं हव्यवाहं समुच्चरन्॥ 96
स्विष्टमग्नेतिमन्त्रेण हूयात्तदनन्तरम् (जुहु)।
हुत्वान्ते तु यदस्येति जुहुयात्तु विशेषतः॥ 97

In Public domain. Digitization Muthulakshmi Research Academy

प. 61

लिङ्गमुत्थापयेत्पश्चात् स्नानवेद्यञ्च विन्यसेत्।
मन्त्रन्यासोक्तमार्गेण न्यासं कृत्वा ततो बुधः॥ 98

- - - - - - - - कर्तव्यं व्योमव्यापिं समुच्चरन्।
स्नापयेच्छिवकुम्भं तु वर्धनीमपि पिण्डिका॥ 99

अनन्तादि शिखण्ड्यन्तात् स्नापयेल्लिङ्गमूर्धनि।
स्नपनं कारयेत्तत्र शताष्टं पञ्चाशदेव तु॥ 100

अभिषेकं कारयेद्विद्वान् गन्धपुष्पादिना ततः।
पञ्चवर्णहविर्दद्यात् ताम्बूलं दापयेत्ततः॥ 101

आचार्यं पूजयेत्पश्चात् मूर्तिपान् पूजयेत्ततः।
दैवज्ञं पूजयेत् पश्चात् पर्याष्टिपरिचारकान्॥ 102

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 62

॥ सृष्टिमूर्तिप्रतिष्ठाविधिपटलः॥

शिवं प्रणम्य विधिवत् परिपृच्छत् पितामहः।
सृष्टिमूर्ति प्रतिष्ठां तु ब्रूहि मे परमेश्वर ॥ 1

तत्सर्वमखिलं वक्ष्ये शृणुष्व चतुरानन।
उमास्कन्दहितश्चैव सुखासनं तथैवच॥ 2

कल्याणसुन्दरश्चैव चन्द्रशेखरमेव च।
गङ्गाधरस्य पञ्चैते सृष्टिरूपमिहोच्यते॥ 3

एतेषां स्थापनं वक्ष्ये लक्षणेन समन्वितम्।
प्रतिरूपसतं पूजा प्रतिष्ठागति निवृत्तिच॥ 4

उत्थता पूजा - - - - - - - - - मीश्वरो गृह्णाति।
यथा प्रतिष्ठे - - - - - - - - यम - - - - - ॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 61

अन्ये माहेश्वरान् पूज्य ब्राह्मणान् पूजयेत्ततः।

शैवान् संभोजयेत् सर्वान् शंभो जयेत्ततः॥ 103

एवं यः कुरुते मर्त्यः (र्त्यः?) शिवलोकमवाप्नुयात्॥

चललिङ्ग स्थापनं प्रोक्तमुमया सहितं शृणु। 104

इति वीरतन्त्रे चललिङ्ग प्रतिष्ठा विधि

(एक?) षष्टि पटलः॥

In Public domain. Digitization Muthulakshmi Research Academy

प. 62

रोहिण्यादित्यपुष्येन्दुहस्तपौष्णत्रिरुत्तरा।
स्वाती च स्थापने ---- क्ता अष्टमे ग्रहवर्जिता॥ 6

P.160. स्थिरराशौ तु कर्तव्यमुभयं राशिमथापि वा।
पूर्वोक्तविधिना चैव अङ्कुरार्पणमुच्यते॥ 7
प्रतिष्ठानक्षत्रपूर्वे तु अङ्कुरानर्पयेत्ततः।
नवाहे चैव सप्ताहे पञ्चाहे वा विशेषतः॥ 8
प्रासादस्याग्रतश्चैव मण्डपं कारयेत्ततः।
पञ्चषट्सप्तहस्तं तु कुर्याद्दूय म्मन्तनयम्॥ 9
अष्टमं नवहस्तं तु दशहस्तं तु मध्यमम्।
एकादश द्वादश करं त्रयोदशकरं तथा॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प.62

दशपञ्चकरं वापि उत्तमत्रयमुच्यते।

ऋषिश्छन्द देवतानां वक्ष्यामि सुरसत्तम॥ 11

व्यासं चैव वासिष्ठं च जामदग्न्यं च काश्यपम्।

भारद्वाजो भृगुश्चैव गौतमाङ्गिर कौशिकः॥ 12

मण्डपानां क्रमाद्विप्र श्छन्दसं श्रृणु सुव्रत।

? तृष्टुप्वानुष्टु च्च प्रतिकृति स्तथा ॥ 13

जगती चत्वरी चैव अतिशत्वरि रेवच।

उत्तमत्युक्तमेवं तु छन्दसानां विधीयते॥ 14

इन्द्राश्चापकुबेरश्च सोमश्च वरुणस्तथा।

विघ्नेशश्च कुबेरश्च ब्रह्मा विष्णु महेश्वरः॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

एतेषां देवतानां तु मण्डपस्याधिदैवताः।
क्रमात् ज्ञात्वा तु विप्रेन्द्र कारयेद्विधिपूर्वकम्॥ 16
स्तम्भं कृष्णशिलाचैव अथवान्यशिलान्यपि।
दारुणाच प्रकर्तव्यं शिल्पिना लक्षणैर्युतम्॥ 17
वकुळं च शिरीषंच याज्ञिकी वृक्षमेव वा।
असनं चापि वृक्षं वा क्रमुकं वैष्णन्तु वा॥ 18
पनसा नाळिकेरं वा वाकेत .....।
अयकं निर्व्रणं चैव पुष कोटीर वर्जितम्॥ 19
गात्रान् संगृह्य यत्नेन पाङ्क्ति मानमथोच्छ्रयम्।
कूटं वा मंण्डपं वापि प्रपां वापि च कारयेत्॥ 20

In Public domain. Digitization Muthulakshmi Research Academy

प. 62

क्रमुकं नाळिकेरं वा आर्द्र शाखेन पातयेत्।
एवं वै मण्डपं कृत्वा मध्ये वेदीं तु कल्पयेत्॥ 21
तस्यैव परितः कुण्डान् कल्पयेत्तु विशेषतः।
चतुरश्रार्धचन्द्रं च वृत्तं च पद्मन्तथैव च॥ 22
पूर्वादीनि चतुर्दिक्षु कोणे योन्याकृतिर्भवेत्।
ईशान इन्द्रयोर्मध्ये षट्कोणमिति कथ्यते॥ 23
उमास्कन्दहितं प्रोक्तं स्कन्दकुण्डं विनाकुरु।
P.161 उमासहितमेवोक्तमेकासनस्थितेऽपि च॥ 24
सुखासनसुदेवस्य कुण्डानां श्रृणु पद्मज।
चतुरश्रञ्च योनिञ्च त्रिकोणं वृत्तमेव वा॥ 25

In Public domain. Digitization Muthulakshmi Research Academy

प. 62

पञ्चाश्रंचैव पद्मं च अष्टाश्रं कल्पयेत् क्रमात्।
ईशान इन्द्रयोर्मध्ये सप्तकोणं तु कारयेत्॥ 26
सुखासनं मया प्रोक्तं कल्याणं च शृणुष्वथ।
पूर्वादीशाश्चतुर्दिक्षु वेदाश्रं कुण्डमुच्यते॥ 27
कोणेषु वृत्तकुण्डञ्च शिवाग्निं पञ्चकोणकम्।
कल्याणसुन्दरं प्रोक्तं चन्द्रशेखरमुच्यते॥ 28
चतुरश्रं धनुवृत्तं कुण्डञ्च चतुर्दिशि।
कोणेषु वृत्तकुण्डं तु शिवाग्निश्चाष्टकोणकम्॥ 29
गङ्गाधरस्य स्वरूपस्य कुण्डं वक्ष्यामि सुव्रत।
सुखासनवद्दिक्ष्वष्टौ शिवाग्निश्चाष्टकोणकम्॥ 30

In Public domain. Digitization Muthulakshmi Research Academy

प. 62

एतेषां देवतानां तु भिन्नासनमिहोच्यते।

एकासनस्थितान्देव्या योन्याकारं विदिक्षु वै॥ 31

एवमेव क्रमेणैव कुण्डं कुर्यात्तु पद्मज।

वितानैश्चोर्ध्वमाच्छाद्य अष्टदिक्षु ध्वजान्न्यसेत्॥ 32

गजाजं महिषा सिंहं मत्स्यकूर्मश्च गोवृषाः।

ध्वजमध्ये लिखित्वा तु अष्टदिक्षु च विन्यसेत्॥ 33

प्रथमं रत्नविन्यासं द्वितीयं नयनमोक्षणम्।

तृतीयं प्रतिमाशुद्धिश्चतुर्थं ग्रामप्रदक्षिणम्॥ 34

जलाधिवासनं पञ्च षष्ठं वै मण्डपं ततः।

सप्तमं शयनं चैव अष्टमं होममेव च॥ 35

In Public domain. Digitization Muthulakshmi Research Academy

प. 62

नवमं दक्षिणां दद्याद्दशमे स्थापनं भवेत्।
दशक्रममिह प्रोक्तं तेषां भेदं शृणुष्वथ॥ 36
पूर्वोक्तमण्डपे चैव सत्यकस्य पदेऽथवा।
गोमयालेपनं कृत्वा शालिना विकिरेत्ततः॥ 37
शाल्यर्धं तण्डुलान्न्यस्य तण्डुलार्धं तिलान्न्यसेत्।
परिस्तरेत्तु दर्भाभिर्नववस्त्रेण छादितम्॥ 38
तस्योपरि न्यसेत्पीठं पटन्नव कारयेत्।
ब्राह्मीके तु न्यसेद्वज्रमिन्द्रनीलं तु पूर्वतः॥ 39
मरकतं वह्निदेशे तु वैडूर्यं दक्षिणे ततः।
नैर्ऋत्यां पुष्यरागं तु मौक्तिका वरुणे न्यसेत्॥ 40

In Public domain. Digitization Muthulakshmi Research Academy

प. 62

वायव्यां स्फटिकं प्रोक्तं प्रवाळं सौम्यदेशतः।

ईशान्यां तु महानीलमेवं देवस्य विन्यसेत्॥ 41

P.162 देवीश्चैव न कर्तव्यं रत्नन्यासं विशेषतः।

चतुर्दिक्षु च मध्ये स्वर्णा निक्षिपेत्ततः॥ 42

स्कन्दस्य हेमं विन्यस्य सुस्निग्धं कारयेत्ततः।

प्रतिमां क्षाळयेत्तत्र आनेन वारिणा पुनः॥ 43

नयनमोक्षणं कुर्यान्नेत्रद्वययुते दिने।

आदित्यस्य पदे चैव नेत्रमोक्षणमुच्यते॥ 44

स्थण्डिलं कारयेत्तत्र अष्टद्रोणेन शालिना।

तण्डुलञ्च तदर्धञ्च तदर्धन्तिलमेव च॥ 45

In Public domain. Digitization Muthulakshmi Research Academy

प. ६२

तस्योपरि न्यसेद्वस्त्रं दर्भैश्चैव परिस्तरेत् ।

उमास्कन्दसहितं न्यस्य तस्योपरि विशेषतः ॥ 46

प्रच्छन्नपटसंयुक्तं पुण्याहं वाचयेत्ततः ।

ताम्रपात्रेऽथवा कांस्ये मध्वाज्यं चैव निक्षिपेत् ॥ 47

सुवर्णसूचिना युक्तं प्रहरं तत्र विन्यसेत् ।

अभितः कलशानष्टौ पूर्वादीशान्तं विन्यसेत् ॥ 48

शुद्धोदकेन संपूर्य स्वसूत्रान् वस्त्रसंयुतान् ।

ससूत्रान् सापिधानांश्च लोकपालाधिदैवतान् ॥ 49

शिल्पिना प्रहरेत्तत्र पक्ष्मरेखां विशेषतः ।

कृष्णमण्डलमालिख्य ज्योतिर्मण्डलमालिखेत् ॥ 50

In Public domain. Digitization Muthulakshmi Research Academy

प. 62

शिल्पिनं पूजयेत्तत्र पुण्याहं वाचयेत्ततः।
स्वर्णनरवसंयुक्तं मे दूर्वासमन्वितम्॥ 51
नेत्रमन्त्र मनुस्मृत्य स्पर्शयेन्नेत्रमेव च।
अक्षिहोमं ततः कुर्यात्तस्याग्रेतु विशेषतः॥ 52
प्रतिमस्याग्रतश्चैव स्थण्डिलं तु त्रिधा भवेत्।
पूर्वोक्तेन -- मार्गेण अग्निमुखं च कारयेत्॥ 53
आज्येन चरुणा चैव नेत्रमन्त्रेण हूयते।
अष्टोत्तरशतेनैव प्रत्येकं हूयते क्रमात्॥ 54
उत्तरे चैव विप्रेन्द्र गौरीनेत्रेण हूयते।
मध्यमे स्कन्दमेवं तु स्कन्दमन्त्रेण हूयते॥ 55

In Public domain. Digitization Muthulakshmi Research Academy

प. 62

तत्काले दक्षिणां दद्यात् पवमानेन प्रोक्षयेत्।
स्वर्णनखदूर्वेण मध्वाज्यं तु तर्पयेत्॥ 56
मधुवाता ऋताये तु मधुश्चैव तु तर्पयेत्।
घृतम्मिक्षेति मन्त्रेण घृतश्चैव तु तर्पयेत्॥ 57
दर्शयेच्च सवत्सां गां गौर्धयेनु भप्यमन्त्रतः॥
ब्रह्मणा दर्शयेत्तत्र ब्रह्म यज्ञान मन्त्रतः॥ 58
दर्शयेत सप्तकन्यांश्च उमादेवीं विशेषतः।
P. 163. दर्शयेत् ब्रह्मचारींश्च स्कन्दस्यैव तु देशिकः॥ 59
ब्रह्मयज्ञान मन्त्रेण प्रासादेन तु दर्शयेत्।
आपोहिष्ठेति संप्रोक्ष्य अर्घ्यसंयुतमेव च॥ 60
प्रच्छन्नपटमावर्ज्य जनान् सर्वान् प्रदर्शयेत्।
पञ्चगव्य समायुक्त मभिषेकं तु कारयेत्॥ 61

In Public domain. Digitization Muthulakshmi Research Academy

प. 62

तस्य कस्य पदे चैव प्रतिमं स्नानमुच्यते।
शुद्धे रुत्थेति मन्त्रेण शुद्धोदकेन स्नापयेत्॥ 62
पुण्याहं वाचयेत्तत्र पवमानेन प्रोक्षयेत्।
ग्रामप्रदक्षिणं कुर्यात् सर्वालंकारसंयुतम्॥ 63
रङ्गे वा शिबिकायां वा आरोप्य प्रतिमन्ततः।
गीतवाद्यसमायुक्तं शङ्खकाहळसंयुतम्॥ 64
नानाध्वजसमायुक्तं नानापिञ्छसमन्वितम्।
नानाभक्तजनैस्सार्धं कुर्यात् ग्रामप्रदक्षिणम्॥ 65
नद्यादीन् प्रविशेत्तत्र जलाधिवासनं कुरु।
नदीतटाकतीरे वा हृदे गत्वा विशेषतः॥ 66

In Public domain. Digitization Muthulakshmi Research Academy

प. ८२

तीरे समतलं कृत्वा गोमयेनानुलेपयेत्।
शालिना स्थण्डिलं कृत्वा प्रतिमं तत्र विन्यसेत्॥ 67
अपनीय च निर्माल्यं प्रतिमं स्नापयेत्ततः।
नववस्त्रेण संवेष्ट्य कूर्चेनैव समन्वितम्॥ 68
प्रतिमां चैव विप्रेन्द्र जले बेराधिवासयेत्।
चतुर्गात्र समायुक्तं प्रपां कृत्वा विशेषतः॥ 69
पूर्वादीशानपर्यन्तं कलशानष्ट विन्यसेत्।
सवस्त्रान् सापिधानांश्च विद्येश्वरसमन्वितान्॥ 70
लोकपालबलिं दद्याद्दिनं प्रति विशेषतः।
एकरात्र त्रिरात्रं वा पञ्चरात्रमथापि वा॥ 71

In Public domain. Digitization Muthulakshmi Research Academy

प. 62

दीपस्तम्भ वै क्याधिस्तस्माद्दीपं समाचरेत्।
वास्तुहोमं दिवा कुर्याल्लक्षणेन समन्वितम्॥ 72
दिनान्ते चैव विप्रेन्द्र जलादुत्तीर्य देशिकः।
आलयं प्रविशेत्तत्र पुष्पदन्तपदे स्थितः॥ 73
स्नापयेत्पञ्चगव्येन व्योमव्यापि समुच्चरन्।
गौरीबीजेन देव्याथ गुहं वै स्कन्दबीजतः॥ 74
शुद्धोदकेन स्नात्वा तु स्नापयेद्गन्धपूर्वकम्।
उशीरं चन्दनं चैव एलालवङ्गसंयुतम्॥ 75
स्वर्णसूत्रं कार्पासं बन्धयेत कौतुकं पुनः।
ततोऽधिवासनं कुर्याल्लक्षणेन समन्वितम्॥ 76

In Public domain. Digitization Muthulakshmi Research Academy

प. 62

P. 164. षोडशद्रोणसंयुक्तं शालिना विकिरेत्ततः।

तदर्धं तण्डुलं न्यस्य तण्डुलार्धं तिलं न्यसेत्॥ 77

पद्ममष्टदलं लिख्य दर्भैश्चैव परिस्तरेत्।

तोरणानर्चयेत्तत्र द्वारकुम्भांश्च विन्यसेत्॥ 78

वेदिबाह्ये तु परितो दशकुंभांश्च विन्यसेत्।

सवस्त्रान् सापिधानांश्च लोकपालाधिदैवतान्॥ 79

अर्चयेद्गन्धपुष्पाद्यैर्नैवेद्यं दीपयेत्ततः।

शयनं पञ्चभिः कल्प्य अण्डजाद्यैरनुक्रमात्॥ 80

पक्षिणां पिञ्छसंभूतं अण्डजं संप्रकीर्तितम्।

क्षौमं कार्पासजं वाथ मुण्डज ह्येति कीर्तितम्॥ 81

In Public domain. Digitization Muthulakshmi Research Academy

प. 62

रत्नकम्बळसंयुक्तं रोमजस्य प्रकीर्तितम् ।

वृक्षत्वचानि कर्तव्यं चर्मजं तद्विधीयते ॥ 82

कौशेयँ वामजं प्रोक्तं शयनं पञ्च उच्यते ।

पञ्चब्रह्मेण मन्त्रेण शयनं पञ्च कल्पयेत् ॥ 83

नववस्त्रेण संवेष्ट्य प्रच्छादयेत्तु कौतुकम् ।

प्रच्छादनेन संयुक्तं शयने शाययेच्छिवम् ॥ 84

गौरीबीजेन देव्यास्तु स्कन्दमूल गुह न्यसेत् ।

प्राक् च्छिरो पश्चिमे पादं विन्यसेद्देशिकोत्तमः ॥ 85

पि?
पधाय नववस्त्रेण गन्धपुष्पादिनार्चयेत् ।

नवकुम्भान् समादाय त्रिसूत्रैर्वेष्टयेत्ततः ॥ 86

In Public domain. Digitization Muthulakshmi Research Academy

प.62

शङ्खोदकेन संपूर्य शरावेण पिधाय च ।

पञ्चरत्नसमायुक्तं वस्त्रयुग्मेन वेष्टयेत् ॥ 87

प्रतिमस्यैशदिग्भागे प्रासादेन तु मन्त्रतः ।

पञ्चब्रह्मेण संयुक्तं शिवकुम्भं च विन्यसेत् ॥ 88

वर्धनीं तस्य वामे तु गौरीबीजेन संयुतम् ।

स्कन्दकुम्भं न्यसेन्मध्ये स्कन्दमूलेन मन्त्रतः ॥ 89

तत्तत् बीजं न्यासित्वा तु तदाचार्य विशेषतः ।

पूर्वादीशानपर्यन्तं विन्यसेदष्टकुम्भकान् ॥ 90

विदिशासु च विप्रेन्द्र वर्धनीं विन्यसेत्ततः ।

तासां मध्ये न्यसेद्विप्र स्कन्दकुम्भं विशेषतः ॥ 91

In Public domain. Digitization Muthulakshmi Research Academy

प. 62

सवस्त्रान् सापिधानांश्च सहिरण्यान् सकूर्चकान्।

अष्टविद्येश्वराश्चैव पूर्वादीनि च विन्यसेत्॥ 92

अम्बिका च उमा देवी ईशपत्नी तथैव च।

गणाम्बिका च संयुक्तं स्कन्दमाता तथैव च॥ 93

प्रज्ञा श्चागसुता श्चैव पार्वती च तथैव च।

P. 165 अन्तराले न्यसेद्देवान् वर्धन्याश्च विशेषतः॥ 94

कुमारं च गुहं चैव सुब्रह्मण्यं तथैव च।

सेनापतिं सुराग्रं च हरसूनु तथैव च॥ 95

शरवणोद्भवं श्चैव कार्तिकेयं च विन्यसेत्।

एवमेवक्रमान्न्य - - - - - तत्र द्वार्यर्कैस्सह॥ 96

In Public domain. Digitization Muthulakshmi Research Academy

प.62

गन्धैः पुष्पैश्च धूपैश्च स्वस्वबीजेन पूजयेत्।
स्वर्णेनैव कर्तव्यमायुधानां च विन्यसेत् ॥ 97
एलालवङ्गकर्पूरन्तिंबुजातिफलम्मुरम्।
लघुमात्रैव संयुक्तं कुम्भमध्ये विनिक्षिपेत् ॥ 98
वर्धन्यां सूदकुम्भेषु एवमेव क्रमा न्यसेत्।
हविर्निवेदयेत् पश्चात् प्रत्येकं तु विधीयते ॥ 99
ततो होमं प्रकुर्वीत लक्षणेन समान्वितम्।
पलाशं पूर्वतो भागे अश्वत्थं दक्षिणे तथा ॥ 100
पश्चिमे च कच्छवृक्षन्तु उदुम्बरं तु चोत्तरे।
ईशानइन्द्रयोर्मध्ये पलाशसमिधायुतम् ॥ 101

In Public domain. Digitization Muthulakshmi Research Academy

प. 62

शमी चैव अपामार्ग बिल्ववृक्ष समन्वितम् ।

प्लक्षं चैव समायुक्तं आग्नेयादि त्रिकोणके ॥ 102

सोमईशानयोर्मध्ये पलाशसमिधं तथा ।

समिधाज्यचरूं लाजान् सर्षपांश्च यवाँस्तिलान् ॥ 103

मुद्गमाषंच विप्रेन्द्र नवन्द्र-- मिहोच्यते ।

समिधा सद्यमन्त्रेण आज्यं वामेन हूयते ॥ 104

अघोरेण चरूं हुत्वा लाजं तत्पुरुषेण तु ।

सर्षपन्त्वीशमन्त्रेण यवा हृदयमन्त्रतः ॥ 105

शिरसा च तिलान् हुत्वा शिवमन्त्रेण मुद्गकम् ।

माषं तु कवचेनैव घृतम्मीक्ष्ये घृतन्तथा ॥ 106

In Public domain. Digitization Muthulakshmi Research Academy

प. 62

त्रियम्बकेन मन्त्रेण चरूं चैव नु हूयते ।
आपोराजेति मन्त्रेण राजा होमन्तु कारयेत् ॥ 107
एवं क्रमेण होतव्यं तत्तन्मन्त्रेण देशिकः ।
अष्टोत्तर शतं वापि पञ्चाशत्पञ्च विंशति ॥ 108
द्रव्यं प्रति विशेषेण होतव्यं देशिकोत्तमः ।
शैवाचार्येण संयुक्तं होमकर्मन्तु कारयेत् ॥ 109
द्रव्यान्ते चैव द्रव्यान्ते प्रतिमं संस्पृशेत्ततः ।
द्रव्यान्ते व्याहृतिं हुत्वा देवानामाज्य हूयते ॥ 110
चतुर्दिक्षु चतुर्वेदं कुर्यादध्ययनं ततः ।
श्रीरुद्रं पूर्वतो भागे होतारं चैव दक्षिणे ॥ 111

In Public domain. Digitization Muthulakshmi Research Academy

प. 62

P166 पश्चिमे च मध्ये प्राच्यां पवमानन्तथोत्तरे ।

चतुर्दिक्षु च गेहस्य गणिकानृत्तसंयुतम् ॥ 112

माहेश्वरसमायुक्तं नृत्तं कृत्वा तु भक्तितः ।

सर्वद्रव्यसमायुक्तं हव्यवाहं समुच्चरन् ॥ 113

स्विष्टमग्नेति मन्त्रेण जुहुयात्तदनन्तरे ।

एवमेवक्रमेणैव रात्रौ होमं तु कारयेत् ॥ 114

ततः प्रभाते विमले स्नानं कृत्वा तु देशिकः ।

मन्त्रन्यासोक्तमार्गेण न्यासं कृत्वा तु बुद्धिमान् ॥ 115

सृष्टिरूपप्रतिष्ठायां सृष्टिन्यासमुदाहृतम् ।

ततो वासनहोमं तु प्रधानाग्नौ च कारयेत् ॥ 116

In Public domain. Digitization Muthulakshmi Research Academy

प. 62

समिधाज्यचरूं लाजान् हुत्वा पञ्चदशाहुति ।

ईशानेन तु मन्त्रेण समिधान् हूयते क्रमात् ॥ 117

आज्यं सद्येन होतव्यं हृदयेन चरूं हुनेत् ।

लाजान्वामेन होतव्यं क्रमात् पञ्चदशाहुति ॥ 118

अन्यैर्होमं न कर्तव्य माचार्येणैव हूयते ।

चित्तादीनिच्च वर्गानि हूयते क्रमशस्तमः ॥ 119

हुत्वान्ते तु यवस्येति पूर्णाहुतिमथाचरेत् ।

शिवोमास्कन्दकुण्डेषु होमये द्देशिकोदयः ॥ 120

आचार्य दक्षिणान्द द्याद्यथाशास्त्रोक्तमार्गतः ।

नववस्त्रेण संयुक्तस्सोष्णीषस्सोत्तरीयकैः ॥ 121

In Public domain. Digitization Muthulakshmi Research Academy

प. ६२

पञ्चाङ्गभूषणा दद्याच्छिरवे कर्णे गळे तथा ।
हस्ताभ्यां पादयोश्चैव प्रते पञ्चाङ्ग उच्यते ॥ 122
अधमं दशनिष्कं तु मध्यमं द्विगुणं भवेत् ।
त्रिगुणं चोत्तमं प्रोक्तमाचार्यस्य तु दक्षिणा ॥ 123
तदर्धमुपदेष्टा च वास्तुहोमन्तदर्धकम् ।
मूर्तिपानां तु सर्वेषां तदर्धं दक्षिणान्ददेत् ॥ 124
दैवज्ञ द्विगुणन्तस्य दक्षिणान्दापयेत्ततः ।
अध्येतृ यन्तजपानां मूर्तिपार्धन्तु दक्षिणा ॥ 125
पर्याष्टि परिवाराणां यथाशक्त्या तु दक्षिणा ।
दीक्षिता शिवयोगीन्द्र समया चैव पूजयेत् ॥ 126

In Public domain. Digitization Muthulakshmi Research Academy

<u>प. 62</u>

सुमुहूर्ते सुलग्ने च देवमुत्थापयेत्ततः।
स्नानवेदीमनुप्राप्य फलकोर्ध्वे च विन्यसेत्॥ /2
घृतशिरोर्पणं कृत्वा हेमदूर्वाङ्कुराक्षतै(ः)।
घृतयुक्तम्य देवस्य पादयोर्मूर्ध्नि निक्षिपेत्॥ /28
मन्त्रन्यासोक्तमार्गेण सृष्टिन्यासन्तु कारयेत्।
P. 167 प्रतिमेषु च विप्रेन्द्र प्रासादं विन्यसेत्ततः॥ /2८
तत्तत्स्वनाममन्त्रेण पञ्चब्रह्मेण संयुतम्।
व्योमव्यापि समुच्चार्य प्रासादेन तु मन्त्रतः॥ /3०
ब्रह्ममङ्गेन संयुक्तं स्नापयेच्छिवकुम्भकम्।
वर्धनीं गौरिबीजेन स्नापयेत्तु विशेषतः॥ /3
स्कन्दमूलेन विप्रेन्द्र स्कन्दकुम्भानभिषिञ्चयेत्।
पूर्वादीशानपर्यन्तं स्नापयेत् स्थ स्थापितान्॥ /32

In Public domain. Digitization Muthulakshmi Research Academy

प. ८२

वर्धनीं स्थापयेद्दैव्या स्सहासनगते यदि।
देशिकानां त्रयाणां च स्नापयेदेककालतः॥ 133
स्नपनं कारयेत्तत्र नैवेद्यं दापयेत्ततः।
ताम्बूलं दापयेत् पश्चात् ब्राह्मणान् भोजयेत्ततः॥ 134
भोजयेत् सप्तकन्यांश्च ब्रह्मचारींश्च भोजयेत्।
शैवान् संभोजयेत्तत्र समयान् भोजयेत्ततः॥ 135
बौद्धमार्हतं चैव शैवं पाशुपतं तथा।
कापालं पाञ्चरात्रं च षडेते समया स्मृताः॥ 136
आचण्डालान्तमन्नाद्यन्नस्मिन्नहनि दापयेत्।
रात्रौ महोत्सवं कुर्यात् पश्चाहे सप्त ऽथवा॥ 137

In Public domain. Digitization Muthulakshmi Research Academy

प. 62

एवं यः कुरुते मर्त्य शिवलोकमवाप्नुयात्।
आदौ य तत्रमाश्रीत्य तच्छिष्येणैव कारयेत्॥ 138
प्रतिष्ठाकरणं सर्वमाचार्याय प्रदापयेत्।

इति वीरतन्त्रे षट्---यां
(द्वि?)
सृष्टिमूर्ति प्रतिष्ठाविधि एकषष्टिपटलः॥

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 63

॥ स्थितिमूर्तिप्रतिष्ठाविधिपटलः ॥

स्थितिमूर्तिप्रतिष्ठां च कीदृशानीह शास्त्रके ।
वक्तुमर्हसि देवेश अनुग्रहार्थं प्रभो मम ॥ 1
तत्सर्वमखिलं वक्ष्ये शृणुष्व कमलासन ।
रोहिणी च पुनर्वस्वे दिष्ये मृगशिरस्तथा ॥ 2
हस्तश्च रेवती चैव स्वाती चैत्र त्रिरुत्तरा ।
स्थिरराशौ तु कर्तव्यमुभयोरभिकारयेत् ॥ 3
अष्टमस्था ग्रहास्सर्वे न कुर्वीत कदाचन ।
ऋषभं वाहनं चैव अर्धनारी तथैव च ॥ 4
किरातश्चैव वीरेशं भिक्षाटनं तथैव च ।
एते पञ्च मूर्त्तीश्च स्थितिमूर्त्तिरुदाहृता ॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 63

प्रासादस्याग्रतः कुर्यान्मण्डपं चतुरश्रकम् ।
पञ्चषट्सप्तहस्तं वा अष्टहस्तन्नवन्तथा ॥ 6

P. 168. दशैकादशकं वापि द्वादशं वा त्रयोदशम् ।
षोडशस्तम्भयुक्तञ्च (च)तुर्द्वार समन्वितम् ॥ 7

असनीखदिरञ्चैव खादिरं स्तम्भकं तथा ।
क्रमुकं वैणवं वापि केतकीनालिकेरकम् ॥ 8

अवक्रं निर्व्रणं कृत्वा पङ्क्तिमानमथोच्छ्रयम् ।
आर्द्रशाखाभिराच्छाद्य वितानध्वजसंयुतम् ॥ 9

ध्वजमध्ये लिखेत्तत्र लोकपालस्य वाहनम् ।
यथाक्रमेण विन्यस्यं तत्तद्देशे ----- षुक ॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प. 63

दर्भमालाभिरावेष्ट्य मुक्तादामैरलंकृतम् ।
मध्यमे वेदिकां कुर्यात् परितः कुण्डमुच्यते ॥ 11
पूर्वे तु चतुरश्रं तु रग्नेरश्वत्थपत्रवत् ।
याम्यायां तु धनुश्चैव त्रिकोणं निर्ऋतिगोचरे ॥ 12
वृत्तं तु वरुणे चैव वायव्यां पञ्चकोणकम् ।
पद्मास्सोम च विन्यस्य ऐशान्यां सप्तकोणकम् ॥ 13
इन्द्रईशानयोर्मध्ये अष्टकोणं तु कारयेत् ।
? ऽाकासने षट्कोण्डयो योनिस्यात्तु विदिक्षु वै ॥ 14
ईशानइन्द्रयोर्मध्ये षट्कोणं वृषभस्य वै ।
ऋषभं वाहनं प्रोक्तमर्धनारी श्रणुष्वथ ॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

प. 63.

पूर्वादीनि चतुर्दिक्षु कुण्डं स्याच्चतुरश्रकम् ।
आग्नेयादि चतुर्दिक्षु योन्याकारादि कारयेत् ॥ 16
अर्धनारीश्वरं प्रोक्तं किरातार्जुनमुच्यते ।
चतुरश्रश्च योनीश्च धनुश्चैव त्रिकोणकम् ॥ 17
वृत्तपञ्चाश्र पद्मश्च सप्तकोणाष्टकोणकम् ।
पूर्वादीशानपर्यन्तं अष्टकोणं तु मध्यमे ॥ 18
सहासने तु विप्रेन्द्र आग्नेयादिषु योनिकम् ।
किरातार्जुनमेवोक्तं वीरेशं श्रृणु तत्त्वतः ॥ 19
चतुरश्रं धनुर्वृत्तं पद्मं चैव चतुर्दिशि ।
अश्वत्थश्च त्रिकोणश्च पञ्चाश्रश्चाष्टकोणकम् ॥ 20

In Public domain. Digitization Muthulakshmi Research Academy

प. 63

आग्नेयादि न्यसेदेतान् इन्द्र ईशानमध्यमे ।

सप्तकोणं भवेत्कुण्डं वीरेशमधुनोच्यते ॥ 21

वीरेशवत् कृतं कुण्डं भिक्षाटनस्य चैव हि ।

सोम ईशानयोर्मध्ये हरीणां वृत्तकुण्डकम् ॥ 22

इन्द्राग्नेययोर्मध्ये भूतकुण्डं त्रिकोणवत् ।

एवमेव क्रमेणैव कुण्डं कुर्याद्विचक्षणः ॥ 23

रत्नन्यास प्रकर्तव्यमाचार्यश्शिल्पिभिस्सह ।

P. 169. रत्नन्यासं प्रकर्तव्य सन्यकस्य पदेऽथवा ॥ 24

शालिना विकिरेत्तत्र तण्डुलान् तिल विन्यसेत् ।

नववस्त्रसमायुक्तं प्रतिमं तत्र विन्यसेत् ॥ 25

In Public domain. Digitization Muthulakshmi Research Academy

प.63

माणिक्कम्मध्यमे स्थाप्य परितः स्थापयेत् क्रमात्।
इन्द्रनीलं च वैडूर्यं स्फटिकं मरकतं तु वा॥ 26
पद्मरागप्रवाळञ्च वज्रमौक्तिकमुच्यते।
पूर्वादीनि विन्यसेदेतान् पञ्चब्रह्म समुच्चरन्॥ 27
सिंहासनस्थ देव्याश्च रत्नन्यासञ्च कारयेत्।
अर्धनारीश्वरश्चैव शिवभागे तु विन्यसेत्॥ 28
सुस्निग्धं कारयेत्तत्र क्षाळयेत् प्रतिमन्ततः।
नयनम्मोक्षणं कुर्यात् नेत्रयुग्म युते दिने॥ 29
आदित्यस्य पदे चैव नेत्रमोक्षणमुच्यते।
शाल्योपरि न्यसेद्देवं प्रच्छन्नपटसंयुतम्॥ 30

In Public domain. Digitization Muthulakshmi Research Academy

प. 63

सुवर्णसूचिना युक्तं शिल्पिना चक्षुर्मोक्षणम् ।
शिल्पिनं पूजयेत्तत्र शिल्पिनं तु विसर्जयेत् ॥ 31
अन्यवस्त्रं प्रकुर्याथ पुण्याहं वाचयेत्ततः ।
पूर्वादीशानपर्यन्तं कलशानष्ट विन्यसेत् ॥ 32
सवस्त्रान् सापिधानांश्च सहिरण्यान् सकूर्चकान् ।
हिरण्यनरवदूर्वाच घृतपात्रमपात्रकम् ॥ 33
आचार्यस्य चतुर्भूत्वा नववस्त्रसमन्वितम् ।
पञ्चाङ्गभूषणैर्युक्तं प्रोक्षयेत् प्रतिमन्त्रतः ॥ 34
अग्निहोमं ततः कृत्वा प्रतिमाग्रे विशेषतः ।
आज्येन चरुणा चैव नेत्रेनैव शताहुति ॥ 35

In Public domain. Digitization Muthulakshmi Research Academy

प. 63

हिरण्यनखदूर्वाच नेत्रं स्पर्श वामतः।
मध्वाज्यं तर्पयेद्धीमान् नेत्रमन्त्रसमन्वितम्॥ 36
मधुना पूरितं पात्रं मधुवातेति तर्पयेत्।
घृतम्मीक्षे घृतन्तार्ध्यं सवत्सां गां प्रदर्शयेत्॥ 37
ब्रह्मयज्ञानमन्त्रेण ब्राह्मणान् दर्शयेत्ततः।
प्रच्छन्नपरमावर्ज्य जनान् सर्वान् प्रदर्शयेत्॥ 38
ऽकासनगते वापि तत्तन्मन्त्रेण दर्शयेत्।
पवमानं समुच्चार्य पञ्चगव्याभिषेचनम्॥ 39
पञ्चब्रह्मेण संयुक्तं शुद्धतोयेन स्नापयेत्।
ग्रामप्रदक्षिणं कुर्याद्रथे वा शिबिकेऽथवा॥ 40

In Public domain. Digitization Muthulakshmi Research Academy

प. 63

सर्वचिह्नसमायुक्तं गेयनृत्तादिशोभितम्।

नदीतटाकतीरे वा गोमयेनानुलेपयेत्॥ 41

P. 170. ---------------- प्रतिमं विन्यसेत्ततः।

स्नापयेत्पञ्चगव्येन व्योमव्यापि समुच्चरन्॥ 42

गन्धपुष्पादिनाभ्यर्च्य जले चैवाधिवासयेत्।

सवस्त्रपरिधानेन कूर्चेनैव च्छादयेत्॥ 43

प्रतिमं कण्ठदघ्ने च जले चैवाधिवासयेत्।

प्रपां कृत्वा तु विप्रेन्द्र कलशानष्ट विन्यसेत्॥ 44

सवस्त्रान् सहिरण्यांश्च विद्येश्वराधिदैवतान्।

एकरात्रं त्रिरात्रं वा पञ्चरात्रमथापि वा॥ 45

In Public domain. Digitization Muthulakshmi Research Academy

प.63

जलादुत्तीर्य पूर्वेद्युः प्रविशेन्मण्डपं पुनः।
वास्तुहोमं दिशा कुर्यात्लक्षणेन समन्वितम्॥ 46
पुष्पदन्तपदे स्थाप्य पञ्चगव्याभिषेचयेत्।
व्योमव्यापि समुच्चार्य स्नापयेद्गन्धतोयकैः॥ 47
? स्वर्णसूत्रं सँयुक्तं कौतुकं हृदा ।
सर्वगन्धसमायुक्त लोड्य लेपयेत्प्रतिमं ततः॥ 48
नववस्त्रेण संछाद्य कूर्चेनैव समन्वितम्।
शालिना विकिरेद्वेदिं भारद्वयसमन्वितम्॥ 49
शाल्यर्धं तण्डुलं न्यस्य तण्डुलार्धं तिलं न्यसेत्।
लाजादर्भैर्विकिरेत्तु अण्डजादीनि कल्पयेत्॥ 50

In Public domain. Digitization Muthulakshmi Research Academy

प. 63

शयने शाययेद्देवं प्राक्छिरश्चोर्ध्ववक्त्रकम्।

वस्त्रेणैवोर्ध्वमाच्छाद्य व्योमव्यापि षडङ्गकैः॥ 51

प्रतिमस्यैश दिग्भागे शिवकुम्भं च वर्धनीम्।

स्नापयेच्छिवकुम्भं तु वर्धनीं स्नापयेच्छिवम्॥ 52

पूर्वोक्तेन तु मन्त्रेण सवस्त्रं पञ्चरत्नकम्।

पूर्वादीशानपर्यन्तं अष्टकुम्भं न्यसेत्ततः॥ 53

सवस्त्रान् सापिधानांश्च विद्येश्वराधिदैवतान्।

तस्य बाह्ये तु परितो लोकपालान् घटान् न्यसेत्॥ 54

गन्धपुष्पादिनाभ्यर्च्य स्वस्वमूलेन देशिकः।

ऽकासनस्थ देव्याश्च अन्तरालाश्च वर्धनी॥ 55

In Public domain. Digitization Muthulakshmi Research Academy

प.63

प्रतिमाद्दक्षिणे भागे प्रतिकुम्भं न्यसेत्ततः।
अश्वत्थोदुम्बरप्लक्षं वटं पूर्वादिदिक्षु च॥ 56
शमीखदिरबिल्वार्कं प्रधानाग्निं पलाशकम्।
गौरीवृषभकुण्डाभ्यां पलाशेनैव हूयते॥ 57
समिधाज्यचरूणाञ्च सक्तुमाषतिलानि च।
यवसर्षपसंयुक्तं नवद्रव्यं च हूयते॥ 58
समिधानीशमन्त्रेण आज्यं वामेन हूयते।
P.171 पुरुषेण चरूं हुत्वा लाजान् घोरेण चैव हि॥ 59
सक्तुञ्च सद्यमन्त्रेण माषं हृदयमेव च।
तिलान्वै शिखमन्त्रेण अष्टोत्तरशताहुतिः॥ 60

In Public domain. Digitization Muthulakshmi Research Academy

प.63

पञ्चब्रह्मषडङ्गैश्च स्वस्वमन्त्रेण हूयते।
आद्यक्षरन्तु ह्रस्वञ्च दीर्घं ब्रह्माङ्गमुच्यते॥ 61
त्र्यम्बकेन घृतं हुत्वा देवस्य त्वा चरुं हुनेत्।
द्रव्यान्ते व्याहृतिं हुत्वा स्पर्शयेत् प्रतिमन्ततः॥ 62
प्रभाते विमले स्नानं .... कृत्वा तु देशिकः।
स्थितिन्यासप्रकारेण स्नानं कुर्याद्विशेषतः॥ 63
उपदेष्टा च संयुक्तं मूर्तिपैस्सह देशिकः।
पूर्णाहुतिं ततः कृत्वा सर्वद्रव्यसमायुतम्॥ 64
हृव्यवाहं समुच्चार्य स्विष्टमग्नेति मन्त्रतः।
ईशानेन तु मन्त्रेण कुर्यात् पूर्णाहुतिं ततः॥ 65

In Public domain. Digitization Muthulakshmi Research Academy

प. 63

आचार्यदक्षिणां दद्यात् पूर्वोक्तेन विधानतः।
पदेऽष्टमूर्त्तिपाश्चैव पदान् सर्वांश्च पूजयेत्॥ 66
उत्थापयेत्तु प्रतिमं स्नापयेद्युपरि न्यसेत्।
स्थितिमार्गप्रकारेण अष्टत्रिंशत्कलान्न्यसेत्॥ 67
आसनं कल्पयेत्तत्र . . . . चकम्।
गेयनृत्तादिसर्वांश्च प्रासादञ्च प्रदक्षिणम्॥ 68
पञ्चब्रह्मषडङ्गेन व्योमव्यापि समुच्चरन्।
प्रासादेन प्रतिष्ठाप्य गन्धपुष्पादिनार्च्चयेत्॥ 69
स्थापयेच्छिवकुम्भाद्यैः स्वस्वमूलेन मन्त्रतः।
गन्धपुष्पादिनाभ्यर्च्य वस्त्रैराभरणैरपि॥ 70

In Public domain. Digitization Muthulakshmi Research Academy

प. 63

पञ्चवर्णहविर्दद्यात्ताम्बूलं दापयेत्ततः।

ब्राह्मणान् भोजयेत्तत्र शैवान् संभोजयेत्ततः॥ 7।

।स्थितिमूर्त्तिरिदं प्रोक्तं संहारस्थापनं शृणु।

इति वीरतन्त्रे चद्—यां

(त्रिश)
स्थितिमूर्त्ति प्रतिष्ठा द्विषष्टि पटलः॥

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 64

॥ संहारमूर्त्ति प्रतिष्ठाविधिपटलः ॥

प्रणम्य शिरसा देवं परिपृच्छत् पितामहः ।
को वा संहारमूर्त्तीनां स्थापनं परमेश्वर ॥ 1
तत्सर्वमखिलं वक्ष्ये शृणुष्व कमलासन ।
नृत्तञ्चैव तु कामारी कालदाहन्तथैव च ॥ 2
गजघ्न त्रिपुरघ्नञ्च जलन्धरवधन्तथा ।
वक्ष्ये संहारमूर्त्तीनां स्थापनं त्विह चोच्यते ॥ 3
रोहिणी च पुनर्वस्वौ पुष्ये मृगशिरस्तथा ।
P.172. हस्ते रेवतीञ्चैव स्वाती चैव त्रिरुत्तरा ॥ 4
स्थापयेत् स्थिरराशौ तु अष्टमे ग्रहवर्जिता ।
अङ्कुराण्यर्पयेत्पूर्वं नवाहे सप्तमेऽथवा ॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 64

मण्डपं चैव विप्रेन्द्र ऽकाशीतिपदं कुरु।

मध्ये नवपदे चैव वेदिकाराद्वि रुच्छ्रयम्॥ 6

तस्य बाह्ये तु परितो मानुषे कुण्डमुच्यते।

चतुरश्रं योनिकुण्डं च अर्धचन्द्रं त्रिकोणकम्॥ 7

वृत्तञ्चैव षडश्रं च पद्मं सप्ताश्रमेव च।

पूर्वादीनि च विप्रेन्द्र अष्टदिक्षु क्रमान्न्यसेत्॥ 8

ईशानइन्द्रयोर्मध्ये अष्टकोणं च कारयेत्।

ऽवं तु नृचरूपं स्यात् कामहारीन्तत् शृणु॥ 9

चतुरश्रस्तु षट्कोणं त्रिकोणं पञ्चकोणकम्।

ऽतानि च महादिक्षु वृत्तं शैवं प्रकल्पयेत्॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प. 64

ईशानइन्द्रयोर्मध्ये सप्तकोणं तु कारयेत् ।
गजघ्नस्य चतुर्दिक्षु वेदाश्रं कुण्डमुच्यते ॥ 11
त्रिपुरघ्नं तथा दिक्षु चतुष्कोणं त्रिकोणकं ।
जलन्धरवधाश्चैव एवमेव क्रमेण तु ॥ 12
ईशान इन्द्रयोर्मध्ये सप्ताश्रं कारयेत्ततः ।
एवमेव प्रकारेण कुण्डं कुर्यात्तु देशिकः ॥ 13
सत्यकस्य पदे चैव रत्नन्यासं तु कारयेत् ।
शालिना विकिरेत्तत्र तण्डुलान् तिल् विन्यसेत् ॥ 14
तत्तस्योपरि न्यसेद्देवं षण्णवत्यं विशेषतः ।
वज्रं मरकतं चैव वैडूर्यं च प्रवालकम् ॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

प. 64

स्फटिकं पद्मरागं च पुष्यरागन्तथैव च।
इन्द्रनीलं च विप्रेन्द्र पूर्वादीनीश्च विन्यसेत्॥ 16
माणिक्यं मध्यमे स्थाप्य शिवमन्त्रेण देशिकः।
गन्धपुष्पादिनाभ्यर्च्य प्रतिमां तत्र विन्यसेत्॥ 17
सुस्निग्धं शालिना कुर्यात् पुण्याहं वाचयेत्ततः।
आचार्य पूजनं कुर्याच्छिल्पिनं पूजयेत्ततः॥ 18
रत्नन्यासमिति प्रोक्तं नेत्रमोक्षणमुच्यते।
आदित्यस्य पदे चैव नेत्रमोक्षणमाचरेत्॥ 19
नयनद्वययुक्ते तु दिनलग्ने शुभे तथा।
शालिना स्थण्डिलं कुर्याद्दर्भैश्चैव परिस्तरेत्॥ 20

In Public domain. Digitization Muthulakshmi Research Academy

प. 64

नृत्तरूपं तदूर्ध्वे तु विन्यसेच्छिवमन्त्रतः ।
प्रच्छन्नपटसंयुक्तं पूर्वाभिमुखमेव च ॥ 21

P.173. स्थापयेत् कलशानष्टौ लोकपालाधिदैवतान् ।
सकूर्चान् सापिधानांश्च वस्त्रेणैव समायुतम् ॥ 22

स्वर्णसूचिना विप्र शिल्पिना प्रहरेत्ततः ।
पक्ष्मरेखां प्रकर्तव्यं कृष्णमण्डलमेव च ॥ 23

ज्योतिर्मण्डलमालिख्य नेत्रमन्त्रसमायुतम् ।
अक्षिहोमं ततः कुर्यात् आज्येन चरुणा तथा ॥ 24

नेत्रमन्त्रेण विप्रेन्द्र अष्टोत्तरशतं पृथक् ।
तत्काले दक्षिणां दद्यात् पुण्याहं वाचयेत्ततः ॥ 25

In Public domain. Digitization Muthulakshmi Research Academy

प. 64

स्वर्णदूर्वं विप्रेन्द्र मध्वाज्यञ्चैव तर्पयेत् ।
हिरण्यनखसंयुक्तं प्रासादेन समन्वितम् ॥ 26
ताम्रपात्रेऽथवा कांस्ये आज्यञ्चैव तु विन्यसेत् ।
तर्पयेन्मधुना विप्र मधुवातेति मन्त्रतः ॥ 27
घृतमक्षीति मन्त्रेण घृतं चैव तु तर्पयेत् ।
सवत्सां गां समानीय नृत्तरूपस्य सन्निधौ ॥ 28
गौर्धेनुहव्या मन्त्रेण दर्शयेत् गां विशेषतः ।
ब्राह्मणान् दर्शयेत्तत्र ब्रह्मयज्ञानमन्त्रतः ॥ 29
षण्णवत्येनं मन्त्रेण प्रोक्षयेत्तु विशेषतः ।
कुशेन चाक्षतं युक्तं प्रोक्षयेच्छिवमन्त्रतः ॥ 30

In Public domain. Digitization Muthulakshmi Research Academy

प. 64

प्रच्छन्नपटमावर्ज्य दर्शये मानुबान्ततः।

पवमानेन मन्त्रेण पञ्चगव्याभिषेचनम्॥ 31

शुद्धिं कृत्वा विशेषेण नन्त्रीणाञ्च संयुतम्।

शुद्धं रुकेति मन्त्रेण पुण्याहं वाचयेत्ततः॥ 32

सर्वालंकारसंयुक्तं कुर्यात् ग्रामप्रदक्षिणम्।

प्रतिमां कर्णदक्षे च जले चैवाधिवासयेत्॥ 33

प्रपां कृत्वा विशेषेण कलशान्विन्यसेत्ततः।

सवस्त्रान् सापिधानांश्च ससूत्रानष्टदिक्षु च॥ 34

एकरात्रं त्रिरात्रं वा पञ्चवा सप्तरात्रकम्।

दैवज्ञं पूजयेत् पश्चात् भक्तानां पूजयेत्ततः॥ 35

In Public domain. Digitization Muthulakshmi Research Academy

प. ६५.

मण्डपस्यैकदिग्भागे स्नानवेद्युपरि न्यसेत् ।

निर्माल्यं च विसृज्याथ प्रोक्षयेत् शुद्धवारिणा ॥ 36

घृतशिरोर्पणं कुर्यात् स्वर्णदूर्वाङ्कुराक्षतैः ।

षण्णवत्येन मन्त्रेण शिवमन्त्रेण संयुतम् ॥ 37

क्षालये च्छुद्ध तोयेन ---- नन्तु कल्पयेत् ।

मूर्धादि पादपर्यन्तं पञ्चब्रह्म न्यसेत्क्रमात् ॥ 38

अष्टत्रिंशत्कलान्यासं षडङ्गैनैव विन्यसेत् ।

P.174. ---- दर्शयेत्तत्र गन्धपुष्पादिनार्चयेत् ॥ 39

सुमुहूर्ते सुलग्ने च नक्षत्रकरणान्विते ।

शिवाख्य कलशं चैव शिवमन्त्रेण विन्यसेत् ॥ 40

In Public domain. Digitization Muthulakshmi Research Academy

प. 64

षण्णवत्येन मन्त्रेण अभिषेकं तु कारयेत् ।
उमाकुम्भं च विप्रेन्द्र पीठं चैव तु स्नापयेत् ॥ 41
पूर्वादीशानपर्यन्तं कलशैवाभिषेचयेत् ।
पञ्चब्रह्मेण मन्त्रेण स्नपनं तु यथाविधि ॥ 42
पूर्वोक्तलक्षणैर्युक्त मर्चयेत्तु विशेषतः ।
हविर्निवेदयेत् पश्चात् ताम्बूलं दापयेत्ततः ॥ 43
प्रतिष्ठोपकरणं सर्वमाचार्याय प्रदापयेत् ।
ब्राह्मणान् भोजयेत्तत्र पर्यष्टि परिचारकान् ॥ 44
शैवान् भोजयेत्तत्र यथाशक्त्याति दक्षिणा ।
एवं यः कुरुते मर्त्यस्सर्वपापाद्विमुच्यते ॥ 45

In Public domain. Digitization Muthulakshmi Research Academy

प. 64

यादि रुद्रपुरं सर्वे दध्याद्यं ये नरः।

तद्दिनादि च विप्रेन्द्र उत्सवं कारयेत् ततः॥ 46

आद्येषु त्रितयेष्वेषु न ध्वजारोहणक्रिया।

सप्ताहे वा नवाहे वा ध्वजारोहणमुच्यते॥ 47

एवं कृते महाशान्ति राजराष्ट्रसुखावहम्।

एवं यः कुरुते मर्त्यश्शिवलोकं स गच्छति॥ 48

इति वीरतन्त्रे ष्ट् — यां

(चतुश्च ?)

संहारमूर्त्तिप्रतिष्ठाविधि त्रिषष्टिपटलः॥

In Public domain. Digitization Muthulakshmi Research Academy

पटल: 65

॥ अथ गौरीस्थापनविधिपटलः॥

प्रणिपत्य पुनर्ब्रह्मा उवाच परमेश्वरीम्।
कथं गौरीप्रतिष्ठा च ब्रूहि मे परमेश्वर॥ 1
एतत्सर्वं समासेन श्रूयतां चतुरानन।
रोहिणी च पुनर्वस्वो पुष्ये मृगशिरस्तथा॥ 2
हस्तं च रेवती चैव स्वाती चैव त्रिरुत्तरा।
स्थिरराशौ तु कर्तव्यं अष्टमे ग्रहवर्जिताः॥ 3
देव्या रूपमहं वक्ष्ये शृणुष्व कमलासन।
द्विनेत्रां चारुवदनां सुस्तनौ च सुयौवनाम्॥ 4
द्विहस्तांश्च द्विपादांश्च नीलोत्पलधृतांकराम्।
करण्डमकुटां चैव सर्वाभरणभूषिताम्॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प.65

दुकूलपट्टवनसञ्छन्न वीरसमन्वितताम्।

पादौ नूपुरसंयुक्ता देव्या रूपमिहोच्यते॥ 6

प्रासादस्याग्रतः कुर्यान्मण्डपञ्चतुरश्रकम्।

P.175 पूर्वोक्तलक्षणैर्युक्तं मण्डपं कारयेद्बुधः॥ 7

ऽाकाशीति पदं कृत्वा वेदिकानवमध्यमे।

तस्या प्रान्त पदन्त्रीणि मध्यमे कुण्डमुच्यते॥ 8

पूर्वादीशानपर्यन्तं योनिमश्वत्थपत्रवत्।

लक्षणेन प्रकर्तव्यं पूर्वोक्तविधिना सह॥ 9

रत्नन्यासन्न कर्तव्यमुमादेव्या विशेषतः।

हेमन्तत्रैव निक्षिप्य अष्टदिक्षु क्रमेण तु॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प-65

सुस्निग्धं कारयेत्तत्र गौरीगायत्रिमन्त्रतः।
द्वितीयवर्गे विप्रेन्द्र तृतीयाक्षरसंयुतम्॥ 11
सप्तमस्य तृतीयं तु प्रथमस्य चतुर्थकम्।
बिन्दुनादसमायुक्तं मूलमन्त्रमिहोच्यते॥ 12
द्वितीयस्य तृतीयं तु ब्रह्ममुच्चारयेत्क्रमात्।
ह्रस्वा ब्रह्म समाख्याता दीर्घा ह्यङ्गानि चोच्यते॥ 13
नयनं मोक्षणं कुर्यान्नेत्रद्वययुते दिने।
आदित्यस्य पदे चैव गोमयेनानुलेपयेत्॥ 14
अष्टद्रोणेन शालि स्यात् स्थण्डिलं चतुरश्रकम्।
तदर्धं तण्डुलं न्यस्य तण्डुलार्धं तिलान् न्यसेत्॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

प-65

पद्ममष्टदलं लिख्य दर्भैश्चैव परिस्तरेत्।
नववस्त्रं न्यसेत्तत्र विन्यसेत्प्रतिमन्ततः॥ 16
वस्त्रेण वेष्टयेद्देवीं प्रच्छन्नपटसंयुतम्।
हिरण्यसूचिकायुक्तं पक्ष्मरेखां लिखेत्ततः॥ 17
कृष्णमण्डलमालिख्य ज्योतिर्मण्डलमालिखेत्।
शिल्पिनं पूजयेत्पश्चात् रक्तवस्त्राणां विसर्जयेत्॥ 18
वस्त्रेणावेष्ट्य न देव्याः प्रच्छन्नपटसंयुतम्।
अभितः कलशानष्टौ वामाद्यादीनि विन्यसेत्॥ 19
अग्निहोमं ततः कुर्यादाज्येनैव विशेषतः।
अग्निमुखं च संकल्प्य पञ्चाशत्संख्यया हुनेत्॥ 20

In Public domain. Digitization Muthulakshmi Research Academy

प. 65

नेत्रमन्त्रेण हुत्वा तु चरूं तत्रैव हूयते।

ताम्रपात्रेऽथवा कांस्ये घृतं मधुञ्च पूरयेत्॥ 21

नेत्रमन्त्रशतं जप्त्वा हिरण्यनखसंयुतम्।

मधुवाता ऋतायेति मधुना तर्पयेत्ततः॥ 22

घृतम्मीक्षे घृतन्त्वर्प्य नेत्रमन्त्रञ्च विन्यसेत्।

गौर्धेनुह्व्यमन्त्रेण सवत्सां गां प्रदर्शयेत्॥ 23

ब्राह्मणान् दर्शयेत्तत्र सप्तकन्याञ्च दर्शयेत्।

नेत्रमन्त्रसमायुक्तं धान्यराशीञ्च दर्शयेत्॥ 24

P. 176. प्रच्छन्नपटमावर्ज्य जनान् सर्वान् प्रदर्शयेत्।

पञ्चगव्येन विप्रेन्द्र अभिषेकं समाचरेत्॥ 25

In Public domain. Digitization Muthulakshmi Research Academy

प. 65

अलंकृत्य पता देवीं कुर्याद्ग्रामप्रदक्षिणम् ।
नदीतटाकतीरे वा गोमयेनानुलेपिते ॥ 26
पीठं तत्रैव निक्षिप्य गौरीं तत्रोपरि न्यसेत् ।
स्नापयेत्पञ्चगव्येन जलाधिवासनं कुरु ॥ 27
नववस्त्रेण संवेष्ट्य कूर्चेनैव समन्वितम् ।
जलमध्ये न्यसेद्देवीं गौरीबीजेन देशिकः ॥ 28
पूर्वादीशानपर्यन्तं वर्धनीं विन्यसेत्ततः ।
सवस्त्रान् सापिधानांश्च वामाद्यादीनि विन्यसेत् ॥ 29
तस्योर्ध्वे तु प्रपां कृत्वा दीपयुक्तो विधीयते ।
एकरात्रं त्रिरात्रं वा पञ्चरात्रमथापि वा ॥ 30

In Public domain. Digitization Muthulakshmi Research Academy

प. 65

जलादुत्तीर्य पूर्वेद्युः प्रविशेदालयं प्रति।
स्नापयेत् पञ्चगव्येन नववस्त्रेण वेष्टयेत्॥ 31
सर्वगन्धं समालोड्य देव्याश्चैव तु लेपयेत्।
सौवर्णेन समायुक्तं कौतुकं बन्धयेत्ततः॥ 32
आपादलम्बितं कूर्च्यं वस्त्रेण सह वेष्टयेत्।
वेदिमध्ये न्यसेत्तत्र अष्टद्रोणेन शालिना॥ 33
तदर्धं तण्डुलं न्यस्य तण्डुलार्धं तिलान्न्यसेत्।
परिस्तरेत्तु दर्भाभि शयनं त्वण्डजादिभिः॥ 34
तस्योपरि न्यसेद्देवीं गौरीमूलेन देशिकः।
प्राक्छिरं पश्चिमे पादं विन्यसेत्तु विशेषतः॥ 35

In Public domain. Digitization Muthulakshmi Research Academy

प. 65

प्रच्छन्नपटसंयुक्तं पुण्याहं वाचयेत्ततः।

वर्धनीं नवमादाय सूत्रेण परिवेष्टयेत्॥ 36

शुद्धोदकेन संपूर्णान् प्रत्येकं वस्त्रवेष्टितान्।

देव्यानामीशदिग्भागे प्रधानं वर्धनीं न्यसेत्॥ 37

गौरीबीजेन मन्त्रेण सकूर्चं सापिधानकम्।

पूर्वादीशानपर्यन्तं वर्धनीमष्ट विन्यसेत्॥ 38

प्रत्येकं वस्त्रसंयुक्तं प्रधाने हैम विन्यसेत्।

मध्ये गौरीं संपूज्य नवशक्तीन् सुपूजयेत्॥ 39

पूर्वादीशानपर्यन्तं मनोन्मनी त्वीशगोचरे।

वर्णनामस्त्ररूपन्तु विन्यसेद्वर्धनीं ततः॥ 40

In Public domain. Digitization Muthulakshmi Research Academy

गन्धपुष्पादिनाभ्यर्च्य गौरीमूलेन मन्त्रतः।
नैवेद्यं पायसं दद्यात्ताम्बूलं च निवेद्य च॥ 41
ततो होमं प्रकुर्वीत नव वा पञ्च एव वा।
P.177 समिधाज्यचरून् लाजान् मुद्गमाष यवांस्तथा॥ 42
गौरीमूलेन मन्त्रेण समिधान् हूयते क्रमात्।
आज्यं गायत्रिमन्त्रेण हृदयेन चरून्तथा॥ 43
शिरोमन्त्रेण लाजान्वै मुद्गं वामेन हूयते।
माषं सद्येन होतव्यं यवमीशान मन्त्रतः॥ 44
एवमेव क्रमेणैव प्रत्येकं तु शताहुतिः।
घृतम्मिक्षेति मन्त्रेण घृतेनैव शताहुतिः॥ 45

In Public domain. Digitization Muthulakshmi Research Academy

प. 65

देवस्य त्वेति मन्त्रेण अन्नाहुतिमथाचरेत्।
द्रव्यान्ते व्याहृतिं हुत्वा स्पर्शयेत्प्रतिमन्ततः॥ 46
हव्यवाहेति मन्त्रेण सर्वद्रव्यसमन्वितम्।
स्विष्टमग्नेति मन्त्रेण जुहुयात्तदनन्तरे॥ 47
नृत्तगेयसमायुक्तं रात्रौ जागर मुच्यते।
चतुर्दिक्षु चतुर्वेदैः कुर्याद्ध्ययनं ततः॥ 48
गौरीसूक्तं जपेत्तत्र आग्नेयाति (दि?) चतुर्दिशि।
ततः प्रभाते विमले स्नानं कृत्वातु देशिकः॥ 49
मन्त्रन्यासोक्तमार्गेण सृष्टिन्यासं तु कारयेत्।
ततो वासनहोमं तु कारयेद्विधिना ततः॥ 50

In Public domain. Digitization Muthulakshmi Research Academy

समिधाज्यचरूणान्तु होमयेद्देशिकोत्तमः।
गौरीगायत्रिमूलेन हृदयेन पृथक्पृथक्॥ 51
हुत्वान्ते तु यदस्येति स्विष्टकृद्धूयते क्रमात्।
आचार्यन्दक्षिणान्दद्यात् पञ्चाङ्गं भूषणादिकम्॥ 52
वस्त्राभरणैर्युक्तं गोभूमी काञ्चनादिभिः।
पदार्थान्पूजयेत्तत्र उपदेष्टा च पूजयेत्॥ 53
ततो मुहूर्तमन्वीक्ष्य देवीमुत्थापयेत्क्रमात्।
स्नानवेद्युपरिन्यस्य गन्धपुष्पादिनार्चयेत्॥ 54
सृष्टिन्यासक्रमेणैव देव्यामङ्गेषु विन्यसेत्।
प्रधानवर्धनीं चैव विमानं दक्षिणं कुरु॥ 55

In Public domain. Digitization Muthulakshmi Research Academy

प.65

स्नापयेत्तु विशेषेण गौरीमूलमनुस्मरन् ।

पञ्चब्रह्मषडङ्गैश्च स्नापयेदष्टवर्धनीम् ॥ 56

स्नपनं कारयेत्पश्चात् तथा विभविस्तरम् ।

पञ्चवर्णहविं दद्यात्ताम्बूलं तापयेत्ततः ॥ 57

ब्राह्मणान् भोजयेत्तत्र सप्तकन्यांच भोजयेत् ।

कल्याणं कारयेत् पश्चात् मण्डपेतु विशेषतः ॥ 58

गोमयाल्लेपनं कृत्वा शालिना विकिरेत्ततः ।

शाल्योपरि संस्थाप्य मानुषे तु पदेऽथवा ॥ 59

P.178 स्थण्डिले स्थापयेद्देवीं दिक्षि दक्षिणतो न्यसेत् ।

तस्यग्रे स्थण्डिलं कृत्वा अग्निमुखञ्च कारयेत् ॥ 60

In Public domain. Digitization Muthulakshmi Research Academy

प-65

तत्र विष्णुं समाहूय दद्यादुदकपूर्वकम्।
गौरीबीजेन संयुक्तं ब्रह्माङ्गेन समायुतम्॥ 61
? हृदयेनाति .... ङ्घे मम।। ... श्मान स्पर्शयेत्ततः।
आचार्यो हृवि संपूर्य लाजान्हृदय मन्त्रतः॥ 62
ईशानेन तु मन्त्रेण लाजहोमं तु कारयेत्।
प्रदक्षिणं ततः कृत्वा लाजाहोमं पुनः पुनः॥ 63
त्रिःकृत्वा तु विशेषेण हुत्वा चित्तादिभिस्तथा।
हुत्वान्ते तु यदस्येति जुहुयात्तदनन्तरे॥ 64
भिन्नासनमिदं प्रोक्तं सहासनमत श्रृणु।

इति वीरतन्त्रे षट्सहस्रसंहितायां
गौरीस्थापनविधि (र्पञ्च)? चतुष्षष्टिपटलः

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 66

॥ अथ पादुकास्थापनविधिपटलः॥

पादुकास्थापनं वक्ष्ये शृणुष्व चतुरानन।
सौवर्णं राजतं ताम्रं लोहजं वापि कारयेत्॥ 1
दन्तैर्वा दारुजैर्वाथ कारयेत्तु विशेषतः।
लक्षणं संप्रवक्ष्यामि यथावदनुपूर्वशः॥ 2
उत्तमं द्वादशाङ्गुल्यं मध्यमं तु नवाङ्गुलम्।
अधमं सप्ताङ्गुलं प्रोक्तं पादुकस्य तु दैर्घ्यकम्॥ 3
विस्तारं तु तदर्धं स्यात्तस्य मध्ये तदर्धकम्।
अङ्गुल्यादि त्र्यङ्गुल्यं मुत्सेध -------॥ 4
पादाधानन्तु कर्तव्यन्तस्योर्ध्वे वृत्तमुच्यते।
एवं लक्षणसंयुक्तं पादुकौ कारयेत्ततः॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 66

पर्यन्तं शोभितं कृत्वा माणिक्यादि सुरत्नकैः।
रत्नानामप्यलाभे तु सुवर्णादीनि कारयेत्॥ 6
प्रतिष्ठाविधिं प्रवक्ष्यामि पूर्वोक्त मण्डपे शुभम्।
मण्डप संस्कारं विभवेन समन्वितम्॥ 7
वास्तुहोमं दिशां कुर्यात् लक्षणेन समान्वितम्।
दर्भमालाभिरावेष्ट्य चतुस्तोरणसंयुतम्॥ 8
अष्टदिक्षु ध्वजा न्यस्य वितानैरुपशोभितम्।
मुक्तादामैरलंकृत्य पुष्पमालोपशोभितम्॥ 9
वेदिकाराद्रि चोत्सेधं दर्पणोदरवत्कृतम्।
अष्टद्रोणेन शालीच तन्मध्ये विन्यसेत्ततः॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प. 66

शाल्यर्धन्तण्डुलन्न्यस्य तण्डुलार्धन्तिला न्यसेत् ।

P 179 पद्ममष्टदलं लिख्य दर्भैश्चैव परिस्तरेत् ॥ 11

शयनं कल्पयेत्तत्र अण्डजाद्यैस्ततो बुधः ।

जलादुत्तीर्य देवेशं शुद्धिं कृत्वा विशेषतः ॥ 12

प्रासादं प्रविशेत्तत्र पुष्पदन्तपदे स्थितः ।

आचार्यश्चतुर्भक्त्वा नववस्त्रेण वेष्टयेत् ॥ 13

सोष्णीषस्सोत्तरीयश्च सर्वाभरणभूषितः ।

आचार्यस्य च बीजेन सर्वाङ्गेषु च विन्यसेत् ॥ 14

उपदेष्टा समायुक्त माचार्यद्वयमुच्यते ।

उपदेष्टा शरीरन्तदाचार्यो जीव उच्यते ॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

प.66

स हिनस्तु भवेद्विप्र सर्वसंपत्करायं च।

मन्त्रन्यासं प्रकर्तव्यं लक्षणेन समन्वितम्॥ 16

हस्ताभ्यां संस्पृशेत्तत्र कादि पादान्तमेव च।

अङ्गुष्ठादिकनिष्ठान्तं पञ्च ब्रह्म न्यसेत्क्रमात्॥ 17

मध्यादि तर्जन्यान्तं षडङ्गं विन्यसेत्क्रमात्।

अस्त्रं करतले चैव विन्यसेत्तु विशेषतः॥ 18

अष्टत्रिंशत्कला चैव विन्यसेद्देशिकस्य तु।

प्राकृतं भावमुत्सृज्य शिवोऽहमिति भावयेत्॥ 19

प्रतिमं पञ्चगव्येन स्नापयेच्छिवमन्त्रतः।

स्वर्णसूत्रसमायुक्तं कौतुकं बन्धयेद्दृढा॥ 20

In Public domain. Digitization Muthulakshmi Research Academy

प. 66

फलत्रयं च कर्पूरमुशीरं चन्दनेन तु।
समालोड्य च सर्वं तु लेपयेच्च समन्ततः॥ 21
सुमुहूर्ते सुलग्ने च शयने शाययेच्छिवम्।
प्रतिमं नववस्त्रैश्च विधानसकलं ततः॥ 22
प्रासादेन तु मन्त्रेण गन्धपुष्पादिनार्चयेत्।
वेदकुम्भं समादाय सूत्रेणै वेष्टयेन्न तः॥ 23
शुद्धोदकेन संपूर्य सकूर्चं सापिधानकम्।
सवस्त्रं सहिरण्यं च पञ्चरत्नसमन्वितम्॥ 24
द्रव्येणैव समायुक्तं पिण्डिकादीनि विन्यसेत्।
प्रतिमस्यैशा दिग्भागे स्थापयेच्छिवकुम्भकम्॥ 25

In Public domain. Digitization Muthulakshmi Research Academy

प. 66

शिवकुम्भे शिवं पूज्य पञ्चब्रह्मषडङ्गकैः ।
वर्धनीं तस्य वामे तु गौरीबीजेन स्थापयेत् ॥ 26
पूर्वादीशानपर्यन्तं अष्टविद्येश्वरैर्युतम् ।
- - - - - - - - ताम्बूलं दापयेत्ततः ॥ 27
ततो होमं दिवा कुर्यात् अंशमध्ये पदे तथा ।
ततो होमं प्रकर्तव्यं लक्षणेन समन्वितम् ॥ 28
P.180. पलाशाश्वत्थबिल्वं च दुम्बरप्लक्षमेव च ।
खदिरं च शमी चैव अपामार्गं तथैव च ॥ 29
पूर्वादीनि क्रमान्येता मध्य पलाशमेव च ।
सर्वेषामेव होमानां मध्यमं प्लाशमुच्यते ॥ 30

In Public domain. Digitization Muthulakshmi Research Academy

प. 66

समिधाज्य चरूं लाजान् सर्षपांश्च यवांस्तिलान् ।
मुद्गमाषं च विप्रेन्द्र ह्येव द्रव्यमिहोच्यते ॥ 31

समिधा हृदयेनैव आज्यं च शिव उच्यते ।
चरुहोमं शिखाचैव लाजान् वै कवचेन तु ॥ 32

नेत्रेण सर्षपं चैव अस्त्रेणैव यवांस्ततः ।
ईशानेन तिलां हुत्वा मुद्गं सद्येन हूयते ॥ 33

माषं वामेन होतव्यं मेवमेव क्रमेण तु ।
सहस्रं वा तदर्धं वा तदर्धार्धमथापि वा ॥ 34

शतमष्टोत्तरं वापि किरीशे विजयस्तथा ।
उग्रो तथा भीमो ह्याते होमस्य देवताः ॥ 35

In Public domain. Digitization Muthulakshmi Research Academy

प. 66

वामी ज्येष्ठी च काळी च कलविकरणी तथा ।

बलविकरणी बलप्रमथनी सर्वभूतमनोन्मनी ॥ 36

क्रमात्कुण्डेषु विप्रेन्द्र शक्तीनाम् मिहोच्यते ।

द्रव्यान्ते प्रतिमं स्पृष्ट्वा पञ्चब्रह्मषडङ्गकैः ॥ 37

चतुर्दिक्षु चतुर्वेदैः कुर्यादध्ययनं ततः ।

व्योमं प्रासादमन्त्रं च ब्रह्ममङ्गं तथैव च ॥ 38

दीक्षितैर्ब्राह्मणैश्चैव चतुर्दिक्षु जपेत्ततः ।

त्राणि पर्वाणि ते यन्त्र .... समाकुलैः ॥ 39

सर्वद्रव्य समायुक्तं हव्यवाहं समुच्चरन् ।

स्विष्टमग्नेति मन्त्रेण जुहुयात्तदनन्तरे ॥ 40

In Public domain. Digitization Muthulakshmi Research Academy

प. 66

चित्तादीनिँश्च जयादींश्च रष्ट्रद्याश्चैव हूयते ।

हूयते क्रमशो विप्र व्याहृति जुहुयात्तदा ॥ 41

शिवदीक्षा ··तव्यं लक्षणेन समन्वितम् ।

पर्याष्टि परिचारांश्च शिवदीक्षावहो विदुः ॥ 42

सु?
एवं कृते तु विप्रेन्द्र राजराष्ट्र प्यखावहम् ।

अथातोयसानहोमं तु प्रधानाग्नौ तु होमयेत् ॥ 43

यदस्य क्रमणेत्येति स्विष्टकृद्धूयते क्रमात् ।

प्रभाते दक्षिणाँ दद्या··चार्यादि चिर्वश ः ॥ 44

आचार्यं पूजयेत् पूर्वं वस्त्राङ्गुलीयकारिभिः ।

पश्चाङ्‌भूषणं दद्यादाचार्यस्य विशेषतः ॥ 45

In Public domain. Digitization Muthulakshmi Research Academy

प. 66

अधमं दशनिष्कं तु मध्यमं द्विगुणं भवेत् ।

P. 181 उत्तमं त्रिगुणं प्रोक्तं आचार्यस्य तु दक्षिणः ॥ 46

दशभागैकभागं तु मूर्तिपानां तु दक्षिणः ।

? स्तोत्रादर्द्धध्ययनादीनां तदर्धं दक्षिणा शुभे ॥ 47

गोमयालेपनं कृत्वा पद्ममध्ये प्रकल्पयेत् ।

पद्मस्य पूर्वदिग्भागे वेदाश्रं कुण्डमुच्यते ॥ 48

पुण्याहं वाचयेत्तत्र शुद्धिं कृत्वा तु पादुका ।

पवमानेन संप्रोक्ष्य शुद्धे रुत्यै ततो ब्रुवन् ॥ 49

शालिना विकिरेत्तत्र तदर्धं तण्डुला तिलान् ।

पादुकौ विन्यसेन्मध्ये नववस्त्रस्य चोपरि ॥ 50

In Public domain. Digitization Muthulakshmi Research Academy

पिधाय नववस्त्रेण गन्धपुष्पादिनार्चयेत्।
भूतवर्गान्त वर्गेषु अग्निं संयोजयेत्ततः॥ 51
तद्बक्ष्यौ समायुक्त विसर्ग समायुतम्।
शिवविष्णुसमारूढं पादुकाबीजमुच्यते॥ 52
इदं मन्त्रमनुस्मृत्य स्थापयेत् पूर्वतो मुखम्।
श्रीभूमिं दक्षिणादीनि अथा देवौ प्रकीर्तितौ॥ 53
वर्धनीं नवमादाय सूत्रेण परिवेष्टितम्।
पूरयेच्छुद्धतोयेन सकूर्चान् सापिधानकान्॥ 54
सवस्त्रान् हेमसंयुक्तान् पूर्वादीशान्तके न्यसेत्।
पादुकादीश दिग्भागे वर्धनीं विन्यसेत्ततः॥ 55

In Public domain. Digitization Muthulakshmi Research Academy

प-66

पूर्वादीशानपर्यन्तं विन्यसेद्भादिशक्तिनः।

मनोन्मनीं प्रधानस्य विन्यसेत्तु विशेषतः॥ 56

गन्धपुष्पैश्च धूपैश्च दीपैश्चरु विन्यसेत्।

ततो होमं प्रकर्तव्यं पूर्वोक्तविधिना सह॥ 57

होमान्ते पञ्चगव्येन प्रोक्षयेत् सद्यमन्त्रतः।

सुमुहूर्ते सुलग्ने च वर्धनीं विन्यसेत्ततः॥ 58

पूर्वादीशानपर्यन्तं स्थापयेन्मूलमन्त्रतः। ?

गन्धपुष्पादिना पूज्य विन्यसेच्छिवमन्त्रतः॥ 59

नैवेद्यं दापयेत् पश्चात् ताम्बूलं दापयेत्ततः।

आचार्यं पूजयेत् पूर्वं पर्याप्ति परिचारकान्॥ 60

In Public domain. Digitization Muthulakshmi Research Academy

प. 66

भोजयेच्छिवभक्तांश्च सवर्णांश्च दक्षिणाम् ।
नित्योत्सवं तु काले तु प्रदक्षिणमथाचरेत् ॥ 61
अग्रतः पृष्ठतो वापि प्रजे सत्पत्कराय च ।
ब्रह्मचारी वहित्वा तु पादुकार्चनयेत्ततः ॥ 62
पादुकस्योपरिष्टात्तु कल्पयेदस्त्रराजतः ।
एवं यः कुरुते मर्त्यश्शिवलोकमवाप्नुयात् ॥ 63
P. 182. पादुकास्थापनं प्रोक्तं चित्रस्थापनकं शृणु ।

इतिवीरतन्त्रे षट्- यां

[षट्ः]
पादुकास्थापनविधिः पञ्चषष्टिपटलः ॥

In Public domain. Digitization Muthulakshmi Research Academy

पटलः ६७

॥ अथ चित्रप्रतिष्ठाविधिपटलः॥

सुरेशानं नमस्कृत्वा परिपृच्छत् पितामहः।
चित्रप्रतिष्ठा किं देव ब्रूहि मे परमेश्वर॥ 1
तत्सर्वमखिलं वक्ष्ये शृणुष्व कमलासन।
चित्र न्त्रिविधं ज्ञेय न्तेषां भेदं शृणुष्वथ॥ 2
शिलाप्रतिमे विप्रेन्द्र चित्रकर्मन्तु कारयेत्।
मृण्मयं शूलसंयुक्तं भित्तिचित्रे पटेऽपिवा॥ 3
एते त्रिविधमुच्यन्ते स्थापनं तु शृणुष्वथ।
चित्रस्य सन्निधौ चैव प्रतिष्ठामण्डपं कुरु॥ 4
शैलजे मृण्मये चैव रत्नन्यासं तु कारयेत्।
रत्नन्यासं न कर्तव्यमुमा देव्या विशेषतः॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 67

प्रतिष्ठामण्डपं कृत्वा लक्षणेन समन्वितम्।
वेदिका ब्रह्मभागे तु मानुषे कुंण्डमुच्यते॥ 6
वृत्तं वा चतुरश्रं वा सर्वकुण्डानि कारयेत्।
देव्याश्चैव दिक्षु विप्रेन्द्र योनिरश्वत्थपत्रवत्॥ 7
ङाकासनगता देव्याश्चतुष्कोणेषु योनिकम्।
नयनं मोक्षणं कुर्यान्नेत्रद्वययुते दिने॥ 8
पूर्वोक्तविधिना चैव नयनमोक्षणमारभेत्।
जलाधिवासनन्नोक्तं शयने शाययेत्ततः॥ 9
वास्तुहोमं दिवा कुर्याल्लक्षणेन समन्वितम्।
भारशाली समायुक्तं वेदिमध्ये परिस्तरेत्॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प. 67

"शाल्यर्धं तण्डुलं न्यस्य तदर्धं तु तिला न्यसेत्।
परिस्तरेच्च दर्भाभिरष्टपत्रं सकर्णिकम्॥ 11
तत्तन्मन्त्रेण संस्मृत्य शयनं पश्च कल्पयेत्।
दर्पणं शाययेत्तत्र प्रच्छन्नपटसंयुतम्॥ 12
पूर्वादीशानपर्यन्तं विद्येश्वरसमन्वितम्।
देव्याश्चैव तु वामामादि विन्यसेत्तु विशेषतः॥ 13
-- -- -- -- -- -- -- श्चैव तु विन्यसेत्।
-- -- -- -- -- -- -- ओ .. व .. .. ..॥ 14
-- -- -- -- -- -- -- देव्या वर्धनीन्यसेत्।
सवस्त्रां सापिधानांश्च सहिरण्यं सकूर्चकम्॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

प.67

गन्धपुष्पादिनाभ्यर्च्य पायसान्नं निवेदयेत्।

ततो होमं प्रकुर्वीत पलाश समिधा सह ॥ 16

P.183 समिधाज्यचरूंल्लाजान् सर्षपं मुद्गमेव च।

माषञ्चैव विप्रेन्द्र सप्त द्रव्याणि हूयते ॥ 17

सद्येन समिधान् हुत्वा हृदयेनाज्यमेव च।

चरुं वामेन होतव्यं शिरोमन्त्रेण लाजकम् ॥ 18

सर्षपं नेत्रमन्त्रेण मुद्गमीशानमन्त्रतः।

माषं नेत्रेण हुत्वां तु प्रत्येकं तु शताष्टकम् ॥ 19

सर्वद्रव्यसमायुक्तं हव्यवाहं समुच्चरन्।

स्विष्टमग्नेति मन्त्रेण जुहुयात्तदनन्तरे ॥ 20

In Public domain. Digitization Muthulakshmi Research Academy

प. 67

ततः प्रभाते विमले स्नानं कृत्वा तु देशिकः।
मन्त्रन्यासोक्तमार्गेण स्वदेहे विन्यसेत्ततः॥ 21
ततोवासनहोमं तु आज्येन चरुणा युतम्[1]
अष्टोत्तरशतं हुत्वा द्रव्यं प्रति विशेषतः॥ 22
चतुर्दिक्षु चतुर्वेदैः कुर्यादध्ययनं ततः।
प्रायश्चित्तं तु होतव्यं चित्तादिभिर्जयादिभिः॥ 23
हुत्वान्ते तु यदस्येति जुहुयात्तदनन्तरम्।
आचार्यदक्षिणां दद्यात् पश्चाद्भूषणैर्युतम्॥ 24
होमीनां तु पदार्थीनां पूजयेत्तु विशेषतः।
प्रतिमस्याग्रतश्चैव जलभाण्डं स्थापेत्ततः॥ 25

In Public domain. Digitization Muthulakshmi Research Academy

प.67

तस्योर्ध्वे दर्पणं स्थाप्य मूलमन्त्रेण संयुतम्।
प्रोक्षयेच्चित्रकर्मे तु दर्पणे स्नापयेत्ततः॥ 26
प्रधानकलशं चैव स्नापयेत्तु विशेषतः।
पूर्वादीशानपर्यन्तं स्नापयेत् स्वस्वमन्त्रतः॥ 27
हविर्निवेदयेत् पश्चात् ताम्बूलं दापयेत्ततः।
ब्राह्मणान् भोजयेत्तत्र शैवान् भोजयेत्ततः॥ 28
सर्वासां देवतानांच स्थापनक्रममेव हि।
तत्तन्मन्त्रेण कर्तव्यं क्रियाभेदं न विद्यते॥ 29
प्रतिष्ठोपकरणं सर्वमाचार्याय प्रदापयेत्।
चित्रस्थापनमेवोक्तं शूलस्थापनं शृणु॥ 30

इति वीरतन्त्रे षट्सहस्रसंहितायां
चित्रप्रतिष्ठाविधि [सप्त?] षट्षष्टि पटलः॥

In Public domain. Digitization Muthulakshmi Research Academy

TN030

पटलः 68

।। अथ विमानस्थापनविधिपटलः।।

देवदेवं प्रणम्यादौ पृच्छति स पितामहः।
विमानस्थापनं कोवा ब्रूहि मे परमेश्वर ।। 1
तत्सर्वमखिलं वक्ष्ये शृणुष्व चतुरानन ।
P.184 रोहिणी च पुनर्वस्वो पुष्यौ मृगशिरस्तथा ।। 2
हस्तं च रेवती चैव स्वाती चैव त्रिरुत्तरा ।
द्वितीये पञ्चमी चैव द्वादशी वा त्रयोदशी ।। 3
स्थिरराशौ तु कर्तव्यमष्टमे ग्रहवर्जिता:।
श्रवमादिषु कालेषु विमानस्थापनं कुरु ।। 4
पञ्चाहे सप्तरात्रे वा अङ्कुरार्पणमुच्यते ।
प्रासाद शैव पुरतः प्रपां कृत्वा विशेषतः।। 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 68.

पूर्वोक्तेन प्रकारेण मण्डपं कारयेत्ततः।
मध्यमे वेदिकां कृत्वा हस्तमात्रोच्छ्रयं भवेत्॥ 6
सप्त बाह्ये तु परित मानुष्ये कुण्डमुच्यते।
नागरं द्राविडं चैव वेसरं तु शृणुष्वथ॥ 7
चतुरश्रं तु योन्याश्च अर्धचन्द्रं त्रिकोणकम्।
वृत्तं पञ्चकोणं तु पद्मं चैवाष्टकोणकम्॥ 8
वेसरं प्रोच्यते विप्र अथा पञ्चमकुण्डकम्।
चतुर्दिक्षु च ईशान्यां यथोक्तं कुण्डमुच्यते॥ 9
चतुस्तोरणसंयुक्तं दर्भमालाविभूषितम्।
वितानध्वजसंयुक्तं पुष्पमाल्यैरलंकृतम्॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प.68

प्रासादस्य चतुर्दिक्षु चतुरश्रं तु कुण्डकम् ।
वेसरस्य विधिः प्रोक्तं द्राविडस्य तु वृत्तकम् ॥ 11
वेसरस्यार्धचन्द्राभं कुण्डानि कारयेत्ततः ।
तस्या पूर्वे जलावर्तं वस्त्र (मा?)ल्यैरलंकृतम् ॥ 12
शुद्धोदकेन संपूर्य शाल्योपरि च संस्थितान् ।
चतुर्दिक्षु न्यसेत्तत्र हृदयेन तु मन्त्रतः ॥ 13
वास्तुहोमं दिवा कुर्याल्लक्षणेन समन्वितम् ।
आचार्यश्च शुचिर्भूत्वा नववस्त्रेण वेष्टितान् ॥ 14
सोष्णीषस्सोत्तरीयश्च गन्धद्रव्येण लेपयेत् ।
प्रासादं दर्भमालाभिर्वेष्टयेत्तु विशेषतः ॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

प. 68

पुण्याहं वाचयेत्तत्र पवमानेन प्रोक्षयेत्।

वास्तुदेवान् बलिं दद्यात् पूर्वोक्तविधिना सह॥ 16

प्रासादं नववस्त्रेण वेष्टयेद्द्वद्वयेन तु।

लम्बयेन्नववस्त्रेण प्रासादेन तु मन्त्रतः॥ 17

दर्भमाल्येण पुष्पेण वेष्टयेत स्थूपिमेव च।

प्रासादहोमं कर्तव्यं गर्भगेहे विशेषतः॥ 18

मम आप्येति मन्त्रेण आज्येनैव शताहुतिः।

समिधामीशमन्त्रेण आज्यं वामेन हूयते॥ 19

P.185 चरुं हृदयमन्त्रेण हुत्वा चैव शताहुति।

शान्तिहोमक्रमेणैव चतुर्दिक्षु च होमयेत्॥ 20

In Public domain. Digitization Muthulakshmi Research Academy

प. 68

चतुर्दिक्षु चतुर्वेदैः कुर्याद्ध्ययनं ततः।
प्रासादमेव होमेन ह्यधिवासनमथ शृणु ॥ 21

पूर्वोक्ते मण्डपे वेद्यां गोमयेनानुलेपयेत्।
शालिना विकिरेत्तत्र भारद्वयेन संयुतम् ॥ 22

शाल्यर्धं तण्डुलं न्यस्य तण्डुलार्धं तिला न्यसेत्।
पद्ममष्ट दलं लिख्य दर्भैश्चैव परिस्तरेत् ॥ 23

नवकुम्भान् समादाय सूत्रेण परिवेष्टयेत्।
शुद्धोदकेन संपूर्य वस्त्रकूर्चसमन्वितान् ॥ 24

प्रधानकलशं विप्र मध्यमे स्थापयेत् क्रमात्।
सप्तमे वान्तवर्गस्य .... द्वितीयकम् ॥ 25

In Public domain. Digitization Muthulakshmi Research Academy

प. 68

चतुर्दशस्वरसंयुक्तं बिन्दुनादसमन्वितम् ।
विमानस्य तु विप्रेन्द्र मूलमन्त्रमिहोच्यते ॥ 26
प्रधानकलशेनैव ------- विन्यसेत् ।
विद्येश्वरसमायुक्तं मध्यमे शिवदैवतम् ॥ 27
पूर्वे तु विष्णुकुम्भा स्यु दक्षिणामूर्ति दक्षिणे ।
लिङ्गोत्पत्तिं तु वारुण्यामुत्तरे तु पितामहः ॥ 28
पूर्वादिषु चतुर्दिक्षु शिवविद्येश्वरस्य तु ।
मध्यमे स्थापयेद्विद्वान् विघ्नेशश्चाग्ने विन्यसेत् ॥ 29
उत्तरे चैव दुर्गायां विन्यसेच्च विशेषतः ।
गन्धपुष्पादिनाभ्यर्च्य स्वस्वमूलेन देशिकः ॥ 30

In Public domain. Digitization Muthulakshmi Research Academy

प. 68

हविर्निवेदयेत् पश्चात् ताम्बूलं दापयेत्ततः।
ततो होमं प्रकुर्वीत पलाशसमिधा सह॥ 31
समिधाज्यचरुं लाजान् सर्षपांश्च यवांस्तिलान्।
वेणुं माषंच मुद्गंच शिम्बश्चैकादशं युतम्॥ 32
ईशान्यादीनि सद्यान्तं हृदये नेत्रसंयुतम्।
अष्टोत्तरशतं वापि पञ्चाशद्वापि तेहयः॥ 33
विमानबीजं सर्वेषु हुत्वाचैव शताहुतिः।
प्रभाते विमले पूज्य आचार्य स्नानमाचरेत्॥ 34
मन्त्रन्यासोक्त मार्गेण न्यासं कृत्वा विशेषतः।
सृष्टि।स्थितिश्च संहारं न्यासादीनि विन्यसेत्॥ 35

In Public domain. Digitization Muthulakshmi Research Academy

प. 68

ततोवासनहोमञ्च कर्तव्यं देशिकोत्तमः।

सामिधाज्यचरूणान्तु प्रासादेन शताहुतिः॥ 36

P.186. विमानबीजसंयुक्तं पञ्चविंशतिरुच्यते।

सर्वद्रव्यसमायुक्तं हव्यवाहं समुच्चरन्॥ 37

स्विष्टमग्नेतिमन्त्रेण जुहुयात्तदनन्तरे।

चित्तादींश्च जयादींश्च राष्ट्रभृच्चैव हूयते॥ 38

हुत्वान्ते तु यदस्येति पूर्णाहुतिमथाचरेत्।

आचार्यदक्षिणां दद्यात् पञ्चाङ्गं भूषणैर्युतम्॥ 39

शिरसोपरि विप्रेन्द्र कुम्भमुद्वाहयेत्ततः।

विमानप्रदक्षिणं कुर्यात् प्रासादस्योपरि स्थितिः॥ 40

In Public domain. Digitization Muthulakshmi Research Academy

प. ६४

विमानमूलसंयुक्तं व्योमव्यापिं समुच्चरन् ।
पञ्चब्रह्मषडङ्गेन स्नापयेत्कुम्भमेव च ॥ 41
पूर्वादीशानपर्यन्तं स्नापयेत् स्वस्वमन्त्रतः ।
दिशामूर्त्तिश्च विप्रेन्द्र स्वस्वमन्त्रेण स्नापयेत् । 42
गन्धपुष्पादिनाभ्यर्च्य हविर्दद्याद्विशेषतः ॥
ब्राह्मणान् भोजयेत्तत्र शिवभक्तांश्च भोजयेत् । 43
सप्तकन्याश्च विप्रेन्द्र वस्त्रादीनि च दापयेत् ॥
विमानस्थापनं प्रोक्तं मानुषस्थापनं श्रृणु । 44

इति वीरतन्त्रे षट्सहस्रसंहितायां
विमानस्थापनविधि सप्तषष्टिपटलः ॥ [अष्टषष्टिः]

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 69

॥ अथ मानुषस्थापनाविधिपटलः ॥

लोकनाथं नमस्कृत्वा परिपृच्छत पितामहः ।
मानुषस्थापनं कोवा शिवज्ञानाभिपूरितम् ॥ 1
ऋषीणां च नृपाणां च स्थापनं ब्रूहि मे प्रभो ।
तत्सर्वमखिलं वक्ष्ये शृणुष्व चतुरानन ॥ 2
चातुर्वर्णानुलोमांश्च प्रतिलोमांश्च सर्वशः ।
शिवप्रसादसिद्धांश्च प्रतिमादीनि कारयेत् ॥ 3
सौवर्णै राजतैर्वापि ताम्रं पित्तलजं तु वा ।
शैलजं दारुजं वापि मृण्मयं चित्रमेव च ॥ 4
द्वारं तु नवधा भज्य भागैकं प्रतिमेश्रयम् ।
चत्वारं पञ्च षट्तालं मात्राङ्गुलेन कारयेत् ॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 69

सप्ताष्टनवतालं वा कर्तव्यं लक्षणैर्युतम् ।
शिवप्रसादकाले तु यद्रूपं संभवन्ति वै ॥ 6
तद्रूपं कारयेद्विप्र स्थितञ्चासीनमेव वा ।
ऋषीणां ऋषिरूपं तु नृपाणां नृपवद्भवेत् ॥ 7
एवं कृत्वा विधानेन स्थापयेद्विधिपूर्वकम् ।
इडा च पिङ्गला चैव सुषुम्ना च तथैव च ॥ 8
P.187. गान्धारी हस्तिजिह्वा च पूषा चैव यशस्विनी ।
अलंपुषा रूप्री चैव शङ्खिनी दशम स्मृतः ॥ 9
दश प्राणवहाश्चैता नाडयः परिकीर्तिताः ।
विमला घोषणी चैव पृथिवी आविनी तथा ॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प. 69

तेजोवती वायुवेगी गगनी मर्दनी तथा।

रोधिनी ॰याधिनी चैव रसावती चमुद्गती ॥ 12

त्रांसिनी शब्दस्पर्शा च ····· नकुला तथा।

सर्वगा चैव नाड्यस्ता विंशतिस्सह ताश्चभिः॥ 13

प्रधाननाड्यश्चैव तद्रूपे विन्यसेत्ततः।

तस्य मन्त्रं प्रवक्ष्यामि शृणुष्व कमलासन॥ 14

स्वनामाद्येन संयुक्तं द्वितीयं वापि गृह्यताम्।

सप्तमस्य द्वितीयं तु पंथमस्य चतुर्दश॥ 15

बिन्दुनादसमायुक्तं मानुषं बीजमुच्यते।

ह्रस्वा ब्रह्मसमाख्याता न दीर्घा ह्यङ्गानि विन्यसेत्॥ 16

In Public domain. Digitization Muthulakshmi Research Academy

प. 69

राक्षसानां पिशाचानां असुराणां च सिद्धकान्।

देवतानां वाहनानाञ्च स्थापयेदेवमेव तु॥ 17

रत्नन्यासं प्रकर्तव्यं पद्मस्योपरि संस्थितः।

नवरत्नं पञ्चरत्नं वा विन्यसेद्देशिकोत्तमः॥ 18

पूर्ववन्मण्डपं कृत्वा लक्षणेन समान्वितम्।

मध्यमे कल्पयेद् वेदीं परितः कुण्डमुच्यते॥ 19

चतुरश्रं धनुर्वृत्तं त्रिकोणं चाष्टकोणकम्।

पूर्वादीनि चतुर्दिक्षु ईशान्यां चाष्टकोणकम्॥ 20

वेदिमध्ये न्यसेत् शालीं प्रतिमां विन्यसेत्ततः।

नयनं मोक्षणं कुर्यात् पूर्वोक्तेन विधानतः॥ 21

In Public domain. Digitization Muthulakshmi Research Academy

प. 69

ग्रामप्रदक्षिणं कुर्यात् जले चैवाधिवासयेत्।

एकरात्रं त्रिरात्रं वा अधिवास्य ततो बुधः॥ 22

जलादुत्तीर्य पूर्वेद्यु स्नापयेत् पञ्चगव्यकैः।

वास्तुहोमं ततः कुर्याल्लक्षणेन समन्वितम्॥ 23

शालिना विकिराद्भेलि तण्डुलार्धं तिलान्न्यसेत्।

शयनं पञ्चभिः कल्प्य कार्पासैर्वस्त्रवेष्टितम्॥ 24

शयने शाययेद्बिम्बं प्रच्छन्नपटसंयुतम्।

काये तु विन्यसेद्विप्र पञ्चविंशतिकं तथा॥ 25

पृथिव्यापस्तथा तेजो वायुराकाशमेव च।

शब्दस्पर्शरूपं च रसौ (सो?) गन्धश्च पञ्चमः॥ 26

In Public domain. Digitization Muthulakshmi Research Academy

प. 69

वाक्पादपाणिपायूच उपस्थश्चैव पञ्चमम् ।

P.188. श्रोत्र त्वक् चक्षु जिह्वा च घ्राणं पञ्चैव तु पञ्चमम् ॥ 27

मनोहंकारबुद्धिश्च प्रकृति पुरुषस्तथा ।

पञ्चविंशतितत्त्वानि शरीरे विन्यसेत्ततः ॥ 28

मन्त्रन्यासोक्तमार्गेण सृष्टिन्यासं तु विन्यसेत् ।

गन्धपुष्पादिनाभ्यर्च्य पश्चात् कुम्भानि विन्यसेत ॥ 29

सवस्त्रान् सापिधानांश्च सहिरण्यान् सकूर्चकान् ।

प्रतिमाद्दक्षिणे भागे कुम्भमूलेन स्थापयेत ॥ 30

प्रतिमस्योत्तरे भागे कुम्भमेकं प्रतिष्ठितम् ।

पूर्वादीशानपर्यन्तं स्थापयेत् कुम्भमष्टकम् ॥ 31

In Public domain. Digitization Muthulakshmi Research Academy

प. 69

प्राणोऽपान व्यानश्च उदानस्समान एव च।
नागः कूर्मश्च कृकरो कुम्भे पूर्वादि विन्यसेत्॥ 32
प्रतिमाद्दक्षिणे कुम्भे देवदत्तं तु विन्यसेत्।
धनञ्जयोत्तरे न्यस्य गन्धपुष्पादिनार्चयेत्॥ 33
नैवेद्यं पायसं दद्यात ताम्बूलं दापयेत्ततः।
ततो होमं प्रकुर्वीत पलाशसमिधा सह॥ 34
शिवाग्निं कल्पयेत्तत्र युक्तोवहदि हूयते।
समिधाज्यचरूलाजान सर्षपांश्च यवांस्तिलान्॥ 35
शालिनीवारगोधूम चम्बकेन समन्वितम्।
पञ्चब्रह्म षडङ्गेन प्रत्यैकं तु शताहुति॥ 36

In Public domain. Digitization Muthulakshmi Research Academy

प. 69

सर्वद्रव्यसमायुक्तं मूलमन्त्रेण होमयेत्।
चतुर्दिक्षु चतुर्वेदैः कुर्यादध्ययनं ततः॥ 37
चित्तादीनि जयादीनि हुत्वा हुत्वा स्पृशेत्ततः।
ततः प्रभाते विमले स्नानं कृत्वा तु देशिकः॥ 38
मन्त्रन्यासोक्तमार्गेण सृष्टिन्यासं तु कारयेत्।
ततौवासनहोमं तु समिधाज्यचरून् सह॥ 39
मूलमन्त्रेण विप्रेन्द्र ह्येकैकं तु शताहुतिः।
हुत्वान्ते त्रियदस्येति स्विष्टकृद्धूयते क्रमात्॥ 40
आचार्यन्दक्षिणां दद्यात पदार्थान् पूजयेत्ततः।
उपदेष्टारं संपूज्य यथाशास्त्रोक्तमार्गतः॥ 41

In Public domain. Digitization Muthulakshmi Research Academy

प. 69

उत्थाप्य प्रतिमं तत्र स्नानवेद्युपरि न्यसेत्।
मन्त्रन्यासोक्तमार्गेण सृष्टिन्यासं तु कारयेत्॥ 42
देवदत्तस्य कुम्भं तु स्नापयेन्मूलमन्त्रतः।
पञ्चब्रह्मषडङ्गेन प्राणादन्यय कुम्भकान्॥ 43
स्नापयेत्तु ततो विद्वान् आचम्येन विशुद्ध्यति।
नैवेद्यं पायसं दद्यात् ताम्बूलं दापयेत्ततः॥ 44
P. 189 ब्राह्मणान् भोजयेत्तत्र पर्यष्टीन् शैवमेव तु।
हाटके वस्त्रसंयुक्तं सर्वेषां दापयेत्ततः॥ 45
मानुषं स्थापनं प्रोक्तं पिण्डिकास्थापनं शृणु।

इति वीरतन्त्रे षट् —यां मानुषस्थापन
विधि सप्तषष्टि पटलः॥ (एकोनसप्ततिपटलः)

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 70

॥ अथ पिण्डिकास्थापनविधिपटलः॥

शिवं प्रणम्य विधिवत् पृच्छतिस्म पितामहः।
पिण्डिकास्थापनं किञ्चित् तत्सर्वं वद मे प्रभो॥ 1
तत्सर्वमखिलं वक्ष्ये शृणुष्व कमलासन।
प्रासादस्याग्रतः कुर्यान्मण्डपं चतुरश्रकम्॥ 2
पञ्चसप्ताष्टहस्तं वा नवहस्तमथापि वा।
स्तम्भैष्षोडशभिर्युक्तं चतुर्द्वारसमन्वितम्॥ 3
मध्यमे वेदिकां कुर्यात्तालमात्रसमुच्छ्रयम्।
वितानोद्ध्वजमाच्छाद्य दिकुध्वजैश्च प्रलम्बितम्॥ 4
दर्भमालाभिरावेष्ट्य तोरणैरुपशोभितम्।
शालिना विकिरेत्तत्र तण्डुलैश्च तिलैस्तथा॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 70

पञ्चभिः कम्बलैर्युक्तं पीठं तस्योपरि न्यसेत् ।

पीठं प्रक्षालयेत्क्षिप्रं प्रासादेन तु मन्त्रतः ॥ 6

अष्टमृत्सलिलेनैव पीठं प्रक्षालयेत्सुदा ।

वल्मीके च तटाके च कुशमूले तथैव च ॥ 7

नदीपर्वतदेशे तु गोष्ठे च गजदन्ततः ।

शुद्धक्षेत्रे तु वै ब्रह्म मृत्भिस्संक्षालयेत् बुधः ॥ 8

वस्त्रेण वेष्टयेत्पीठं शालिराशौ तु विन्यसेत् ।

पुण्याहं वाचयेत्तत्र स्वस्तिमङ्गलवाचकैः ॥ 9

वर्धनीञ्च नवादाय त्रिसूत्रेणैव वेष्टयेत् ।

शुद्धोदकेन संपूर्य विन्यसेत् पीठबाह्यतः ॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प. 70

? रत्नानी नवैलाल्ल तत्कोलमेव च ।

वर्धन्यान्निक्षिपेत्तत्र पूर्वादीशान्तमेव च ॥ 1

पीठस्यैशानदिक्भागे प्रधानं वर्धनीं न्यसेत् ।

सकूर्चं स्वर्णवस्त्रासां वस्त्रयुग्मं पृथक् पृथक् ॥ 2

वामीं पूर्वे तु विन्यस्य ज्येष्ठामाग्नेयदेशतः ।

दक्षिणे चैव रौद्रीं च काळीं निर्‌ऋतिगोचरेत् ॥ 3

कलविकरणीं वारुण्यां बलविकरणीन्तु वायवे ।

बलप्रमथनीं सौम्ये तु विन्यसेत्तु विशेषतः ॥ 4

सर्वभूतदमनीं विन्यसेदीशके क्रमात् ।

P. 190. मध्ये मनोन्मनी देवीं न्यस्त्वा गन्धादिभिर्यजेत् ॥ 5

पायसान्नन्तु नैवेद्यन्ताम्बूलं दापयेत्ततः ।

ततो होमं प्रकुर्वीत कुण्डे वा स्थण्डिलेऽपि वा ॥ 6

In Public domain. Digitization Muthulakshmi Research Academy

प.७०

यावदभ्रं भवेत्पीठं तावदभ्रन्तु कुण्डकम्।

वृत्तपीठस्य हे ब्रह्मन् वृत्तकुण्डमिहोच्यते॥ 17

समिधाज्यचरूंल्लाजान् वेणुमुद्गञ्च सर्षपा।

समिधां सद्यमन्त्रेण आज्यं वामेन चैव हि॥ 18

अघोरेण चरूं हुत्वा लाजं हृदयमन्त्रतः।

वेणुमीशानमन्त्रेण मुद्गञ्च शिरसा तथा॥ 19

शिखामन्त्रेण सर्षपं अष्टोत्तरशतं पृथक्।

गौरीबीजेन मन्त्रेण प्रत्येकं तु शताहुतिः॥ 20

सर्वद्रव्यसमायुक्तं हव्यवाहं समुच्चरन्।

स्विष्टमग्नेति मन्त्रेण जुहुयात्तदनन्तरे॥ 21

In Public domain. Digitization Muthulakshmi Research Academy

प. ७०

हुत्वा हुत्वा तदङ्गानि स्पृशेत् प्रसृतिमुद्रया।
उपानं पादमित्युक्तं जगतीजँघोरुजन्तथा॥ 22
कुमुदन्तु कटि प्रोक्तं नाभिश्चैव तु पट्टिका॥।
कर्णश्च हृदयं प्रोक्तं बाहुं चैवोर्ध्व वा मनम्॥ 23
पट्टिका कण्ठमुखं पट्टिका घृतवारी च मूर्धजा।
एवं वै पद्मपीठे तु तेषां रूपं प्रकल्पयेत्॥ 24
हुत्वान्ते तु यदस्येति जुहुयात्तदनन्तरे॥।
? ततः प्रभाते सुमुहूर्ते .... सुलग्नके॥ 25
आचार्यं पूजयित्वा तु शिल्पिनं पूजयेत्ततः॥।
पश्चात् गर्भगृहं गत्वा आचार्यशिल्पिभिस्सह॥ 26

In Public domain. Digitization Muthulakshmi Research Academy

प. 70

मृण्मयं वृषभं कुर्यात् सुवर्णखुरश्रृंगकौ।
वृषगायत्रिमन्त्रेण प्रासादेन समन्वितम्॥ 27
वृषभस्य तु श्रृंगेण कर्षयेत्पीठमेव च।
पीठं विसर्जयेत्तत्र जलमध्ये तु निक्षिपेत्॥ 28
शैवपीठकमुत्सृज्य प्रासादेन तु मन्त्रतः।
षण्णवत्यक्षरैर्युक्तं व्योमव्यापिं समुच्चरन्॥ 29
लिङ्गपीठं समायोज्य सुस्निग्धं कारयेत्ततः।

॥ अष्टबन्धनम् ॥

अष्टबन्धं प्रकर्तव्यं लक्षणेन समन्वितम्। 30
लाक्षाश्चैव मधूच्छिष्टं शर्करं सर्जरं तथा॥

In Public domain. Digitization Muthulakshmi Research Academy

प. ७०

वायुकेनष्टकाचूर्णसदृशं घनतैलकम् । 31

समं कृत्वा तु विप्रेन्द्र तैलमर्धं विधीयते ॥

P.191 ताम्रपात्रे विशेषेण वाचयेच्छिलिपना सह । 32

लिङ्गपीठकयोर्मध्ये पक्वद्रव्यं विनिक्षिपेत् ॥

एवं यः कुरुते मर्त्यश्शिवलोके महीयते । 33

क्षालयित्वा तु विप्रेन्द्र तैलमर्धं विधीयते ॥

पुण्याहं वाचयेत्तत्र प्रोक्षयेत्पवमानतः । 34

तत्तदंशानि विन्यस्य सूत्रागमुपकल्पनम् ॥

वेदिकास्थापिनस्सर्वे वर्धन्यां स्थापयेत्ततः । 35

तन्मध्ये वेदिकां कुर्यात् रत्निमात्रसमुच्छ्रितम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

प. ७०

दर्भमालासमायुक्तं चतुस्तोरणसंयुतम् । 36
गात्रसंवेष्टनं कुर्यात् वितानोर्ध्वं वेष्टयेत् ॥
अष्टदिक्षु ध्वजान्यस्य अष्टमङ्गलसंयुतम् । 37
वेदिबाह्ये तु परितो नवकुम्भानि कारयेत् ॥
स्थण्डिलं वाथ कर्तव्यं लक्षणेन समन्वितम् 38
यत्तत्पीठाकृतिं ब्रह्मन्नक्षत्कुण्डमिहोच्यते ॥
शालिना विकिरेद्विद्वानष्टद्रोणैर्विशेषतः । 39
तदर्धं तण्डुलं न्यस्य तण्डुलार्धन्तिलान्यसेत् ।
पद्ममष्टदलं लिख्य दर्भैश्चैव परिस्तरेत् । 40
बालस्थानस्य चाग्रे तु यात्राहोमं तु कारयेत् ॥

In Public domain. Digitization Muthulakshmi Research Academy

प.70

तस्याग्रे स्थापयेद्विद्वान् शिवकुम्भं च वर्धनीम्। 41
ससूत्रं सापिधानां च सवस्त्रं हेमसंयुतम्॥
नवरत्नं क्षिपेन्मध्ये सर्वद्रव्यसमायुतम्। 42
अभितः कलशानष्टौ विद्येश्वरसमन्वितान्॥
तत्तन्मन्त्रमनुस्मृत्य गन्धपुष्पादिनार्चयेत्। 43
आचार्यश्च शुचिर्भूत्वा शिरसा धारयेत् घटम्॥
नववस्त्रपरीधानस्सोष्णीष सोत्तरीयकम्। 44
विमानप्रदक्षिणं कुर्याद्वेतिमध्ये न्यसेत्ततः॥
पूर्वादीशानपर्यन्तं विद्येश्वरांश्च विन्यसेत्। 45
गन्धपुष्पादिना पूज्य पायसान्नन्निवेदयेत्॥
एलालवङ्गतक्कोलं उशीरश्चन्दनन्तथा। 46
समालोड्य विशेषेण लिङ्गमालोडयेत्ततः॥

In Public domain. Digitization Muthulakshmi Research Academy

प. ७०.

नववस्त्रेण संवेष्ट्य लिङ्गपीठञ्च देशिकः। 47
ततो होमं प्रकुर्वीत लक्षणेन समन्वितम्॥
पलाश खदिराश्वत्थ प्लक्षं न्यग्रोध एव च। 48
उदुम्बरञ्चापामार्गं खदिरञ्च विशेषतः॥
पूर्वादीशानपर्यन्तं क्रमेण परिकीर्तितम्। 49
P. 192 ईशान इन्द्रयोर्मध्ये शमी चैव तु विन्यसेत्॥
अष्टोत्तरशतं चैव पञ्चाशत्पञ्चविंशति। 50
सर्वेषां चैव होमानां पलाशोद्भम् इहोच्यते॥
समिदाज्यचरूं लाजान् मुद्गमाषञ्च सर्षपम्। 51
समिधं सद्यमन्त्रेण वक्त्रेणाज्यं तथैव च॥

In Public domain. Digitization Muthulakshmi Research Academy

प. 70

अघोरेण चरुं हुत्वा लाजान्वामेन चैव हि । 52

नेत्रेणैव तु मुद्गं स्यान्माषं हृदयमुच्यते ॥

ईशानेन तु मन्त्रेण सर्षपञ्चैव हूयते । 53

प्रासादेन तु मन्त्रेण प्रत्येकं पञ्चविंशतिः ॥

गौरीबीजेन मन्त्रेण प्रत्येकं पञ्चविंशति । 54

सर्वद्रव्य समायुक्तं हव्यवाहं समुच्चरन् ॥

स्विष्टमग्नेति मन्त्रेण जुहुयात्तदनन्तरे । 55

जयादिरभ्याधानञ्च राष्ट्रभृच्चैव हूयते ॥

हुत्वान्ते ति यदस्यैति स्विष्टकृद्धूयते क्रमात् । 56

चतुर्दिक्षु चतुर्वेदैः कुर्याद्ध्ययनं ततः ॥

In Public domain. Digitization Muthulakshmi Research Academy

प. 70

श्रीरुद्रञ्चैव जप्येत पवमानञ्जपेत्ततः। 57

पुरुषसूक्तं जपित्वा तु स्तोत्रेणैव समन्वितम्॥

ततः प्रभाते विमले स्नानं कृत्वा तु देशिकः। 58

नववस्त्रपरीधानस्सोष्णीषस्सोत्तरीयकम्॥

कुण्डलैः कर्णिकैर्हारैरङ्गुलीयक्रमेव च। 59

प्रशान्तमनसो भूत्वा स्नापयेल्लिङ्गमूर्धनि॥

गौरीबीजेन वर्धन्यां स्नापयेत् पिण्डिकोपरि। 60

पूर्वादीशानपर्यन्तं विद्येशां स्नापयेत्ततः॥

अष्टोत्तरशतेनैव पञ्चाशत्पञ्चविंशति। 61

स्नपनं कारयेत्तत्र यथाविभवविस्तरैः॥

In Public domain. Digitization Muthulakshmi Research Academy

प. ७०

गन्धैः पुष्पैश्च धूपैश्च दीपैश्चैव सुपूजयेत्। 62

हविर्निवेदयेत् पश्चात् ताम्बूलं दापयेत्ततः॥

ब्राह्मणान् भोजयेत्तत्र शैवान् संभोजयेत्ततः। 63

पीठस्थापनमेवोक्तं जलसंप्रोक्षणं कुरु॥

इति वीरतन्त्रे षट्सहस्रसंहितायां
[सप्तति]?
पिण्डिकास्थापनविधि एकोनसप्ततिपटलः॥

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 71

P.193.

॥ अथ जलसंप्रोक्षणविधिपटलः ॥

प्रणिपत्य जगन्नाथं ब्रह्मा पृच्छति शंकरम् ।
जलसंप्रोक्षणं कोवा ब्रूहि मे परमेश्वर ॥ 1
तत्सर्वमखिलं वक्ष्ये शृणुष्व कनकाण्डज ।
प्रासादकरणे चैव शिल्पिना स्पर्शयेत्तदा ॥ 2
पीठबन्धविधौ चैव चण्डालादीनि संस्पृशेत् ।
पदन्नदूषिते स्पृष्टे दौ पूजाहीने तथैव च ॥ 3
ऽावमादिषु कालेषु जलसंप्रोक्षणं कुरु ।
त्रिरात्रे पञ्चसप्ताहे अङ्कुरार्पणमारभेत् ॥ 4
अष्टौ वा षोडशं वापि चतुर्विंशतरेव वा ।
पालिका घटिका चैव शरावञ्च त्रिधा भवेत् ॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 71

बीजानि वापयेत्तत्र पूर्वोक्तविधिना सह।

प्रासादस्याग्रतः कुर्यान्मण्डपं चतुरश्रकम्॥ 6

नवहस्तञ्चाष्टहस्तं द्वादशं हस्तमेव वा।

षोडशस्तम्भयुक्तञ्चतुर्द्वारविभूषितम्॥ 7

ब्रह्मभागे तु वेदीं स्यात् परितः कुण्डमुच्यते।

समखण्डं वर्त्त्यमानञ्च शिवाधिकयन्तथैव च॥ 8

त्रैराशिकं तदूर्ध्वे तु चतुर्विधेन चोच्यते।

कुण्डानां लक्षणं वक्ष्ये समखण्डस्य पद्मज॥ 9

दिशासु चतुरश्राणि वृत्तानि विदिशासु वै।

इन्द्र ईशानयोर्मध्ये अष्टकोणन्तु कारयेत्॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प.71

समखण्डमिदं प्रोक्तं शिवाधिकमथ श्रृणु ।
चतुरश्रञ्च योनीञ्च अर्धचन्द्रन्त्रिकोणकम् ॥ 11
वृत्तं वै पञ्चकोणन्तु पद्मषट्कोणमेव च ।
पूर्वादीनि क्रमाद्वृद्धि ईशाने सप्तकोणकम् ॥ 12
शिवाधिकस्य कुण्डानि प्रोच्यते सकलन्ततः ।
त्रैराशिकस्य कुण्डानि श्रूयतां चतुरानन ॥ 13
दिग्विदिक्षु च विप्रेन्द्र वृत्तकुण्डं तु कारयेत् ।
स्वयमुद्भूतलिङ्गस्य स्थापितस्य महर्षिभिः ॥ 14
दैवैर्वा स्थापितस्यापि बाललिङ्गं तु कारयेत् ।
जीर्णे लिङ्गे तु कर्तव्यमन्यथा तु न कारयेत् ॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

प.71

एतेषां प्रोक्षणे काले तत्तत्पीठाकृतिं यथा।

तथा कुण्डाकृतिं प्रोक्तं प्रतिमानं शृणुध्वथ॥ 16

पूर्वोक्तेन प्रकारेण कुण्डं कुर्यात्तु देशिकः।

एवमेव प्रकारेण मण्डपं कारयेत्ततः॥ 17

गोमयेनोपलिप्याथ तोरणञ्च ध्वजैर्युतम्।

P.194. दर्भमालासमायुक्तं मुक्तादामैरलंकृतम्॥ 18

वेद्योपरि न्यसेच्छालिं भारद्वयसमन्वितम्।

शाल्यर्धं तण्डुलान् न्यस्य तण्डुलार्धं तिलान् न्यसेत्॥ 19

पद्ममष्टदलं लिख्य दर्भैश्चैव परिस्तरेत्।

? एलालवङ्ग तक्कोल निम्बुजाति फलम्मुरम्॥ 20

In Public domain. Digitization Muthulakshmi Research Academy

प.71

चन्दनागरुकर्पूरमुशीरं कुङ्कुमैर्युतम् ।
आलोड्य लेपयेल्लिङ्गन्नववस्त्रेण वेष्टयेत् ॥ 21
पुण्याहं वाचयेत्तत्र पञ्चगव्येन स्नापयेत् ।
सौवर्णसूत्र कार्पासन्तण्डुलोपरि विन्यसेत् ॥ 22
कौतुकं बन्धयेत्पश्चात् हृदयेन तु मन्त्रतः ।
बालस्थानं तथा कृत्वा यात्राहोमं समाचरेत् ॥ 23
तस्याग्रे स्थण्डिलं कृत्वा शालिभि स्थण्डिलान्तिलात् ।
परिस्तरेच्च दर्भैभि स्थापयेच्छिवकुम्भकान् ॥ 24
सवस्त्रं सापिधानाश्च पञ्चरत्न समन्वितान् ।
स्थण्डिलोपरि संस्थाप्य व्योमव्यापिं समुच्चरन् ॥ 25

In Public domain. Digitization Muthulakshmi Research Academy

प. 71

पञ्चब्रह्मसमायुक्तं षडङ्गेन समन्वितम् ।
वर्धनीं तस्य वामे तु गौरीबीजेन स्थापयेत् ॥ 26
सवस्त्रं - - - - - - - - - - - हेमसंयुतम् ।
सकूर्चं सापि - - - - - - - - - - - - सापिधानकम् ॥ 27
तस्याग्रे स्थण्डिलं कृत्वा यात्राहोममनुकारयेत् ।
शिवाग्निं कल्पयेत्तत्र अग्निमुखवक्त्र हूयते ॥ 28
समिधाज्यचरूणान्तु प्रत्येकन्तु शताहुतिम् ।
समिधा सद्यमन्त्रेण आज्यं वामेन हूयते ॥ 29
ईशानेन तिलां हुत्वा स्पृष्ट्वा लिङ्गं ततो बुधः ॥
हुत्वा चित्तादि विप्रेन्द्र पूर्णाहुतिं यदस्य च ॥ 30

In Public domain. Digitization Muthulakshmi Research Academy

प.71

दिशामुद्राश्च दातव्यं लक्षणेन समन्वितम् ।
तस्याग्रे शिवकुम्भं तु शिरसा धारयेत्ततः ॥ 31
दि?
प्रविश्य मण्डपं विद्वान् स्थापयेद्वेति मध्यमे ।
अभितः कलशानष्टौ विद्येश्वर समान्वितान् ॥ 32
बालस्थाने कृते ह्येवं कर्तव्यं देशिकोत्तमः ।
इदमन्यत् प्रवक्ष्यामि शृणुष्व च्चतुरानन ॥ 33
नव कुम्भान् समादाय सूत्रेण परिवेष्टितान् ।
शुद्धोदकेन संपूर्णात् कलशा न्यस्य मण्डले ॥ 34
पञ्चरत्नसमायुक्तं वस्त्रयुग्मेन वेष्टितम् ।
दि?
सकूर्चान् सापिधानांश्च स्थापयेद्वेति मध्यमे ॥ 35

In Public domain. Digitization Muthulakshmi Research Academy

प.71

P195 पञ्चब्रह्मशिवाङ्गैश्च शिवमन्त्रेण स्थापयेत्।
वर्धनीं तस्य वामे तु गौरीबीजेन स्थापयेत्॥ 36
सवस्त्रान् सहिरण्यांश्च सकूर्चान् सापिधानकान्।
पूर्वादीशानपर्यन्त मष्टकुम्भा न्यसेत् क्रमात्॥ 37
गन्धपुष्पादिनाऽभ्यर्च्य पायसान्नं निवेदयेत्।
ततो होमं प्रकर्तव्यं समिदाज्यादि दिव्यकैः॥ 38
समिधाज्यचरूँ लाजान् सर्षपाश्च यवांस्तिलान्।
मुद्गमाषेन् संयुक्तन्नवद्रव्यमिहोच्यते॥ 39
पलाशं पूर्वतो भागे उदुम्बरश्चाग्निगोचरे।
अश्वत्थं दक्षिणे चैव शमी निरृतिगोचरे॥ 40

In Public domain. Digitization Muthulakshmi Research Academy

प. 71

खदिरं पश्चिमे न्यस्य वायव्ये बिल्वमेव च।

प्लक्षश्चोत्तरदेशे तु अर्कमीशानगोचरे॥ 41

पलाशसमिधा चैव प्रधानाग्नौ तु होमयेत्।

चतुर्दिक्षु चतुर्वेदैः कुर्याद्ध्ययनं ततः॥ 42

स्तोत्रमन्त्रं जपित्वा तु पवमानं जपेत्ततः।

समिधां सद्यमन्त्रेण आज्यं वामेन हूयते॥ 43

चरूं तत्पुरुषेणैव लाजा घोरेण चैव हि।

सर्षपं हृदयेनैव यवांस्तु शिरसा तथा॥ 44

तिलान् हुत्वा तु शिखया मुद्गं तु कवचेन तु।

माषं तु नेत्रमन्त्रेण हूयते क्रमशस्तथा॥ 45

In Public domain. Digitization Muthulakshmi Research Academy

प. 71

द्रव्यान्ते व्याहृतिं हुत्वा स्पृष्ट्वा लिङ्गं तु सर्वशः।
सर्वद्रव्यसमायुक्तं हव्यवाहं समुच्चरन्॥ 46
स्विष्टमग्नेति मन्त्रेण जुहुयात्तदनन्तरे।
त्रियम्बकेन मन्त्रेण आज्येनाष्टशतं हुनेत्॥ 47
आपो राजा इदं विष्णोः प्रत्येकं चरु हूयते।
ततः प्रभाते विमले स्नानं कृत्वा तु देशिकः॥ 48
मन्त्रन्यासोक्तमार्गेण स्वदेहे चैव विन्यसेत्।
ततो वासनहोमं तु कर्तव्यं देशिकोत्तमः॥ 49
सर्वद्रव्यसमायुक्तं पूर्णाहुतिमथाचरेत्।
आचार्यं दक्षिणां दद्यात् पदादीन् पूजयेत्ततः॥ 50

In Public domain. Digitization Muthulakshmi Research Academy

प.71

पूजापर्युषितं लिङ्गे व्यपोह्य कलशं ततः।

स्नापयेत्पञ्चगव्येन पञ्चब्रह्म समुच्चरन्॥ 51

पञ्चासनं तदा कल्प्य पूर्वोक्तविधिना सह।

पञ्चब्रह्म न्यसेल्लिङ्गे षडङ्गान्विन्यसेत्ततः॥ 52

व्योमव्यापि महामन्त्रं विन्यसेल्लिङ्गमूर्धनि।

P.196. सुमुहूर्ते सुलग्ने च शिरसा धारयेत् घटम्॥ 53

विमानप्रदक्षिणं कुर्यात् गर्भगेहं प्रवेशयेत्॥

व्योमव्यापिं समुच्चार्य ब्रह्माङ्गेन संयुतम्॥ 54

स्नापयेच्छिवकुम्भन्तु गौरीबीजेन वर्धनीम्[R]।
(संयुतम्)

विद्येशकलशान् स्नाप्य स्वस्वमन्त्रेण देशिकः॥ 55

In Public domain. Digitization Muthulakshmi Research Academy

प.71

स्नपनं तत्र कर्तव्यं यथाविभवविस्तरम् ।

वस्त्रै माल्यैश्च विविधैरर्चयेद्देवदेवकम् ॥ 56

पञ्चवर्णहविर्दद्यात्ताम्बूलं दापयेत्ततः ।

ब्राह्मणान् भोजयेत्तत्र शैवान् संभोजयेत्ततः ॥ 57

वस्त्रादीनि ददे शैवान् पर्यष्टिपरिचारकान् ।

एवं यः कुरुते मर्त्यः शिवलोकमवाप्नुयात् ॥ 58

इति वीरतन्त्रे षट्—यां जलसंप्रोक्षण-
(एकसप्तति?)
विधि सप्तति पटलः ॥

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 72

॥ अथ वृषभस्थापनविधिपटलः ॥

प्रणम्य भगवन्तं हि ब्रह्मा वचनमब्रवीत् ।
वृषभस्थापनं कीदृशा तत्सर्वं ब्रूहि मे प्रभो ॥ 1
तत्सर्वमखिलं वक्ष्ये , शृणुष्व चतुरानन ।
पूजांशो च प्रमाणेन अधमं वृषभं भवेत् ॥ 2
पूजांशं पञ्चधा भित्वा एकांशेन समन्वितम् ।
पूजांशेन समायुक्तं मध्यमं वृषभं भवेत् ॥ 3
द्व्यंशाधिकं तु पूजांशमुत्तमं वृषभं भवेत् ।
अथवा गर्भमानेन यथावत् गर्भमुच्यते ॥ 4
एकादिनवभागान्तं लक्षणं वृषभस्य तु ।
अथवा तालमानेन त्रितालमध्यमं भवेत् ॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 72

मध्यमं तु चतुस्तालमुत्तमं पञ्चतालकम् ।
सौवर्णं रजतं ताम्रं मृण्मयं वा शिला भवेत् ॥ 6
वृषोत्सेधं नवांशं तु द्व्यंशम्मुखदैर्घ्यकम् ।
गलमंशेन कर्तव्यं षडंशं पृष्ठदैर्घ्यकम् ॥ 7
अंशेनैव तु शृङ्गोच्च बहिर्वक्र समन्वितम् ।
द्वद्वयोरमंशन्तु गोमुखाकृतिरेव च ॥ 8
नासिका चाक्षुसंयुक्त दन्तपङ्क्तिद्वयन्तथा ।
कर्णद्वयसमायुक्तं किंकिणीनूपुरशोभितम् ॥ 9
ग्रकांशं पीठकोच्चन्तु नाटी चार्धांशमुच्यते ।
पादाश्चत्वारमंशन्तु चतुरंशंन्तु बालकम् ॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प. 72

खुरमर्धांशमेवन्तु परीणाहं नवांशकम्।
ऊरुमूलस्य विस्तारं द्व्यंशमिति कथ्यते॥ ॥

P. 197. एवं लक्षण संयुक्तं वृषभं कारयेत्ततः।
शैलश्च मृण्मये लोहे रत्नन्यासन्तु कारयेत्॥ 12
वज्रं वैडूर्यकं चैव पद्मरागन्तथैव च।
इन्द्रनीलञ्च रत्नादी पूर्वादीनि चतुर्दिशि॥ 13
प्रवालं मध्यमे स्थाप्य सुस्निग्धं कारयेत्ततः।
वृषभं क्षालयेद्विद्वान् पुण्याहं वाचयेत्ततः॥ 14
नयनं मोक्षणं कुर्यान्नेत्रद्वययुते दिने।
पूर्वोक्तविधिना कुर्याद् अक्षिहोमादि कारयेत्॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

प. 72

जलाधिवासनं कुर्यान्नववस्त्रेण वेष्टयेत् ।

वृषगायत्रिमन्त्रेण जले चैवाधिवासयेत् ॥ 16

अभितः कलशानष्टौ लोकपालसमन्वितम् ।

जलादुत्तीर्य पूर्वेद्युः प्रविशेदालयं प्रति ।(ततः) 17

शिवाग्रे मण्डपं कुर्यात् पूर्वोक्तविधिना सह ।

मध्यमे वेदिकां कुर्यात् परितः कुण्डमुच्यते ॥ 18

चतुर्दिक्षु च ईशान्यां वृत्तकुण्डमिहोच्यते ।

सप्तवर्गाच्चतुर्थन्तु तद्वर्गात्तु तृतीयकम् ॥ 19

चतुर्दिशाक्षरैर्युक्तं बिन्दुनादसमन्वितम् ।

वृषभमूल दिदाशेयं हुत्वा ब्रह्ममिहोच्यते ॥ 20

In Public domain. Digitization Muthulakshmi Research Academy

प. 72

वेदिमध्ये न्यसेच्छालि तण्डुलान्तिलान् विन्यसेत्।
तदूर्ध्वे विन्यसेद्विप्र पञ्चभिः कंबलैर्युतम्॥ 21
शयने शाययेद्विप्र मूलमन्त्रेण देशिक।
प्रच्छन्नपटसंयुक्तं अभितः कलशान्न्यसेत्॥ 22
वृषभस्यैकदिक्भागे वृषभकुम्भप्रतिष्ठितम्।
वृषगायत्रिमन्त्रेण विन्यसेद्देशिकोत्तमः॥ 23
सवस्त्रं पञ्चरत्नञ्च वृषभस्तत्र देवता।
अष्टविद्येश्वरान् बाह्य कलशस्याधिदेवतान्॥ 24
अर्चयेद्गन्धपुष्पाद्यैः पायसान्नं निवेदयेत्।
ततो होमं प्रकुर्वीत पलाशसमिधास्सह॥ 25

In Public domain. Digitization Muthulakshmi Research Academy

प· 72

समिधाज्यचरूं लाजान् सर्षपेण समन्वितम्।

ईशानादीनि सद्यान्तं क्रमा मन्त्रमिहोच्यते॥ 26

वृषगायत्रिमन्त्रेण आज्येनैव शताहुति।

वृषं स्पृष्ट्वा तु द्रव्यान्ते व्याहृतिं जुहुयात्ततः॥ 27

गौर्धेनु हव्यामन्त्रेण चरूं हुत्वा शताहुतिः।

हव्यवाहादिमन्त्रेण पूर्णाहुतिमथाचरेत्॥ 28

वृषभं स्थापयेद्विप्र वृषमूलेन मन्त्रतः।

P. 198. गायत्रिया पञ्चब्रह्मन्तु स्नापयेत् कुम्भमेवच॥ 29

हविर्दद्याद्विशेषेण ताम्बूलं दापयेत्ततः।

आचार्यदक्षिणां दद्यात् पदार्थान् पूजयेत्ततः॥ 30

ब्राह्मणान् भोजयेत्तत्र जनान् सर्वांश्च भोजयेत्।

एवं यः कुरुते मर्त्यश्शिवलोकं स गच्छति॥ 31

वृषभस्थापनं प्रोक्तं अग्निस्थापनं शृणु।

इति वीरतन्त्रे षदसहस्रसंहितायां
वृषभस्थापनविधि एकसप्ततिपटलः॥?
(द्विसप्ततिपटलः)?

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 73.

॥ अथ अग्निप्रतिष्ठाविधिपटलः॥

देवदेवं प्रणम्यादौ परिपृच्छत् पितामह(ः)?।
अग्निप्रतिष्ठां देवेश तत्सर्वं ब्रूहि मे प्रभो॥ 1
तत्सर्वमखिलं वक्ष्ये श्रृणुष्व चतुराननः।
प्रासादस्याग्निदिक्भागे अग्निर्विमानमुच्यते॥ 2
मूलबेरस्य पूजांशं प्रतिमोत्सेधमुच्यते।
अथवा गर्भमानं वा नवधा भाजिते तथा॥ 3
? ऽकैकं स शंका ये देशिकोत्तमः।
द्वितालमधमं ज्ञेयं त्रितालं मध्यमं भवेत्॥ 4
उत्तमं तु चतुस्तालं प्रतिमोत्सेधमुच्यते।
ऽकहृदयन्त्रिपादं च चतुश्शृङ्गं द्वयं शिरः॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 73

सप्तजिह्वा सप्तहस्ताश्चत्वारो नेत्रमुच्यते ।

पद्मासनसमारूढ मूर्ध्वकेशा समन्वितम् ॥ 6

स्रुवञ्च शक्तिदण्डञ्च दक्षिणे तु करौ ददेत् ।

स्रुवाक्षतोमरञ्चैव इत्येते करेषु च ॥ 7

दक्षिणेन करे चैकन्देवानामाहुतिन्ददेत् ।

एवं समासतः प्रोक्तं पृष्ठलक्षणं श्रृणु ॥ 8

रत्नन्यासन्तु कर्तव्यं पूर्वे वज्रं तथैव च ।

मरकतं दक्षिणे न्यस्य पश्चिमे तु प्रवालकम् ॥ 9

वैडूर्यमुत्तरे न्यस्य माणिक्कं मध्यमे न्यसेत् ।

नयनमोक्षणं कुर्यात् नेत्रद्वययुते दिने ॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प. 73

यद्वर्गस्य द्वितीयन्तु प्रथमस्य चतुर्थकम् ।
बिन्दुनादसमायुक्तं अग्निमूलमुदाहृतम् ॥ 11

ह्रस्वा ब्रा समाख्याता दीर्घा भ्यङ्गानि चोच्यते ।
नयनमोक्षणं कुर्यात् पूर्वोक्तविधिना पुनः ॥ 12

स्नापयेत् पञ्चगव्येन ततो ग्रामप्रदक्षिणम् ।
जलाधिवासनं कुर्यात् तस्य मूलेन मन्त्रतः ॥ 13

P.199 एकरात्रं त्रिरात्रं वा पञ्चरात्रमथापि वा ।
प्रासादस्य गतश्चैव पूर्वोक्तमण्डपं कुरु ॥ 14

मध्यमे वेदिकां कुर्यात् परितः कुण्डमुच्यते ।
चतुर्दिक्षु च ईशान्यां त्रिकोणं कुण्डमुच्यते ॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

जलादुत्तीर्य पूर्वेद्युः पञ्चगव्येन स्नापयेत्।
प्रतिस्थैकदिक्भागे अग्निमूलेन विन्यसेत्॥ 16
वेदिमध्ये न्यसेच्छाली तण्डुलान्तिल् विन्यसेत्।
शयनं पञ्चभिः कल्प्य प्रतिमं विन्यसेत्ततः॥ 17
प्रच्छन्नपटसंयुक्तं कुम्भन्यासन्तु कारयेत्।
तस्यैव वामभागे तु स्वाहाबीजेन वर्धनीम्॥ 18
पूर्वादीशानपर्यन्तमष्टकुम्भान् क्रमान्न्यसेत्।
हुताशनं पावकञ्च अनलं हव्यवाहनम्॥ 19
ज्वलन् सप्तजिह्वञ्च तापनन्तु महासनम्। नसम्।
पूर्वादीशानपर्यन्तं विन्यसेत्तु विशेषतः॥ 20

In Public domain. Digitization Muthulakshmi Research Academy

प. 73

सवस्त्रां सहिरण्यांश्च सकूर्चान् सापिधानकान्।

ततो होमं प्रकर्तव्यं पलाशसमिधायुतम्॥ 21

समिधाज्यचरूं लाजान् सर्षपांश्च यवांस्तिलान्।

मुद्गमाषञ्च नीवारं बिल्वञ्चैकादशं भवेत्॥ 22

पञ्चब्रह्मषडङ्गेन क्रमाद्धोतव्यमेव च।

ततः प्रभाते विमले स्नानं कृत्वा तु देशिकः॥ 23

ज्ञातत्संहारमूर्त्तिस्तु संहारन्यासमुच्यते।

ततो वासन होमञ्च समिधाज्य चरून्युतम्॥ 24

मूलमन्त्रेण विप्रेन्द्र प्रत्येकन्तु शताहुति।

विमाने स्थापयेद्विद्वान् प्रतिमं पश्चिमम्मुखम्॥ 25

In Public domain. Digitization Muthulakshmi Research Academy

प. 73

स्नापये मूलमन्त्रेण वर्धनीं स्थापयेत्ततः ।

स्वस्व नामेन मन्त्रेण स्नापयेत्कुम्भमेव च ।। 26

हविर्निवेदयेत्पश्चात् ताम्बूलन्दापयेत्ततः ।

ब्राह्मणान् भोजयेत्तत्र पर्याप्तिपरिचारकान् ।। 27

आचार्यं पूजयेत्पश्चात् पदार्थान् पूजयेत्ततः ।

अग्निस्थापनमेवोक्तं मातृणां स्थापनं शृणु ।। 28

इति वीरतन्त्रे अग्निस्थापनविधि

(त्रि?)
द्विसप्ततिपटलः ।।

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 74

॥ अथ मातृस्थापनविधिपटलः॥

प्रणम्य शिरसा देवं ब्रह्मा पृच्छति शंकरम्।

मातॄणां स्थापनं किंवा तत्सर्वं ब्रूहि मे प्रभो॥ 1

तत्सर्वमखिलं वक्ष्ये शृणुष्व चतुरानन।

P. 200. ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा॥ 2

वाराहीच तथेन्द्राणि चामुण्डा वीरभद्रकम्॥

विघ्नेशं प्रतिमं कृत्वा स्थापयेद्विधिपूर्वकम्॥ 3

हस्तं वा गर्भमा .... ग्निं कारयेत्ततः॥

चतुर्भुज त्रिनेत्राञ्च पद्मासनोपरि स्थितम्॥ 4

वामे च दक्षिणे हस्ते कृष्णा परशु धारणम्॥

वीरभद्रं मया प्रोक्तं ब्राह्मी चैव शृणुष्वथ॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 74.

चतुर्भुजन्त्रिणेत्राञ्च सुस्तनीं च सुयौवनम् ।
दक्षिणे अक्षसूत्रञ्च वामहस्ते कमण्डलून् ॥ 6
पद्मासनोपरिष्ठान्तु ब्रह्माणी चैव कारयेत् ।
त्रिणेत्राञ्चतुर्भुजाञ्चैव जटामकुटधारिणीम् ॥ 7
दक्षिणे वामहस्ते च कृष्णा परशुधारिणीम् ।
पद्मासने परीष्ठान्तु माहेश्वरीञ्च कारयेत् ॥ 8
द्विनेत्रा द्विभुजाश्चैव सुस्तनाञ्च सुयौवनाम् ।
दक्षिणे वामहस्ते च अक्षमाला कमण्डलुम् ॥ 9
मकुटेन समायुक्तं कौमारी ञ्चैव कारयेत् ।
द्विनेत्रां चतुर्भुजां देवीं शङ्खचक्रगदाधराम् (वराभयाम्) ॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प. 74

करण्ड मकुटा देवी सुस्तनौ च सुयौवनाम् ।
कारयेद्वैष्णवीं देवीं वाराहञ्च ततः शृणु ॥ 11
द्विनेत्राञ्चतुर्भुजान्देवीं हल मुशलमायुताम् ।
मकुटेन समायुक्तां वाराहमुख संयुताम् ॥ 12
दंष्ट्रिण समायुक्तां वाराहीं कारयेत्ततः ।
चतुर्भुजां द्विनेत्राञ्च श्यामवर्णसमायुताम् ॥ 13
वज्रतोमरसंयुक्तामिन्द्राणीं कारयेत्ततः ।
चतुर्भुजां त्रिणेत्राञ्च खड्ग खेटकसंयुताम् ॥ 14
शूलं कपाल हस्तां च रौद्रदृष्टि भयावहाम् ।
ऊर्ध्वकेशां सुरक्ताक्षाञ्चामुण्डीं कारयेत्ततः ॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

प. 74

चतुर्भुजां त्रिणेत्रांच ।विघ्नेशं कारयेत्ततः।

यरलवशषसहगकारं गणपतिन्तथा ॥ 16

मायानलसमायुक्तं बिन्दुनादसमन्विताम्।

मूलमन्त्रमिदं प्रोक्तं सर्वकामफलप्रदाम् ॥ 17

ह्रस्वाब्रह्म समाख्याता दीर्घा ह्यङ्गानिचौच्यते।

रत्नन्यासमिदं प्रोक्तं सर्वासां पञ्चरत्नकम् ॥ 18

नयनं मोक्षणं कुर्यात् पूर्वोक्तेनैव मार्गतः।

अक्षिहोमन्तु नेत्रेण आज्येनैव शताहुतिः॥ 19

प. 201 जलाधिवासनं कुर्यात पूर्वोक्तैन विधानतः।

जलादुत्तीर्य पूर्वेद्युः प्राविशेदालयं प्रति ॥ 20

In Public domain. Digitization Muthulakshmi Research Academy

प. 74

पूर्ववन्मण्डपं कुर्यात् पूर्वोक्तेनैव मार्गतः।
तन्मध्ये वेदिको कुर्या परितः कुण्डमुच्यते॥ 21
चतुरश्रं योनिकुण्डञ्च अर्धचन्द्र त्रिकोणकम्।
वर्त्तुलं पञ्चकोणञ्च पद्मञ्चैवाष्टकोणकम्॥ 22
पूर्वादीनि क्रमं न्यस्य कुण्डानेतानि विन्यसेत्।
इन्द्र ईशानयोर्मध्ये सप्ताश्रन्तु गणाधिपम्॥ 23
पुण्याहं वाचयेत्तत्र पवमानेन प्रोक्षयेत्।
शालिना विकिरे चैति तण्डुलं तिल विन्यसेत्॥ 24
शयनं पञ्चभिः कल्प्य तस्योपरि न्यसेत्ततः।
ब्रह्माणी मध्यमे स्थाप्य पूर्वे माहेश्वरी न्यसेत्॥ 25

In Public domain. Digitization Muthulakshmi Research Academy

प. 74

कुमारीं वह्निदेशे तु वैष्णवीं दक्षिणे न्यसेत् ।
वाराहीं निरृतौ चैव इन्द्राणीं पश्चिमे न्यसेत् ॥ 26
चामुण्डीं वायुदेशे तु उत्तरे वीरभद्रकम् ।
ईशानं गणपतिं न्यस्य प्रच्छन्नपरसंयुतम् ॥ 27
तस्यैव वामभागे तु कुम्भान्विन्यस्य देशिकः ।
अर्चयेद्गन्धपुष्पाद्यैः स्वस्वमन्त्रेण देशिकः ॥ 28
वस्त्रेण वेष्टयेद्विद्वान् स्वर्णेनैव संयुतान् ।
हविर्निवेदयेत्पश्चात् ताम्बूलं दापयेत्ततः ॥ 29
ततो होमं प्रकुर्वीत लक्षणेन समन्वितम् ।
पलाशसमिधा युक्तं प्रत्येकन्तु शताष्टकम् ॥ 30

In Public domain. Digitization Muthulakshmi Research Academy

प.74

समिधाज्यचरून् लाजान् सर्षपांश्च यवांस्तिलान्।
मुद्गमाषञ्च बिल्वञ्च कदळीफलसंयुतम्॥ 31
पञ्च ब्रह्म षडङ्गैश्च प्रत्येकन्तु शताहुतिः।
घृतमिक्षेति मन्त्रेण पञ्चविंशति हूयते॥ 32
चतुर्दिक्षु चतुर्वेदैः कुर्याद्ध्ययनन्ततः।
ततः प्रभाते विमले स्नानं कृत्वा तु देशिकः॥ 33
ततो वासनहोमन्तु समिधाज्येन संयुतम्।
मूलमन्त्रेण विप्रेन्द्र प्रत्येकं तु शताहुतिः॥ 34
हुत्वान्ते तु स्पृशेत् बिम्बं द्रव्यं प्रति विशेषतः।
स्थापये प्रतिमन्तत्र वीरपश्चिमतो मुखम्॥ 35

In Public domain. Digitization Muthulakshmi Research Academy

प. 74

उत्तराभिमुखन्देव्या स्थापयेद्देशिकोत्तमः।

पूर्वाभिमुखमेवन्तु विघ्नेशं स्थापयेत्ततः॥ 36

P. 202. प्रतिष्ठाकुम्भमादाय स्नापये स्वस्वमन्त्रतः।

हविर्दद्याद्विशेषेण ताम्बूलं दापयेत्ततः॥ 37

ब्राह्मणान् भोजयेत्तत्र सप्तकन्यांश्च भोजयेत्।

मात्राणां स्थापनं प्रोक्तं कुमारस्थापनँ शृणु॥ 38

इतिवीरतन्त्रे षट्सहस्रसंहितायां

[चतुः]?

मातृस्थापनविधि त्रिसप्ततिपटलः॥

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 75

॥ अथ कुमारप्रतिष्ठाविधिपटलः ॥

प्रणिपत्य जगन्नाथं ब्रह्मा वचनमब्रवीत् ।
कुमारस्थापनं किंवा तत्सर्वं ब्रूहि मे प्रभो ॥ 1
तत्सर्वमखिलं वक्ष्ये श्रृणुष्व चतुरानन ।
पूजाभागसमोत्सेधं प्रतिमं सोच्छ्रयं भवेत् ॥ 2
गर्भन्तु नवधा भज्य ह्येकैकं प्रतिमोच्छ्रयम् ।
चत्वारः पञ्च तालं वा षट्तालं वापि कारयेत् ॥ 3
त्र्यक्षं चतुर्भुजं शान्तं मकुटेन समन्वितम् ।
वरदाभयहस्तन्तु अक्षमाला कमण्डलम् ॥ 4
स्वस्तिमं पद्ममध्येतु पूर्वाभिमुखमेव च ।
जया च विजया चैव देव्यौ पार्श्वौ स्थिता सदा ॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 75

शिखिनां कुक्कुटं वापि गजं वा स्थापयेत्ततः।

एभिस्तु लक्षणैर्युक्तं प्रतिमं कारयेत्ततः॥ 6

अष्टवर्गात् तृतीयन्तु सप्तवर्गतृतीयकम्।

प्रथमन्तु स्य चतुर्थन्तु बिन्दुनादसमन्वितम्॥ 7

मूलमन्त्रमिति प्रोक्तं त्रिदशैरपि दुर्लभम्।

ह्रस्वा ब्रह्म समाख्याता दीर्घा ह्यङ्गानि चोच्यते॥ 8

रत्नन्यासं प्रकर्तव्यं पूर्वादीनि क्रमाद्बुधैः।

वज्रं मरकतं चैव वैडूर्यञ्च प्रवालकम्॥ 9

चतुर्दिक्षु च विन्यस्य इन्द्रनीलन्तु मध्यमे।

सुस्निग्धं कारयेत्तत्र नयनं मोक्षणं कुरु॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प. 75

सुवर्णसूचिना चैव सौम्ये दृष्टिं लिखेत्ततः।
अक्षिहोमं ततः कृत्वा नेत्रेणैव शताहुतिः॥ 11
प्रच्छन्नपटसंयुक्तं मधुवातेति तर्पयेत्।
घृताग्निक्षेति सन्तर्प्य सवत्सां गां प्रदर्शयेत्॥ 12
जयाच विजया चैव मूलमन्त्रेण कारयेत्।
.... तृतीयन्तु मायानलंसमान्वितम्॥ 13
बिन्दुनादसमायुक्तं जयाबीजमनुत्तमम्।
सप्तवर्गं चतुर्थन्तु मायातत्त्वसमान्वितम्॥ 14
? P. 203 बिन्दुनादसमायुक्तं जयाबीजमनुत्तमम्।
सप्तवर्गश्चतुर्थन्तु मायातत्त्वसमान्वितम्॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

प. 75

बिन्दुनादसमायुक्तं - - - - - विजयमुच्यते ।
ब्राह्मणान् दर्शयेत्तत्र पुण्याहं वाचयेत्ततः ॥ 16
स्नापयेत्पञ्चगव्येन प्रतिमां क्षालयेन्मृदा ।
नववस्त्रसमायामो कुर्यात् ग्रामप्रदक्षिणम् ॥ 17
जलाधिवासनं कृत्वा त्रिरात्रं पञ्चरात्रकम् ।
मूलमन्त्रेण विप्रेन्द्र प्रच्छन्नपटसंयुतम् ॥ 18
अभितः कलशानष्टौ लोकपालाधिदैवतान् ।
जलादुत्तीर्य पूर्वेद्युः स्नापयेत्पञ्चगव्यकैः ॥ 19
वास्तुहोमं दिवा कुर्यात् मण्डपं कारयेत्ततः ।
मध्यमे वेदिकां कुर्यात् परितः कुण्डमुच्यते ॥ 20

In Public domain. Digitization Muthulakshmi Research Academy

प. 75

चतुरश्रं चतुर्दिक्षु आग्नेयादि कोणकम् ।
इन्द्र ईशानयोर्मध्ये कुर्यात्कुण्डं त्रिकोणकम् ॥ 21
सोम ईशानयोर्मध्ये पञ्चाश्रं बिन्दुमयं तथा ।
शालिना विकिरेद्वेति तण्डुलं तिलं विन्यसेत् ॥ 22
शयनं पञ्चभिः कल्प्य मूलमन्त्रसमन्वितम् ।
शायये द्वेदिका मध्य प्राक्शिरस्का विधीयते ॥ 23
जयाच विजयो चैव द्वौ पार्श्वौ स्थापयेत् क्रमात् ।
सवस्त्रं सहिरण्यञ्च सकूर्चं सापिधानकम् ॥ 24
पूर्वादीशानपर्यन्तं अष्ट कुम्भान् क्रमान्न्यसेत् ।
कमारञ्च गुहञ्चैव सुब्रह्मण्यं तथैव च ॥ 25

In Public domain. Digitization Muthulakshmi Research Academy

प. 75

सेनापतिं सुराग्रञ्च हंरसूनुन्तथैव च।
शरवणोद्भवञ्चैव कार्तिकेयञ्च विन्यसेत्॥ 26
गन्धपुष्पादिनाभ्यर्च्य स्वस्वनामेन मन्त्रतः।
नैवेद्यं दापयेत् पश्चात् ताम्बूलं दापयेत्ततः॥ 27
ततो होमं प्रकुर्वीत पलाश समीधैस्सह।
समिधाज्यचरूं लाजान् सर्षपांश्च यवांस्तिलान्॥ 28
शालिनीवारगोधूममुद्गञ्चैव समन्वितम्।
पञ्चब्रह्मषडङ्गेन क्रमाद्धृत्वा विशेषतः॥ 29
स्कन्दमूलेन होतव्यमाज्येनैव शताहुतिः।
ततः प्रभाते विमले स्नानं कृत्वा तु देशिकः॥ 30

In Public domain. Digitization Muthulakshmi Research Academy

प.75

ततो वासा होमन्तु समिधाज्यचरूं युतम्।
मूलमन्त्रेण विप्रेन्द्र पञ्चदशाहुतिं हुनेत्॥ 31
चतुर्दिक्षु चतुर्वेदैः कुर्यादध्ययनं ततः।
P.204. सर्वद्रव्यसमायुक्तं हव्यवाहं समुच्चरन्॥ 32
स्विष्टमग्नेति मन्त्रेण जुहुयात्तदनन्तरे।
पूर्णाहुतिं यदस्येति जुहुयाद्देशिकोत्तमः॥ 33
उत्थाप्य शयनाद्देवं सृष्टिन्यासन्तु कारयेत्।
आचार्य दक्षिणां दद्यात् पञ्चाङ्गं भूषणैर्युतम्॥ 34
स्नापयेत् स्कन्दमूलेन स्कन्दकुम्भं विशेषतः।
जया विजया चैव तत्तन्मूलेन स्थापयेत्॥ 35

In Public domain. Digitization Muthulakshmi Research Academy

प. 75

हविर्निवेदयेत् पश्चात् ताम्बूलं दापयेत् ततः।

ब्राह्मणान् भोजयेत्तत्र शैवान् शं भोजयेत्ततः॥ 36

अर्चयेद्विधिना चैव सृष्टिन्यासन्तु कारयेत।

आवाहयेत्तु वामेन सद्येन स्थापनं भवेत॥ 37

ईशानेन अभिषेकन्तु - - - - - - - - - ।

गन्धाद्या हृदया चैव पुष्पन्तु शिरसा तथा॥ 38

वस्त्रादीनि सर्वांश्च हृदयेन तु दापयेत्।

नैवेद्यं हृदयेनैव नित्योत्सवन्तु कारयेत॥ 39

स्थत्रके स्थण्डिला न्यस्य अर्चयेत् गन्धपुष्पकैः।

प्रतिमं पूते गत्वा पश्चात्तु क्षणिकं व्रजेत॥ 40

In Public domain. Digitization Muthulakshmi Research Academy

प. 75

आलयं प्रविशेत्तत्र नैमित्तिकमिहोच्यते ।
उत्सवं कारयेत्तत्र ऽकाहे त्रियहेऽपि वा ॥ 41
पञ्चाहे चैव सप्ताहे उत्सवं कारयेत्ततः ।
उत्सवोक्तं यथा कुर्यात्तीर्थान्तं सर्वमाचरेत् ॥ 42
स्नंपनं कारयेत्तत्र लक्षणेन समन्वितम् ।
स्कन्दस्थापनमेवोक्त ज्येष्ठास्थापनकं कुरु ॥ 43

इति वीरतन्त्रे स्कन्दस्थापनविधि

[पञ्च]?
चतुस्सप्तति पटलः ॥

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 76

॥ अथ ज्येष्ठास्थापनविधिपटलः ॥

प्रणिपत्य जगन्नाथं ब्रह्मा पृच्छति शंकरम् ।
ज्येष्ठाया स्थापनं किंवा तत्सर्वं ब्रूहि मे प्रभो ॥ 1
तत्सर्वमखिलं वक्ष्ये शृणुष्व चतुरानन ।
पूजांशोच्चप्रमाणेन प्रतिमोत्सेधमुच्यते ॥ 2
येवा गर्भगृहं पीत्वा ...कैकं प्रतिमोच्छ्रयम् ।
चत्वारं पञ्च षट्तालं प्रतिमं सोच्छ्रयं भवेत् ॥ 3
द्विहस्ताञ्च द्विनेत्राञ्च सौम्यं वदनसंयुताम् ।
मकुटेन समायुक्तां रक्तवस्त्रसमन्विताम् ॥ 4
किञ्चित्कुञ्चितपादाभ्यां पद्मासनोपरि स्थिताम् ।
दक्षिणे पुत्रसंयुक्तां सूकराननसंयुताम् ॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 76

P. 205 वामे पुत्रीसमायुक्तां स्तस्यां शिरसि हस्तयोः।

एवं लक्षणसंयुक्तां देव्या रूपं प्रकल्पयेत्॥ 6

काकध्वजसमायुक्तां पूर्वाभिमुखमेव च।

मूलमन्त्रं प्रवक्ष्यामि द्वितीयस्य तृतीयकम्॥ 7

सप्तमस्य द्वितीयन्तु प्रथमस्य चतुर्थकम्।

बिन्दुनादसमायुक्त ज्येष्ठामूलमिति स्मृताम्॥ 8

ह्रस्व ब्रह्म समाख्याता दीर्घाभ्यङ्गानि चोच्यते।

प्रथमस्यैकादशं युक्तं बिन्दुनादसमन्वितम्॥ 9

पुत्रबीजमिदं ज्ञेयं पुत्रिबीजं तत् शृणु।

पञ्चमात्पञ्चमं ग्राह्य बिन्दुनादसमन्वितम्॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प.76

पुत्रीबीजमिदं प्रोक्तं स्थापनं श्रृणु तत्त्वतः।
रत्नन्यासन्तु कर्तव्यं पञ्चरत्नन्तु मूलतः॥ 11
नयनं मोक्षणं कुर्यात् पञ्चं ब्रह्म समन्वितम्।
अक्षिहोमं ततः कुर्यात्तु? दाज्येनैव शताहुतिः॥ 12
तर्पयेन्मधु सर्पिश्च सवत्सां गां प्रदर्शयेत्।
जलाधिवासनं कुर्यात् मूलमन्त्रेण देशिकः॥ 13
प्रच्छन्नपटसंयुक्तं कलशान् लोकपालकान्।
एकरात्रं त्रिरात्रं वा पञ्चरात्रमथापि वा॥ 14
जलादुत्तीर्य पूर्वेद्युः पञ्चगव्येन स्नापयेत्।
पूर्वोक्तमण्डपे रम्ये मध्ये वेदिकया युतम्॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

प. 76

कुण्डानि कारयेत्तत्र नव वा पञ्च एव वा।

वृत्तं वा चतुरश्रं वा सर्वकुण्डानि कारयेत्॥ 16

आग्नेय्यां पुत्रकुण्डन्तु नैरृत्यां पुत्रिकुण्डकम्।

वास्तुहोमं दिवा कुर्यात् लक्षणेन समन्वितम्॥ 17

वेदिमध्ये न्यसेच्छालीन्तण्डुलान्तिलान् विन्यसेत्।

शयनं पञ्चभिः कल्प्य गन्धपुष्पादिनार्चयेत्॥ 18

प्रतिमस्यैशदिक्भागे ज्येष्ठाकुम्भान्यसेत् क्रमात्।

दक्षिणे वामपार्श्वे तु पुत्रं पुत्रीसमन्वितम्॥ 19

पूर्वादीशानपर्यन्तं अष्टकुम्भान् क्रमान्न्यसेत्।

वामादिशक्तिसंयुक्तौ ~~संयुक्तं~~ काक क्रमान्न्यसेत्॥ 20

In Public domain. Digitization Muthulakshmi Research Academy

प. 76.

वामादिशक्तिसंयुक्तं काकञ्चाग्नेयकुम्भकम्।
सवस्त्रां सापिधानाञ्च सहिरण्यं सकूर्चकम्॥ 21
गन्धपुष्पादिनाभ्यर्च्य पायसान्नन्निवेदयेत्।
ततो होमं प्रकुर्वीत पलाशसमिधा सह॥ 22
समिधाज्यचरूं ल्लाजान् सर्षपांश्च यवांस्तिलान्।
P. 206. शालिनीवारगोधूममुद्गैरेव समन्वितम्॥ 23
पञ्चब्रह्मषडङ्गैश्च हुंत्वान्ते तु यथाक्रमम्।
मूलमन्त्रेण विप्रेन्द्र अष्टोत्तरशताहुतिः॥ 24
ततः प्रभाते विमले स्नानं कृत्वा तु देशिकः।
चतुर्दिक्षु चतुर्वेदैः कुर्याद्ध्ययनं ततः॥ 25

In Public domain. Digitization Muthulakshmi Research Academy

प. 76

ततो वासनं होमन्तु समिधाज्यचरून्युतम् ।
मूलमन्त्रेण होतव्य प्रत्येकन्तु शताहुतिः ॥ 26
हुत्वान्ते तु यदस्येति हुत्वा पूर्णाहुतिं ततः ।
उत्थाप्य शयनाद्देवी स्थापये मानुषे पदे ॥ 27
प्रधानकुम्भमादाय मूलेन स्थापयेत्पुनः ।
पञ्चब्रह्मशिवाङ्गैश्च स्नापयेत् च्छक्तिकुम्भकान् ॥ 28
अर्चयेत् गन्धपुष्पाद्यैः पायसान्नन्निवेदयेत् ।
ब्राह्मणान् भोजयेत्तत्र शैवान् शंभोजयेत्ततः ॥ 29
नित्यार्चनविधिं वक्ष्ये शृणुष्व चतुरानन ।
अङ्गन्यासकरन्यासं च ब्रह्मेण कारयेत् ॥ 30

In Public domain. Digitization Muthulakshmi Research Academy

प.76

पाद्यार्घ्याचमनीयाञ्च हृदयेन तु दापयेत्।
आवाहयेत्तु सद्येन वामेन स्थापनं भवेत्॥ 31
अभिषेकन्तु मूलेन अर्चयेद्धृदयेन तु।
हृदयेन चरूं दद्यान्नित्योत्सवन्तु कारयेत्॥ 32
महोत्सवं प्रवक्ष्यामि ध्वजारोहणकं ततः।
प्रासादस्य समोत्सेधं ध्वजदण्डं विधीयते॥ 33
ध्वजपटं हस्तम्मध्ये ------ तु लेखयेत्।
भेरीताडनकं कृत्वा अङ्कुरार्पणमेव च॥ 34
शिवोत्सवक्रमेणैव उत्सवं कारयेत्ततः।
ततो ग्रामबलिं दद्याच्छुद्धान्नं प्रतिमायुतम्॥ 35

In Public domain. Digitization Muthulakshmi Research Academy

प. 76

प्रथमं भूतरात्रन्तु द्वितीयं गणरात्रकम् ।
तृतीयमृषिरात्रन्तु चतुर्थं गन्धमुच्यते ॥ 36
पञ्चमं ब्रह्मरात्रं तु षष्ठं वा कलिरात्रकम् ।
ज्येष्ठांशं सप्तमं रात्रमित्येते रात्रिदेवता ॥ 37
चूर्णोत्स[वि]न्ततः कुर्यात् तीर्थं कृत्वा ततो बुधः ।
स्नपनं कारयेत्तत्र लक्षणेन समन्वितम् ॥ 38
अष्टोत्तरशतं वापि पञ्चाशत् पञ्चविंशतिः ।
एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात् ॥ 39

इति वीरतन्त्रे षट्सहस्रसंहितायां
[षट्सप्तति पटलः]?
ज्येष्ठास्थापनविधि चतुस्सप्ततिं पटलः ॥

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 77

॥ सहस्रकलशस्नपनविधिपटलः॥

लोकनाथं प्रणम्यादौ ब्रह्मा पृच्छति शंकरम्।
स्नपनं विविधं कोवा तत्सर्वं ब्रूहि मे प्रभो॥ 1
तत्सर्वमखिलं वक्ष्ये शृणुष्व चतुरानन।
ग्रहणे विषुवे चैव अयने व्यतिपा?सने॥ 2
षडशीतिमुखे चैव प्रतिष्ठे चोत्सवान्तके।
अद्भुतानां समुत्पन्ने प्रायश्चित्तादि संभवे॥ 3
द्रावमादिषु सर्वेषु स्नपनं तत्र कारयेत्।
प्रासादस्याग्रतश्चैव मण्डपं चतुरश्रकम्॥ 4
त्रिहस्तं पञ्चहस्तं वा षट्सप्ताष्टनवन्तथा।
एकादशं करं वाथ त्रयोदशकरन्तु वा॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 77

पञ्चादशकरं वाथ मण्डपं कारयेत्ततः।

(वि:)
अधमं पूर्वत्रयं सिद्धि मध्यमञ्चापरं भवेत्॥ 6

प्रोक्तन्तु नवभेदेन चोच्यते तु मया द्विज।

ऋषिश्छन्दो देवतान् वक्ष्ये शृणुष्व कमलासन॥ 7

अगस्त्येन समायुक्तं जगतश्छन्दसंयुतम्।

आदित्येन समायुक्तं उत्तमन्तु धमुच्यते॥ 8

वसिष्ठेन समायुक्तं शक्वरीश्छन्ददुच्यते।

विष्णेशेन समायुक्तं मध्यमत्रयमुच्यते॥ 9

व्यसेन समायुक्तं मनुष्टुफुश्छन्दसंयुतम्।

श्छन्देनैव समायुक्तं मधमत्रयमुच्यते॥ 10

चतुरश्रं समं कृत्वा प्रपां वा मण्डपन्तु वा।

मंण्डपं नव षट्त्रिंशत् ...... गात्रं संयुतम्॥ 11

In Public domain. Digitization Muthulakshmi Research Academy

प. 77

षोडशं द्वादशं वाथ पूर्वोक्तेन विधानतः।

पूर्वोक्त विविधानेन मण्डपं कारयेत्ततः॥ 12

अधमं त्रय विद्धि मध्यममुत्तमञ्चापरं भवेत्।

प्रोक्तन्तु नवभेदेन चोच्यते तु मया द्विजः॥ 13

ऋषिश्छन्दोदेवतानाञ्च तव स्नेहात् प्रजापते।

वितानोध्वजमाच्छाद्य मुक्तादामैरलंकृतम्॥ 14

अष्टदिक्षु ध्वजान्न्यस्य लोकपालान् लिखेत्ततः।

चतुर्द्वारसमायुक्तञ्च तु स्तोरण संयुतम्॥ 15

दर्भमालाभिरावेष्ट्या नालिकेर फलैर्युतम्।

स्रक् पट्ट दे··· गैर्नेत्र दीपैरलंकृतम्॥ 16

In Public domain. Digitization Muthulakshmi Research Academy

प.77

पुष्पमालासमायुक्तं सर्वालंकारसंयुतम् ।

सहस्रकलशश्चैव उत्तमोत्तममुच्यते ॥ 17

P.208. पञ्चाशधेन संयुक्तमुत्तमे मध्यमं भवेत् ।

पञ्चाशदधिकद्विशतत् मुत्तमाधममुच्यते ॥ 18

अष्टोत्तरशतं चैव मध्यतोत्तममुच्यते ॥ ।

एकाशीतिस्तु मध्य स्यात् मध्यस्य द्विशेषतः ॥ 19

एवं नवविधं प्रोक्तमुत्तमोत्तमकं श्रृणु ॥ ।

सुमुहूर्ते सुलग्ने च सूत्रपादन्तु कारयेत् ॥ 20

रज्जुना शालिपिष्टेन कर्तव्यं लक्षणान्वितम् ॥ ।

अष्टाधिकञ्च विप्रेन्द्र चत्वारिंशाच्च संयुतम् ॥ 21

In Public domain. Digitization Muthulakshmi Research Academy

प. 77

सूत्रं पादं प्रकर्तव्यं प्रागग्राणीह विन्यसेत्।
उत्तराग्रं तथैवं स्याद्देवमेव क्रमेण तु ॥ 22
मात्राङ्गुलेन विप्रेन्द्र अन्तरतालमात्रकम्।
मध्यमे पञ्चविंशन्तु तद्वयावृतविद्धिकान्। वीधिकान्। 23
बाह्ये पञ्चपदं स्तित्वा पदद्वयन्तु वीधिका।
बाह्ये पदद्वयं त्यत्वा पञ्चपञ्चपदान्तरे ॥ 24
पूर्वञ्च दक्षिणञ्चैव पश्चिमोत्तरं तथा।
एवमेव क्रमेणैव वीथीनां लोपयेत् क्रमात् ॥ 25
मध्यमात् परितो विप्र अष्टव्यूहान् व्यपोह्य च।
व्यूहान्तरे प्रकर्तव्यं होमस्थापनमाक्रमात् ॥ 26

In Public domain. Digitization Muthulakshmi Research Academy

प.77

तत् बाह्ये परितो विप्र कलशस्थानमुच्यते।

पुण्याहं वाचयेत्तत्र पवमानेन प्रोक्षयेत्॥27

शालिना विकिरेत्तत्र लक्षणेन समन्वितम्।

कलशान् प्रति निक्षिप्य अर्धकञ्चोत्तमं भवेत्॥28

द्विप्रस्थम्मध्यमं प्रोक्तं प्रस्थञ्चाधममुच्यते।

एवमेव प्रकारेण हीनञ्चापी न कारयेत्॥29

हीनञ्चेश्चैव विप्रेन्द्र व्याधिरोगभयन्ददेत्।

शाल्यर्धं तण्डुलं न्यस्य तण्डुलार्धन्तिला न्यसेत्॥30

तिलतण्डुलहीने तु ज्वरादिपीडनं भवेत्।

पद्ममष्टदलं लिख्य दर्भैश्चैव परिस्तरेत्॥31

In Public domain. Digitization Muthulakshmi Research Academy

प. 77

पुण्याहं वाचयेत्तत्र शुद्धैरित्थैरिति ब्रुवन्।
कलशानां विधिं वक्ष्ये उत्तम् द्रोणपूरितम् ॥32
शिवपूरितं मध्यमातशकैनामधमं भवेत्।
अपक्वमतिपक्वञ्च हीनं काळं विवर्जयेत् ॥33
पावमेव प्रकारेण कलशान् गृह्य यत्नतः।
त्रिगुणीकृतमेकं वा वेष्टयेत् कुञ्जराक्षि···त ।34
क्षाळयेद्वारिणा विप्र दर्भोपरि न्यसेद्यदा।
P. 209. शुद्धोदकेन संपूर्णं कूर्चमध्ये विनिक्षिपेत् ॥35
मध्यमे स्थापयेत् कुम्भं प्रासादेन तु मन्त्रतः।
पञ्चासनोपरिष्टान्तु स्थापयेत् कुम्भमेव च ॥36

In Public domain. Digitization Muthulakshmi Research Academy

प. 77

वर्धनीं स्थापयेद्विद्वान् गौरीबीजेन मन्त्रतः।
गन्धपुष्पादिनाभ्यर्च्य व्योमव्यापिं समुच्चरन् ॥ 37
शिवकुम्भञ्च वर्धन्यां पूजयेत्तु विशेषतः।
पूर्वादीशानपर्यन्तं अष्टकुम्भान्न्यसेत् क्रमात् ॥ 38
विद्येश्वरसमायुक्तं गन्धपुष्पादिनार्चयेत्।
नवरत्नं क्षिपेन्मध्ये वर्धन्यां पञ्चरत्नकम् ॥ 39
विद्येशानां सुवर्णञ्च विन्यसेद्देशिकोत्तमः।
वस्त्रयुग्मेन संवेष्ट्य कलशानां प्रतिष्ठितम् ॥ 40
उत्तमं दशहस्तन्तु मध्यमञ्चाष्टहस्तकम्।
षट्सप्त मधमं प्रोक्तं वस्त्रदैर्घ्यमिहोच्यते ॥ 41

In Public domain. Digitization Muthulakshmi Research Academy

प. 77

विस्तारन्तु चतुस्तालं कलशान्वेष्टयेत् क्रमात् ।

एलालवङ्गकर्पूरान् त्रीन् पूजये तिलचम्पुरम् ॥ 42

चूर्णितं हृदयेनैव विन्यसेत् शिवकुम्भके ।

पूर्वादि विन्यसेत् व्यूहात् कलशान् देशिकोत्तमः ॥ 43

वस्त्रैर्धूपैश्च दीपैश्च गन्धैश्चैव तु पूजयेत् ।

एकैकं कलशान् सर्वान् हृदयेन तु विन्यसेत् ॥ 44

मध्यव्यूहन्तु विन्यस्य बाह्यव्यूहं पद् न्यसेत् ।

व्यूहं प्रति न्यसेत् कुम्भान् पञ्चविंशति संख्यया ॥ 45

आज्यञ्चैव तु पूर्वे तु आग्नेय्यां दधि विन्यसेत् ।

गोमूत्रं याम्यदेशे तु क्षीरन्निऋति गोचरे ॥ 46

In Public domain. Digitization Muthulakshmi Research Academy

प. 77

वारुण्यान्तु मधु न्यस्य वायव्यान्तु गुळ न्यसेत्।
गोमयञ्चोत्तरे भागे ईशे गोरोचना न्यसेत् ॥ 47
एवमेव प्रकारेण व्यूहं प्रति न्यसेत्ततः।
मुद्गमाषँच शिम्बञ्च यववेणु प्रयङ्गवा ॥ 48
सर्षपं शालिना चैव विदिक्षु विन्यसेत्ततः।
अजं कपालि विबुधो वज्रदेह प्रमर्दनः ॥ 49
विभूतिरव्ययशास्ता पिनाकी त्रिदशाधिपः।
याम्ये मृत्यु हरे धाता विधाता कर्त्तृकारकः ॥ 50
पूर्वादि विन्यसेद्विद्वान् प्रदक्षिणक्रमेणतु।
एतत् द्रव्यांश्च सर्वेषां कलशानां प्रपूरयेत् ॥ 51

In Public domain. Digitization Muthulakshmi Research Academy

प. 77

अलाभे चैव विप्रेन्द्र यथालाभं विनिक्षिपेत् ।
तत् बाह्ये व्यूहमेवन्तु चतुर्विंशतिरेव च ।। 52
कलशान् पञ्चविंशा तु व्यूहं प्रति न्यसेत् क्रमात् ।
शालावङ्कः तत्कोल तींबु जाति --- फलम्मुरम् ।।53
P. 210 कुष्ठञ्च कुङ्कुमं चैव रघु माञ्ची तथैव च ।
फनसं कदली युक्त मिक्षोदकन्तथैव .. ।। 54
उशीरञ्चन्दनञ्चैव तृणकचोल जंपकम् ।
मनाश्शिला हरितालञ्च पुष्पोदक फलोदुकः ।। 55
लोहञ्च कुङ्कुमञ्चैव चतुर्विंशति संयुक्तः ।
यावत् साधित कलशान्तावद्वै चान्तरोदकम् ।। 56

In Public domain. Digitization Muthulakshmi Research Academy

प. 77

अग्निरुद्रो हुताशी च पिङ्गलः खान्तको हरः।

ज्वलनो दहनो बभ्रूर्भस्मान्तक क्षयान्तकः॥ 57

वौदुं च कतमश्चैव चतुर्विंशति संयुतम्।

यावत् गामीत कलशा तात द्वेद्धान्तरोदकः॥ 58

शालिनीवारगोधूम पियङ्गुश्चैव संयुतम्।

पञ्च ब्रह्म षडङ्गेन यथाक्रमेण हूयते॥ 59

त्र्यम्बकेन मन्त्रेण पञ्चाशद्धूयते क्रमात्।

साङ्ख्यश्च स्समायुक्तं हव्यवाहं समुच्चरन्॥ 60

कालरुद्रश्च विख्याता सर्वधर्मपतिस्तथा।

संयोक्ता च वियोक्ता च नियोक्ता च प्रकीर्तिता॥ 61

In Public domain. Digitization Muthulakshmi Research Academy

प.77

लोकोत्तर स्फटा लोक सं को नागभूषणः।
विश्वाक्लिन्नौ दभासेन धर्मकुच्चैव कीर्त्तिता ॥62
एतेषां देवतानां तु व्यूहे व्यूहे प्रकीर्तिता।
द्रव्यञ्च देवतायुक्तं कलशेषूदकं न्यसेत् ॥63
पूर्वाभिमुख संस्थाप्य शिवोमाञ्चैव देशिकः।
इतरेषान्तु देवानां शिवाभिमुखमेव च ॥64
गन्धपुष्पादिना चैव कलशान् प्रतिपूजयेत्।
वस्त्रेण वेष्टयेत् सर्वान् स्वर्णं तत्रैव निक्षिपेत् ॥65
ततो होमं प्रकुर्वीत लक्षणेन समन्वितम्।
यावदङ्गं भवेत्पीठं तावदङ्गन्तु स्थण्डिलम् ॥66

In Public domain. Digitization Muthulakshmi Research Academy

प.77

समिधाज्यचरून् लाजान् सर्वद्रव्यसमायुतम्।
स्विष्टमग्नेति मन्त्रेण जुहुयात्तदनन्तरे॥ 67
चित्तादीनि जयादीनि होमयेत्तु विशेषतः।
हुत्वान्ते तु यदस्येति जुहुयात्तदनन्तरे॥ 68
गन्धपुष्पादिनाभ्यर्च्य शिवकुम्भञ्च वर्धनीम्।
सर्वदेवान् समाहूय स्तोत्रशब्द समन्वितम्॥ 69
चतुर्दिक्षु चतुर्वेदैः कुर्यादध्ययनन्ततः।
सृष्टिन्यासक्रमेणैव स्वस्वदेहे न्यसेत् क्रमात्॥ 70
मूलबेरमनुप्राप्य निर्माल्यञ्च विसर्जयेत्।
P.211 नववस्त्रपरीधानस्सोष्णीषं सोत्तरीयकम्॥ 71

In Public domain. Digitization Muthulakshmi Research Academy

प.77

पश्चात्सनोपरिष्टान्तु शिवं ध्याये द्विचक्षणः।
शिरसा धारयेत्कुम्भं वर्धन्यां चैव कारयेत् ॥72
ततो गर्भगृहं गत्वा प्रासादेन समन्वितम्।
व्योमव्यापिं जपित्वा तु पञ्चब्रह्मषडङ्गकैः॥73
स्नापयेच्छिवकुम्भन्तु वर्धन्यां पीठकं न्यसेत्।
पूर्वादीशानपर्यन्तं स्नापयेदष्टकुम्भकैः॥74
यथास्थापनमार्गेण स्नापयेत् परमेश्वरम्।
नालिकेरोदकं स्नाप्य शुद्धिं कृत्वा तु भूतलम्॥75
वस्त्रं दक्षया कृदा चैव गन्धपुष्पञ्च दापयेत्।
नैवेद्यं दापयेत् पश्चात् ताम्बूलं दापयेत्ततः॥76

In Public domain. Digitization Muthulakshmi Research Academy

प. ७७

आचार्यं दक्षिणां दद्यात् पदार्थान् पूजयेत्ततः।
स्नानोपकरणान् सर्वमाचार्याय प्रदापयेत्॥ 77
एवं यः कुरुते मर्त्यः शिवलोकमवाप्नुयात्।
सहस्रकलशं प्रोक्तं पञ्चाशतं शृणुध्वथ॥ 78

इति वीरतन्त्रे सहस्रकलशस्थापन-
विधि पञ्च(सप्त)?सप्तति पटलः॥

In Public domain. Digitization Muthulakshmi Research Academy

पटल: ७४

॥ पञ्चशतस्नपनविधिपटलः॥

प्रणम्य भगवन्तं हि परिपृच्छत् पितामहः।
को वा पञ्चशतं स्नानं ब्रूहि मे परमेश्वर॥ 1

तत्सर्वमखिलं वक्ष्ये श्रूयतां चतुरानन।
प्रासादस्याग्रतः कुर्यात् मण्डपं चतुरश्रकम्॥ 2

वितानोपरि सञ्च दर्भमालोपशोभितम्।
? चतुस्तोरणसंयुक्तन्दर्भमालोपरिशोभितम्॥ 3
चतुस्तोरणसंसंयुक्तं दर्भमालासमन्वितम्।
अष्टमङ्गलसंयुक्तं दिक्ध्वजैश्च प्रलम्बितम्॥ 4

मुक्तादामैरलंकृत्य मण्डपं मण्डयेत्ततः।
गोमयालेपनं कृत्वा सूत्रपातन्तु कारयेत्॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 78.

त्रिंशत्सूत्रसमायुक्तं प्रागग्राणि विन्यसेत्।

उदगग्रन्तथैव स्य विन्यसेद्दैशिकोत्तमः॥ 6

मध्ये नवपदं पद्ममष्टपत्रं सकर्णिकम्।

द्वारार्थन्तु चतुर्दिक्षु पदमेकन्तु ह्रासयेत्॥ 7

पद्मबाह्ये तु परितः पदमेकस्थितामितु।

तस्यैव दिक्षु विप्रेन्द्र पदमेकन्तु ह्रासयेत्॥ 8

कोणकोणे त्रयित्वा द्वितीयावरणे न्यसेत्।

तत् बाह्ये तु परितः पदमेकन्तु ह्रासयेत्॥ 9

P. 212 तत् बाह्येकपदं स्थित्वा कलशस्थापितानिच।

तत् बाह्ये परितो विप्रो वर्जयेत् पदपञ्चकम्॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प. 78

तत् बाह्ये तु पतः पदं पत्र स्थितानि तु।
एवमेव प्रकारेण कर्तव्यं लक्षणान्वितम्॥ 11
शालिना विकिरेत्तत्र आसकं कलशं प्रति।
शाल्यर्धं तण्डुलं न्यस्य तण्डुलार्धं तिलान् न्यसेत्॥ 12
पद्ममष्टदलं लिख्य दर्भैश्चैव परिस्तरेत्।
त्रिगुणीकृत सूत्रेण वेष्टयेत् कुञ्जराक्षवत्॥ 13
शुद्धोदकेन संपूर्य कुम्भमादाय मण्डपे।
प्रासादेन तु मन्त्रेण स्थापयेत् शिवकुम्भकम्॥ 14
वर्धनीं तस्य वामे तु गौरीबीजेन स्थापयेत्।
वस्त्रयुग्मेन संवेष्ट्य वेष्टयेद्द्विगुणोपरि॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

प. 78

कूर्चं तत्रैव निक्षिप्य नवरत्नानि निक्षिपेत्।
वर्धन्यां पञ्चरत्नन्तु विन्यसेद्देशिकोत्तमः॥ 16
शिवकुम्भे शिवं स्थाप्य वर्धन्याञ्च मनोन्मनीम्।
अभितः कलशानष्टौ विद्येश्वरसमन्वितम्॥ 17
वस्त्रयुग्मेन संवेष्ट्य स्वर्णं तत्रैव निक्षिपेत्।
प्रथमावरणं ह्येवं द्वितीयावरणं शृणु॥ 18
द्वितीयावरणञ्चैव द्वादशान् कलशान्न्यसेत्।
तृतीयावरणे चैव अष्टाविंशति विन्यसेत्॥ 19
चतुर्थावरणे चैव षट्सप्तति च विन्यसेत्।
पञ्चमावरणे चैव चत्वारिंशाधिकमेव च॥ 20
अशीति कलशञ्चैव विन्यसेद्देशिकोत्तमः।
षष्ठावरणे चैव नवति द्व्याधिकन्तथा॥ 21

In Public domain. Digitization Muthulakshmi Research Academy

प. 78.

सप्तमावरणे चैव शातकुम्भांश्च विन्यसेत्।
अष्टोत्तरशतं चैव अष्टमावरणे न्यसेत्॥ 22
कूर्चान् कलशसंयुक्तान् शुद्धोदकेन पूरितान्।
शाल्योपरि न्यसेत् कुम्भान् हृदयेन तु मन्त्रतः॥ 23
उत्कूर्चं पौष्टिकञ्चाहु रधः कूर्चन्तु शान्तिकम्।
अतः कूर्चन्तु सर्वेषामाभिचारकमुच्यते॥ 24
एलालवङ्ग तत्कोलन्नीबु जातिफलैर्युतम्।
उशीरञ्चन्दनञ्चैव प्रथमावरणे न्यसेत्॥ 25
गोमूत्रं गोमयञ्चैव दधिक्षीरघृतन्तथा।
रोचनञ्चर्करञ्चैव मधुना च समन्वितम्॥ 26

In Public domain. Digitization Muthulakshmi Research Academy

प. 78

सर्षपमुद्गमाषञ्च प्रियङ्गुञ्च समन्वितम् ।

P.213 द्वितीयावरणे न्यस्य देवतानां शृणुष्वथ ॥ 27

अजः कापालि बुद्धश्च वज्रदेहः प्रमर्दनः ।

विभूतिरव्ययः शास्ता पिनाकी त्रिदशाधिपः ॥ 28

अग्निरुद्रो हुताशश्च द्वितीयावरणे न्यसेत् ॥

कर्पूरं हरिबेरञ्च तृणकच्चोलजम्बुकम् ॥ 29

तृतीयावरणे न्यस्य देवदातानां शृणुष्वथ ॥

ज्वलनो दहनो बभ्रुर्भस्मान्तकक्षयान्तकः ॥ 30

आग्नेयादिषु कोणेषु क्रमाद्विन्यस्य देवताः ॥

दाता पूर्वा च तक्कोलं पुन्नागञ्जातिपाटली ॥ 31

In Public domain. Digitization Muthulakshmi Research Academy

प.78

चतुर्थावरणे न्यस्य देवतानां शृणुध्वथ ।
कालरुद्राश्च विख्यात धर्माधर्मपरिस्तथा ।। 32
संयोक्ता च समायुक्तं पञ्चमावरण न्यसेत् ।
पञ्चासनन्तु संकल्प्य स्नापयेच्छिवकुम्भकम् ।। 33
व्योमव्यापिं जपेत्तत्र ब्रह्माङ्गैस्समन्वितम् ।
वर्धन्यां गौरीबीजो विन्यसेत् पीठके ततः ।। 34
यथास्थापितमार्गेण स्नापयेत् कलशान्ततः ।
पञ्चवर्णहविर्दद्यात्ताम्बूलन्दापयेत्ततः ।। 35
आचार्यदक्षिणां दद्यात् पञ्चाङ्गभूषणैस्सह ।
स्नपनोपकरणं सर्वमाचार्याय प्रदापयेत् ।। 36
एवं यः कुरुते मर्त्यश्शिवलोकमवाप्नुयात् ।
पञ्चशत स्नपनं प्रोक्तं पञ्चाशत् द्विशतं शृणु ।। 37

इति वीरतन्त्रे पञ्चशतस्नपनविधि
(अष्ट)?
षट् सप्तति पटलः ।।

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 79

॥ पञ्चाशाद्द्विशतस्नपनविधिपटलः ॥

पञ्चाशात् दधिकञ्चैव शतद्वयेन संयुतम् ।
स्नपनं कीदृशन्देव तत्सर्वं ब्रूहि मे प्रभो ॥ 1
तत्सर्वमखिलं वक्ष्ये श्रृणुष्व चतुरानन ।
प्रासादस्याग्रतश्चैव मण्डपं चतुरश्रकम् ॥ 2
सर्वालङ्कारसंयुक्तं स्नानपादन्तु कारयेत् ।
द्वाविंशतिञ्च सूत्राणि पूर्वाभिमुखमेव च ॥ 3
उत्तराभिमुखन्तद्वत्तालमात्रेण चान्तरम् ।
नवपादेषु पद्मं स्यात् दष्टपत्रं सकर्णिकम् ॥ 4
पद्मबाह्ये तु परितः पदत्रयं ह्रासयेत्ततः ।
तत् बाह्ये वरणान् बाह्ये पदद्वयञ्च ह्रासयेत् ॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 79

द्वारार्थन्तु चतुर्दिक्षु पदमेकन्तु ह्रासयेत्।
शतद्वयञ्च पञ्चाशत् पदान्यत्र स्थितानि तु॥ 6
P. 214 शालिना विकिरेन्तत्र तण्डुलञ्च तिलैस्तथा।
दर्भैः परिस्तरेत्तत्र गन्धपुष्पादिनार्चयेत्॥ 7
कलशात् गृह्य यत्नेन सूत्रेणैव समान्वितम्।
त्रिगुणीकृतसूत्रेण वेष्टयेत् कुञ्जराक्षवत्॥ 8
पूर्वेद्युरधिवासँ स्यात् प्रासादेन तु मन्त्रतः।
जलभाण्डं समादाय सेचयेत्तु(?) दुदकं हृदा॥ 9
गन्धद्रव्यसमायुक्तं वस्त्रपूतेन वारिणा।
एलालवंक तत् कोलमुशीरञ्चन्दनैर्युतम्॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प. 79

पञ्चद्रव्येण संयुक्तं गन्धद्रव्यविमिश्रितम् ।

विन्यसेच्छिवकुम्भन्तु व्योमव्यापि समुच्चरन् ॥ 11

वर्धनीं तस्य वामे तु गौरीबीजेन विन्यसेत् ।

अभितः कलशानष्टौ विद्येश्वरसमन्वितम् ॥ 12

वस्त्रयुग्मेन संवेष्ट्य विणीकां दीस्तु वेष्टयेत् ।

वज्रं मरकतं चैव वैडूर्यञ्च प्रवालकम् ॥ 13

पुष्यरागञ्च गोमेदमिन्द्रनीलञ्च मौक्तिकम् ।

विन्यसेच्छिवकुम्भे तु वर्धन्यां पञ्चरत्नकम् ॥ 14

विद्येशकलशे विप्र स्वर्णकन्तत्र निक्षिपेत् ।

बाह्ये वरणकन्तत्र षट्त्रिंशकलशान्यसेत् ॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

प. 79

सिद्धार्थन्तिलमुद्गञ्च शिम्बञ्चैव तु विन्यसेत् ।
कपालीशो वज्रपाणिः पिनाकी त्रिदशाधिपः ॥ 17
एतेऽधिदेवताः प्रोक्ता द्वितीयावरणे न्यसेत् ।
तृतीयावरणे चैव कलशान् बहि विन्यसेत् ॥ 18
एलालवंकजाती च तक्कोलञ्चैव विन्यसेत् ।
पनसं कदली चैव मातुलुङ्गफलानि च ॥ 19
नारङ्गस्य द्वयञ्चैव विन्यसेत्तु फलोदकम् ।
याम्यमृत्युहरञ्चैव धाता धर्मपतिस्तथा ॥ 20
एतेऽपि देवताः प्रोक्ता चतुर्थावरणा न्यसेत् ।
पञ्चमावरणे चैव षट्सप्तति न्यसेत्ततः ॥ 21

In Public domain. Digitization Muthulakshmi Research Academy

प.७१

मुरं माञ्जीवकुम्भञ्च तिंबूचैव तु विन्यसेत्।

कालरुद्रो हुताशश्च ज्वलनो दहनस्तथा॥ 22

एतेऽपि देवताः प्रोक्ताः पञ्चमावरणे न्यसेत्।

द्रव्यञ्च देवतायुक्तं कोणे कोणे च विन्यसेत्॥ 23

ततो होमं प्रकर्तव्यं चतुर्दिक्ष्वष्ट दिक्षु वा।

हृदा च समिधा हुत्वा घृतन्तु शिरसा तथा॥ 24

शिखया च चरूं हुत्वा लाजान् कवचमन्त्रतः।

P.215. सर्षपं नेत्रमन्त्रेण - - - - - चैव हि॥ 25

प्रशान्तमनसो भूत्वा प्रत्येकन्तु शताहुतिः।

सर्वद्रव्यसमायुक्तं हव्यवाहं समुच्चरन्॥ 26

In Public domain. Digitization Muthulakshmi Research Academy

प. 79

स्विष्टमग्नेतिमन्त्रेण जुहुयात्तदनन्तरे।

दिशास्वध्ययनं कुर्यात् स्तोत्रमन्त्रं जपेत्ततः॥27

आचार्यदक्षिणां दद्यात् पदार्थान् पूजयेत्ततः।

स्नापयेच्छिवकुम्भन्तु प्रासादेन तु मन्त्रतः॥28

प्रथमावरणे स्नात्वा द्वितीयावरणं पुनः।

तृतीयावरणं पश्चाच्चतुर्थावरणं पुनः॥ 29

पञ्चमावरणं पश्चात् पञ्चब्रह्मषडङ्गकैः।

पञ्चवर्णं हविर्दद्यात् ताम्बूलं दापयेत्ततः॥ 30

एवं यः कुरुते मर्त्यश्शिवलोकमवाप्नुयात्।

पञ्चाशत् द्विशतं प्रोक्तमुत्तमत्रयमुच्य--॥ 31

मध्यमत्रयके विप्र अष्टोत्तरशतं शृणु।

इतिवीरतन्त्रे पञ्चाशत् द्विशतस्नपन-
[एकोनाशीति पटलः]?
विधि सप्तसप्तति पटलः॥

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 40

॥ अथ अष्टोत्तरशतस्नपनविधिपटलः ॥

मध्यमस्योत्तमन्देव स्नपनं कीदृशं प्रभो ।
तत्सर्वं समासेन अष्टोत्तरशतन्तु य ॥ १ ॥ 1
तत्सर्वमखिलं वक्ष्ये शृणुष्व चतुरानन ।
प्रासादस्याग्रतः कुर्यान्मण्डपं चतुरश्रकम् ॥ २ ॥ 2
पूर्वोक्तमण्डपे रम्ये वितानोपरि शोभितम् ।
चतुस्तोरणसंयुक्तं दर्भमालाभिरावृतम् ॥ ३ ॥ 3
अष्टदिक्षु ध्वजान्न्यस्य पुष्पमालावलम्बितम् ।
स्तम्भानि वेष्टयेत्तत्र गोमयेनानुलेपयेत् ॥ ४ ॥ 4
सूत्रपादं प्रकर्तव्यन्तालमात्रेण चान्तरम् ।
द्विविधं सूत्रपादन्तु शान्तिकं पौष्टिकन्तथा ॥ ५ ॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. ४०

चतुर्दशानि सूत्राणि पूर्वाग्रञ्चैव विन्यसेत्।

उत्तराग्रं तथैव स्यात् सूत्रस्येतानि निर्दिशेत्॥ 6

मध्ये नवपदं स्थित्वा परिच्छेदु पद् न्यसेत्।

चतुर्दिक्षु च विप्रेन्द्र द्वारार्थन्तु पदन्ततः॥ 7

तत् बाह्यावरणान् बाह्ये परितो वीथिरुच्यते।

तस्य बाह्ये तु परितः पदद्वयस्थिलानितु॥ 8

ऽावमेव क्रमेणैव शान्तिकं प्रविधीयते।

इदमन्यत् प्रवक्ष्यामि चक्रस्थापनमुच्यते॥ 9

P. 216. पूर्वाग्रे चैव विप्रेन्द्र युग्मसूत्र् प्रदापयेत्।

उत्तराग्रन्तथैव स्यात्तालमात्रेण चान्तरम्॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प.४०

तालत्रयप्रमाणेन भ्रामयेत् पूर्णचन्द्रवत् ।
तासां पूर्वा दिशो विप्र तालमात्रेण चान्तरम् ॥ 11
अष्टवृत्तन्ततो भ्राम्य वीथि चत्वार एव च ।
चतुर्भिः कलशो न्यस्य पौष्टिकण्डिह चोच्यते ॥ 12
द्वारार्थन्तु चतुर्दिक्षु ह्रासयेत्तु विशेषतः ।
शालिना विकिरेत्तत्र आढकं कलशान् प्रति ॥ 13
शाल्यर्धं तण्डुलान् न्यस्य तण्डुलार्धं तिलान्न्यसेत् ।
परिस्तरेत्तु दर्भाभिः पुण्याहं वाचयेत्ततः ॥ 14
कलशा ग्राहयेत्तत्र शुद्धदेशे मृदन्ततः ।
अस्त्रमन्त्रेण कृत्वा तु वामेन शोषणं भवेत् ॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

प.४०

ईशानेन दहेद्विद्वान् सर्वलक्षणसंयुतम्।
आढकेन तु संपूर्णा नाडमन्तु विधीयते॥ 16
मध्यमं शिवसंपूर्णमुत्तमं त्रोणपूरितम्।
भिन्नं काळञ्च सुषिरं भेदश्छेदञ्च वर्जयेत्॥ 17
सूत्रेण वेष्टयेत् कुम्भान् कुञ्जरस्याक्षवत् भवेत्।
शरावञ्चैव विप्रेन्द्र सूत्रेण वेष्टयेत्ततः॥ 18
क्षाळयेदुदकेनैव दर्भस्योपरि विन्यसेत्।
प्रधानकलशं विप्र शुद्धोदकेन पूरयेत्॥ 19
पञ्चरत्नं क्षिपेत्तत्र वस्त्रयुग्मेन वेष्टयेत्।
कलशस्य मुखे रुद्रो विष्णोर्मध्यमके न्यसेत्॥ 20

In Public domain. Digitization Muthulakshmi Research Academy

प.४०

पृष्ठे प्रजापति रव्यातो तीर्थानि कुक्षिरुच्यते।

मध्यमे शिवकुम्भन्तु प्रासादेन तु विन्यसेत्॥ २१

वर्धनीन्तस्य वामे तु गौरीबीजेन विन्यसेत्।

शिवकुम्भे शिवं पूज्य वर्धन्यां कुम्भमेव च॥ २२

गन्धपुष्पादिनाभ्यर्च्य विद्येशकलशान् न्यसेत्।

८ पूर्वादीशानपर्यन्त मष्टकुम्भांश्च विन्यसेत्॥ २३

सवस्त्रां साहिरण्यांश्च सकूर्चान् वारिपूरितान्।

प्रथमावरणं ह्येतत् द्वितीयावरणं शृणु॥ २४

१२ द्वादशान् कलशान् न्यस्य द्रव्याणाञ्च शृणुष्वथ।

पाद्यमाचमनञ्चार्घ्यं गोमूत्रं गोमयं पयः॥ २५

In Public domain. Digitization Muthulakshmi Research Academy

पृ.80.

दध्याज्यमष्टमं प्रोक्तं द्वितीयावरणे न्यसेत्।

तृतीयावरणे चैव चतुर्विंशत् कला न्यसेत्॥ 26

चन्दनं कुङ्कुमं कुष्टं लघु मांस्य मुरं गुळम्।

P.217 लाजा चूर्ण शमी चैव नीवारन्नाळिकेरकम्॥ 27

मधुरिक्षुरसं बिल्वं मफलं कुशयन्तिलम्।

20 कर्पूरं हरिबेरञ्च विंशति कलशान्न्यसेत्॥ 28

अजः कपाली बुद्धिश्च यज्ञदेहः प्रमर्दनः।

विभूतिरव्ययश्शास्ता पिनाकी त्रिदशाधिपः॥ 29

अग्निरुद्रो हुताशश्च पिङ्गलः खातको हरः।

ज्वलनो दहनो बभ्रुर्भस्मान्तक क्षयान्तकम्॥ 30

In Public domain. Digitization Muthulakshmi Research Academy

प.80

ऽातेऽपि देवता प्रोक्ता कलशेषूदके न्यसेत् ।

तृतीयावरणं प्रोक्तं चतुर्थावरणं शृणु ॥ 31

24 चतुश्चत्वारिकलशाश्चतुर्थावरणे न्यसेत् ।

लोहं प्रियङ्गुपुष्पञ्च लवंकं फलमल्लिका ॥ 32

दान्ता दूर्वा चतुष्कोलं पुन्नागजोनि पाटली ।

पर्णका शतपत्री च नैल कस्तूरि लोचना ॥ 33

ज्या?
प्याज्म न्नरवी शका वैरी मञ्जष्ठी नागकेसरम् ।

नवनीतन्द्राविकं सा गण्डुपत्रञ्च धातकी ॥ 34

भीताच सहदेवीच विष्णुक्रान्ती सवर्चला ।

ह्रीव शङ्खपुष्पीच लक्ष्मीस्थलारविन्दकम् ॥ 35

In Public domain. Digitization Muthulakshmi Research Academy

प. ४०

बल्लभद्री महाभद्री अपामार्गेन्द्रवल्लिका ।

रुद्रपर्णी महालक्ष्मी धूर्द्धुरेण समन्वितम् ॥ 36

चतुर्थावरणे चैव विन्यसेद्देशिकोत्तमः ।

याम्यो मृत्युहरो धाता विधाता कर्त्तृरेवच ॥ 37

कालिरुद्रश्च विख्यातो धर्माधर्मपतिस्तथा ॥

संयोक्ताच वियोक्ताच नैरृति मारणेस्तथा ॥ 38

हन्ताच क्रूरदृष्टींचं मौर्द्धशैथो महाभुजः ॥

विरूपाक्षे धूम्रकर्णो लोहितो दंष्ट्रबाहुलः ॥ 39

अतिज्वलः पाशहस्तो महाबलएवच ॥

जयभद्रो महाबाहु बाला ----- बामुखः ॥ 40

In Public domain. Digitization Muthulakshmi Research Academy

प. 80

बिभीषणो महावेगो लघुवेगस्तथैव च।
सूक्ष्मस्तीक्ष्णक्षयान्तश्च पञ्चान्तः पञ्चशेखरः॥ 41
कपर्दी मेघवाहश्च जटामकुटधारकः।
नानारूपधराश्चैव निधीशो रूपवांस्तथा॥ 42
धनुश्चैव तु विप्रेन्द्र कलशेषु दकेन्यसेत्।
शिवस्य वर्धनींचैव पूर्वाभिमुखमेव च॥ 43
इतरेषान्तु देवानां शिवाभिमुखमेव च।
एवं श्चान्तिकमुद्दिष्टं पौष्टिकं च ततः शृणु॥ 44
P.218. प्रथमावरणे चाष्टौ द्वितीये द्वादशान्यसेत्।
तृतीये विंशतिश्चैव कलशान्यस्य देशिकः॥ 45

0
28
40
108

In Public domain. Digitization Muthulakshmi Research Academy

प. ४०

28 अष्टाविंशातिसंख्याश्च चतुर्थावरणे न्यसेत्।
चतुर्विंशत्कलाश्चैव पञ्चमावरणे न्यसेत्॥ 46
पूर्वोक्तेन तु मार्गेण यथाक्रमेण विन्यसेत्।
देवतानाञ्च विप्रेन्द्र चत्वारिंशत् घटा न्यसेत्॥ 47
विन्यसेच्चैव विप्रेन्द्र पञ्चमावरणे बुधः।
ततो होमं प्रकर्तव्यं चतुर्दिक्षु पलाशके॥ 48
समिधाज्यचरूश्चैव सर्षपश्चैव हूयते।
सद्यादीशानपर्यन्तं क्रमाद्धुत्वा शिवव्रतैः॥ 49
व्योमव्यापि समुच्चार्य प्रत्येकं पञ्चविंशति।
प्रासादेन तु मन्त्रेण पञ्चाशद्धूयते क्रमात्॥ 50

In Public domain. Digitization Muthulakshmi Research Academy

प.40

चित्तादिभिर्जयादिभिर्हूयते क्रमशास्ततः।

हुत्वान्ते तु यदस्येति जुहुयात्तदनन्तरे॥ 51

ऽकैकान् कलशान् वस्त्र युग्मेन वेष्टयेत्।

आचार्यं दक्षिणां दद्यात् पदार्थान् पूजयेत्ततः॥ 52

गर्भगेहमनुप्राप्य निर्माल्यञ्च विसर्जयेत्।

पश्चात् पञ्चासनं कल्प्य सृष्टिन्यासं प्रकल्पयेत्॥ 53

उत्थाप्य शिवकुम्भन्तु स्नापयेल्लिङ्गमूर्धनि।

वर्धनीं तस्य वामे तु स्नापयेत् गौरिमन्त्रतः॥ 54

व्योमव्यापिं जपेत्तत्र शिवकुम्भन्तु स्थापयेत्।

पञ्चब्रह्म षडङ्गेन स्नापयेत् कलसन्ततः॥ 55

In Public domain. Digitization Muthulakshmi Research Academy

प. ८०

प्रथमावरणं स्नाप्य द्वितीयञ्च तृतीयकम् ।

चतुर्थं पञ्चमं स्नात्वा एवं क्रमेण तु ॥ 56

पञ्चवर्णं हविर्दद्यात्ताम्बूलन्तु निवेदयेत् ।

एवं यः कुरुते मर्त्यः शिवलोकमवाप्नुयात् ॥ 57

मध्यमोत्तमदेवन्तु एकाशीतिं शृणुष्वथ ।

इति वीरतन्त्रे बदृसहस्रसंहितायाँ

अष्टोत्तरशतस्नपनविधि

[अशीति] ?

अष्टसप्तति पटलः ॥

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 81

॥ अथ एकाशीति स्नपनविधिपटलः ॥

लोकनाथं नमस्कृत्वा परिपृच्छन् पितामहः।
एकाशीति कथं देव तत्सर्वं ब्रूहि मे प्रभो ॥ 1
साधु साधु महाप्राज्ञ यत्त्वया परिचोदितम्।
तत्सर्वमखिलं वक्ष्ये शृणुष्व चतुरानन ॥ 2
प्रासादस्याग्रतः कुर्यात् मण्डपं चतुरश्रकम्।
P. 219. पूर्वोक्तेनैव मार्गेण कर्तव्यं देशिकोत्तमः ॥ 3
कलशान् ग्राह्य यत्नेन सूत्रेणैव तु वेष्टयेत्।
शुद्धोदकेन संपूर्य शरावेण विधायच ॥ 4
शालिना विकिरेत्तत्र प्रत्येकंमाढकैर्युतम्।
शाल्यर्धं तण्डुलान् न्यस्य तण्डुलार्धं तिलान्यसेत् ॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 81

परिस्तरेत्तु दर्भाभिः स्थापयेच्छिवकुम्भकम् ।
प्रासादेन तु मन्त्रेण गौरीबीजेन वर्धनीम् ॥ 6
? स॰॰ रत्नञ्च कूर्चेनैव समन्वितम् ।
विन्यसेत्तत्रैव विप्रेन्द्र अभितः कलशैर्युतम् ॥ 7
विद्येश्वरसमायुक्तं सवस्त्रञ्च हिरण्यकम् ।
अधमञ्चाष्टहस्तं स्यात् मध्यमं नवहस्तकम् ॥ 8
उत्तमं दशहस्तञ्च चतुस्तालन्तु विस्मृतम् ।
पुराणं पुत्रनाशं स्यात् केशान्वितन्धनक्षयम् ॥ 9
श्वेतं वा रक्तपीतं वा संमिश्रन्तु न कारयेत् ।
पूर्वे तु नवकुम्भन्तु आग्नेय्यान्नवकुम्भकम् ॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प. 81

याम्ये तु नवकञ्चैव नैर्ऋत्यान्नवकं न्यसेत्।
वारुण्यां नवकं विद्वान् वायव्यान्नवकं न्यसेत्॥ 11
सोमे तु नवकं न्यस्य ईशान्यां नवकं न्यसेत्।
सवस्त्रान् सापिधानाञ्च सकूर्चान्वारिपूरितान्॥ 12
विन्यसेद्धृदयेनैव शाल्योपरि विशेषतः।
लोहं प्रियङ्गुपुष्पञ्च लवङ्गं फलमल्लिका॥ 13
दान्ता दूर्वा च तक्कोलं पुन्नागञ्जातिपाटली।
पर्णिका शतपत्रञ्च तैलं कस्तूरि लोचना॥ 14
व्याघ्रनाखी शकावेरी मञ्जिष्ठा नागकेसरम्।
रजनी भद्रकाष्ठञ्च सरलं कृष्णमालिका॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

प. 81

भीता च सहदेवी च विष्णुक्रान्ती सुवर्चला।
सिंही च शङ्खपुष्पी च लक्ष्मी स्थलारविन्दकम्॥ 16
बलभद्री महाभद्री अपमार्गेन्द्रवल्लिका।
रुद्रपर्णी महालक्ष्मी धूर्धुरेण समन्वितम्॥ 17
एतेषां द्रव्यसंयुक्तं कलशेषु च विन्यसेत्।
नद्यास्तीरे च कोष्ठे च वल्मीके वृषशृङ्गके॥ 18
वराहगजदन्ते च पद्ममूले मृदा ग्रहेत्।
विद्येशकुम्भे निक्षिप्य पञ्चगव्येन संयुतम्॥ 19
पूर्वायान्नवके विप्र त्वमेव स्थापयेत् क्रमात्।
वारुण्यान्नवके चैव वासं विन्यसेत् क्रमात्॥ 20

In Public domain. Digitization Muthulakshmi Research Academy

प. 81

P. 220. वायव्यां नवके चैव क्रमा र विप्र विन्यसेत्।
सौम्यायां विष्णुमावाह्य ..... चण्डीशगोचरे॥ 21
गन्धपुष्पादिना पूज्य ततो हेमञ्चतुर्दिशि।
समिधाज्यचरून् लाजान् सर्षपेन समन्वितम्॥ 22
सद्यादीशानपर्यन्तं अष्टोत्तरशतं पृथक्।
व्योमव्यापि जपित्वा तु आज्येना पञ्चविंशति॥ 23
हुत्वान्तेति यदस्येति जुहुयात्तदनन्तरे।
स्नापयेच्छिवकुम्भन्तु व्योमव्यापिं समुच्चरन्॥ 24
गौरीबीजेन वर्धन्यां स्नापयेद्देशिकोत्तमः।
पञ्चब्रह्मषडङ्गेन स्नापयेत् कलशान् बुधः॥ 25

In Public domain. Digitization Muthulakshmi Research Academy

प.81

पञ्चवर्णहविं दद्यात् ताम्बूलं दापयेत्ततः।
आचार्यदक्षिणान्दद्यात् पदार्थान् पूजयेत्ततः॥ 26
एवं यः कुरुते मर्त्य शिवलोकमवाप्नुयात्।
? एकाशीति मया प्रोक्तामेकोनपञ्चाशत् शृणुष्वथ॥ 27

इति वीरतन्त्रे षट्—यां
(एकाशीति)?
एकाशीति स्नपन विधि एकोनशीति पटलः॥

In Public domain. Digitization Muthulakshmi Research Academy

पटलः ४२

॥ एकोनपञ्चाशत् स्नपनविधिपटलः॥

प्रणम्य शिरसा देवं ब्रह्मा पृच्छति शंकरम्।
एकोनपञ्चाशत् कोवा तत्सर्वं ब्रूहि मे प्रभो॥ 1
तत्सर्वमखिलं वक्ष्ये श्रूयतां चतुराननः।
प्रासादस्याग्रतः कुर्यात् मण्डपं चतुरश्रकम्॥ 2
चतुस्तोरणसंयुक्तश्चतुर्द्वार विभूषितम्।
दर्भमालाभिरावेष्ट्य विमानोपरि शोभितम्॥ 3
दिग्ध्वजैश्च समायुक्तं मुक्तादामैरलंकृतम्।
गोमयाल्लेपनं कृत्वा सूत्र पातन्तु कारयेत्॥ 4
प्रागग्रं दशसूत्राणि उदगग्रन्तथैव च।
मध्ये नवपदं स्थित्वा तद्बाह्येकन्तु वीथिका॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 82

अष्टद्वारसमायुक्तं कर्तव्यं लक्षणान्वितम् ।
शालिना स्थण्डिलं कृत्वा पूर्वोक्तेन विधानतः ॥ 6
शाल्यर्धन्तण्डुलान्न्यस्य तण्डुलार्धन्तिलन्तथा ।
मध्यमेऽष्टपदं कृत्वा गन्धपुष्पादिनार्चयेत् ॥ 7
शिवकुम्भं न्यसेन्मध्ये पञ्चरत्नसमन्वितम् ।
वस्त्रद्वयसमायुक्तं सकूर्चं सापिधानकम् ॥ 8
दिक्षु षट्कलशान्न्यस्य चत्वारिंश्च विदिक्षु वै ।
कलसान्विन्यसेत्तत्र सवस्त्रं सापिधानकम् ॥ 9

P. 221 गोमूत्रं गोमयं सर्पि दधि क्षीरन्तथैव च ।
चन्दनं कुङ्कुमं चैव मेव माञ्जी मुरंगडकम् ॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प. 82

लाजं वै रिभिबेरञ्च तृणकञ्चोल्लजम्बुकम् ।
शतपुष्पं तथा ग्रन्थि धात्री पूर्वा (न्नू) हरीतकी ॥ 11
हिता च सहदेवी च मातुलङ्गा च डाडिमी ।
सिंही च शङ्खपुष्पञ्च लक्ष्मी स्थलाविरन्दकम् ॥ 12
बलभद्री महाभाद्री अपामार्गेण वाल्लिका ।
क्षुद्रपत्नी महालक्ष्मी धूर्धूरमर्चकंबकम् ॥ 13
सकृष्णात्र संयुक्तं तस्य पूर्णेषु संयुतम् ।
हंसपुष्पा गन्धपुष्पा महाद्रोणी समन्वितम् ॥ 14
कलशेषु न्यसेद्विद्वान् मुद्गमाषञ्च सर्षपम् ।
अजः कपाली बुद्धञ्च वज्रदेह प्रमर्दनः ॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

प.४२

विभूती रव्ययश्शास्ता पिनाकी त्रिदशाधिपः।
अग्निरुद्रो हुताशी च पिङ्गलं वादको हरः॥ 16
ज्वलनो दहनो भद्र भस्मान्तं क्षयान्तकम्।
याम्ये मृत्युहरो दाता ‥ कर्णिकारिका॥ 17
कालरुद्रश्च विख्यातो धर्माधर्मपतिस्तथा।
संयोक्ता च वियोक्ता च नियोक्ता च प्रकीर्तिताः॥ 18
अग्रगण्डस्सदाचार सर्वशम्भु महेश्वरः।
कालरुद्रश्च विख्यातो धाता धर्मपतिस्तथा॥ 19
हन्ता च क्रूरदृष्टी च ऊर्ध्वकेशा महाभुजः।
विरूपाक्षो धूम्रवर्णो लोहितो दंष्ट्रवा ‥‥ः॥ 20

In Public domain. Digitization Muthulakshmi Research Academy

प. 82

पाशहस्तो महाबोधः कालकण्ठश्चतुर्भुजः।
भूतपालो लोकपालः क्षेत्रपालस्तथैव च॥ 21
सुखदुःखकरश्चैव ------- भुविस्तथा।
एतेऽपि देवताः प्रोक्ता कलशेषु दर्वद्रके न्यसेत्॥ 22
ततो होमं प्रकर्तव्य चतुर्दिक्ष्वष्टदिक्षु वा।
ऐशान्यां एकहोमं वा पलाश सह ----॥ 23
समिदाज्यचरुं लाजान् सर्षपांश्च यवास्तिलान्।
शालिनीवार गोधूम मुद्गैनैव समन्वितम्॥ 24
पञ्च ब्रह्मषडङ्गेन हुत्वा तु क्रमशो बुधः।
हुत्वान्ते तु यदस्यैति पूर्णाहुतिमथाचरेत्॥ 25

In Public domain. Digitization Muthulakshmi Research Academy

पृ. 82

व्योमव्यापिं जपित्वा तु स्नापयेच्छिवकुम्भकम् ।

गौरीबीजेन वर्धन्यां स्नापयेत् पीठकोपरि ॥ 26

पञ्चब्रह्म षडङ्गेन स्नापयेत् सर्वकुम्भकम् ।

P. 222 हविर्निवेदयेत् पश्चात् ताम्बूलं दापयेत्ततः ॥ 27

एवं यः कुरुते मर्त्य शिवलोके महीयते ।

प्रोक्तमेकोनपञ्चाशत् शृणुष्व पञ्चविंशतिः ॥ 28

इति वीरतन्त्रे एकोनपञ्चाशत्-
[द्व्यशीतिपटलः]?
स्नपनविधि अशीतिपटलः ॥

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 83

॥ पञ्चविंशतिस्नपनविधिपटलः॥

देवदेवं प्रणम्यादौ परिपृच्छत् पितामहः।
स्नपनं पञ्चविंशच्च ब्रूहि मे परमेश्वर ॥ 1
तत्सर्वमखिलं वक्ष्ये शृणुष्व कमलासन।
प्रासादस्याग्रतः कुर्यात् मण्डपं चतुरश्रकम् ॥ 2
चतुस्तोरणसंयुक्तं दर्भमालाविभूषितम्।
वितानोपरि सञ्छन्न दिक्ध्वजैश्च प्रलम्बितम् ॥ 3
सर्वालंकारसंयुक्तं मण्डपं कारयेत्ततः।
गोमयालेपनं कृत्वा सूत्रपादन्तु कारयेत् ॥ 4
प्रागग्रादिक सूत्रं स्या उदगग्रन्तथैव च।
मध्ये नवपदं स्थित्वा ततो बाह्येकपलन्त्यजेत् ॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 83

अष्टव्रीहिसमायुक्तं शालिना विकिरेत्ततः।
आढकं वा तदर्धं वा प्रस्थं वा शालि विन्यसेत्॥ 6
कलशान् प्रति विप्रेन्द्र तस्योर्ध्वे तण्डुलं न्यसेत्।
तण्डुलार्धन्तिलं न्यस्य दर्भैश्चैव परिस्तरेत्॥ 7
शिवकुम्भं न्यसेन्मध्ये वस्त्रयुग्मेन वेष्टयेत्।
पञ्चरत्नसमायुक्तं सकूर्चं सापिधानकम्॥ 8
गौरीबीजेन वर्धन्या सवस्त्रं सहिरण्यकम्।
पूर्वादीशानपर्यन्तं अष्टकुम्भांश्च विन्यसेत्॥ 9
स्वर्णं तत्र निक्षिप्य विद्येश्वरसमन्वितान्।
पञ्चगव्यसमायुक्तं सवस्त्रं सापिधानकम्॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प. ४३

चतुर्दिक्षु च विप्रेन्द्र द्वादशान् कलशान् न्यसेत्।
आग्नेयादिषु कोणेषु चत्वारः कुम्भमुच्यते ॥११
चन्दनं कुङ्कुमञ्चैव उशीरं मुद्गमेवच।
एलालवङ्ग तक्कोलन्तिम्बु जातिफलं गुडम् ॥१२
लघुमाषञ्चिरञ्चैव कुष्ठं कुङ्कुममेवच।
द्राक्षा दूर्वा च तक्कोलं पुन्नाग जातिपाटली ॥१३
लोध्रञ्चैव प्रियङ्गुञ्च नालिकेरसमन्वितम्।
यथाक्रमेण विन्यस्य पूर्वादीशानमन्तकम् ॥१४
अजः कपाली बुद्धिश्च वज्रदेह प्रमर्दनः।
P.223 विभूतिरव्ययः शास्ता पिनाकी त्रिदशाधिपः ॥१५
अग्निरुद्रो हुताशश्च पिङ्गलः खादको हरः।
ज्वलनो दहनो बभ्रुर्भस्मान्तक क्षयान्तकः ॥१६

In Public domain. Digitization Muthulakshmi Research Academy

प. 83

याम्ये मृत्युर्हरे धाता विधाता कर्तृकारका।
कालरुद्रश्च विप्रेन्द्र कलशस्याधिदेवताः॥ 17
गन्धपुष्पादिनाभ्यर्च्य स्वस्वनामेन मन्त्रतः।
ततो होमं प्रकर्तव्यं पलाशसमिधा सह॥ 18
स्थण्डिलं कारयेत्तत्र लक्षणेन समन्वितम्।
समिधाज्यचरून् लाजान् सर्षपांश्च यवांस्तिलान्॥ 19
शालिनीवारगोधूम यववेणु समन्वितम्।
पञ्चब्रह्म षडङ्गेन यथाक्रमेण हूयते॥ 20
हुत्वान्ते तु यदस्येति पूर्णाहुतिमथाचरेत्।
आचार्यदक्षिणान्दद्याद्वस्त्र हेमाङ्गुलीकैः॥ 21

In Public domain. Digitization Muthulakshmi Research Academy

प. ८३

प्रासादेन तु मन्त्रेण स्नापयेच्छिवकुम्भकम्।
गौरीबीजेन वर्धन्यां स्नापयेत्तु विशेषतः॥22
व्योमव्यापिं समुच्चार्य स्नापयेत् कलशान्ततः।
पञ्चवर्णहविर्दद्यात्ताम्बूलन्दापयेत्ततः॥ 23
एवं यः कुरुते मर्त्यश्शिवलोकमवाप्नुयात्।
पञ्चविंशतिरेवोक्त षोडशञ्च शृणुष्वथ॥ 24

इति वीरतन्त्रे पञ्चविंशतिस्नपन-
[त्र्यशीति पटलः]?
विधेः एकाशीति पटलः॥

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 84

।। अथ षोडश कलशस्नपनविधिपटलः ।।

प्रणम्य भगवन्तं हि परिपृच्छत् पितामहः ।
कलशान् षोडशं किं वा ब्रूहि मे परमेश्वर ।। 1
तत्सर्वमखिलं वक्ष्ये शृणुष्व चतुरानन ।
प्रासादस्याग्रतः कुर्या मण्डपञ्चतुरश्रकम् ।। 2
दर्भमालादुरावेष्ट्य चतुस्तोरण भूषितम् ।
वितानेनोर्ध्वमाच्छाद्य दिग्ध्वजैश्च प्रलम्बितम् ।। 3
वस्त्रैरावेष्टये द्विद्वान् मुक्तादामैरलंकृतम् ।
सर्वालंकारसंयुक्तं सूत्रपादन्तु कारयेत् ।। 4
प्रागग्रामष्टसूत्रं स्यादुदगग्रन्तथैव च ।
मध्ये नवपदं ।स्थित्वा तस्यावृतपतन्त्यजेत् ।। 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 84

अष्टवीथीसमायुक्तन्तत् बाह्येक पद स्थितम् ।
शालिना विकिरेत्तत्र पूर्वोक्तविधिना सह ॥ 6
शाल्यर्धं तण्डुलं न्यस्य तण्डुलार्धं तु तिलान्यसेत् ।
परिस्तरेत्तु दर्भाभि गन्धपुष्पादिनार्चयेत् ॥ 7
P.224 मध्यमे शिवकुम्भन्तु प्रासादेन तु विन्यसेत् ।
गौरीबीजेन वर्धन्यां स्नापयेद्देशिकोत्तमः ॥ 8
त्रयाणां कलशानान्तु चतुर्दिक्षु च विन्यसेत् ।
आग्नेयादिकोणेषु चत्वारः कलशा न्यसेत् ॥ 9
शिवकुम्भे शिवं पूज्य चतु(पञ्च)रत्नसमन्वितम् ।
वस्त्रयुग्मेन संवेष्ट्य विणिकाभिरलंकृतम् ॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प.८४

गौरीञ्च वर्धनीं न्यस्य सवस्त्रं सहिरण्यकम्।
गोमूत्रं गोमयञ्चैव क्षीरन्दधि घृतन्तथा॥ ॥
उशीरञ्चन्दनं चैव कुष्ठेनैव समान्वितम्।
सद्यादीशानपर्यन्तं यथाक्रमेण विन्यसेत्॥ १२
हुत्वान्ते तु यदस्येति पूर्णाहुति मथाचरेत्।
स्नापयेच्छिवकुम्भन्तु व्योमव्यापि समुच्चरन्॥ १३
गौरीबीजेन वर्धन्यां स्नापयेत्तु विशेषतः।
पञ्चब्रह्मषडङ्गेन स्नापयेत् कलशान् ततः॥ १४
नैवेद्यं पायसं दद्यात्ताम्बूलन्तु निवेदयेत्।
आचार्यदक्षिणान्दद्याद्वस्त्रहेमाङ्गुलीयकैः॥ १५
अधमामध्यमं प्रोक्तं नवकुम्भं ततः शृणु।

इति वीरतन्त्रे षोडशकलशस्नपन-
विधि ~~र्द्व्यशीति~~ पटलः॥
[चतुरशीति पटलः]?

—

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 85

॥ नवकलशस्नपनविधिपटलः ॥

प्रणम्य भगवन्तं हि परिपृच्छति शंकरम् ।
नवकुम्भं कथं देव ब्रूहि मे परमेश्वर ॥ 1
तत्सर्वमखिलं वक्ष्ये शृणुष्व चतुरानन ।
प्रासादस्याग्रतः कुर्या मण्डपं चतुरश्रकम् ॥ 2
चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितम् ।
वितानोपरि सञ्छिन्नान्दि गध्वजैश्च प्रलम्बितम् ॥ 3
दर्भमालाभिरावेष्ट्य मुक्तादामैरलंकृतम् ।
सर्वालंकारसंयुक्तं गोमयेनोपलेपयेत् ॥ 4
पुण्याहं वाचयेत्तत्र स्वस्तिसूक्तञ्च वारयेत् ।
सूत्रवन्तं प्रकर्तव्यं षट्सूत्रं प्राक्शिरो भवेत् ॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 85.

उदगग्रन्तथैव स्यादष्टद्वारसमन्वितम्।
शालिना विकिरेत्तत्र आसकं कलशं प्रति॥ 6
शाल्यर्धतण्डुला न्यस्य तण्डुलार्धं तिल न्यसेत्।
परिस्तरन्तु दर्भाभि पद्ममष्टदलं लिखेत्॥ 7
शिवकुम्भं न्यसे मध्ये प्रासादेन तु मन्त्रतः।
सवस्त्रं पञ्चरत्नञ्च सकूर्चं सापिधानकम्॥ 8
P. 225. वर्धनीं गौरीबीजेन विन्यसेद्देशिकोत्तमः।
सवस्त्रान् सहिरण्यांश्च गन्धोदकेन पूरितान्॥ 9
पूर्वादीशानपर्यन्तं विन्यसेदष्टकुम्भकम्।
पूर्वं गोमूत्रं चैव गोमयञ्चाग्निदेशके॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प. 85

क्षीरन्दक्षिणतो न्यस्य पश्चिमे तु दधि न्यसेत्।

आज्यञ्चोत्तर स्थाप्य नैऋते शंकुजांबुज ॥ ॥

वायव्यां पलतोयञ्च ईशान्यां रोचना भवेत्।

पूर्वादीशानपर्यन्तं अष्टविद्येश्वरा न्यसेत् ॥ 12

गन्धपुष्पादिना चैव स्वस्वमन्त्रेण पूजयेत्।

ततो होमं प्रकुर्वीत पलाशसमिधा सह ॥ 13

समिधाज्यचरूं लाजान् सर्षपांश्च यवांस्तिलान्।

सप्तद्रव्येण संयुक्तं पञ्चब्रह्मेण संयुतम् ॥ 14

हृदयञ्च शिरैर्युक्तं क्रमेण परिभूयते। (हू?)

हुत्वान्ते तु यदस्येति स्विष्टकृद्धूयते क्रमात् ॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

प. ८५

अष्टमङ्गलरूपाणि परितो विन्यसेत्ततः ।

आचार्यं दक्षिणान्दद्याद्वस्त्रहेमाङ्गुलीयकैः ॥ १६

व्योमव्यापिं जपित्वा तु स्नापयेच्छिवकुम्भकम् ।

गौरीबीजेन वर्धन्यां अनन्तादि स्वमन्त्रकैः ॥ १७

हविर्निवेदयेत्पश्चात् ताम्बूलं दापयेत्ततः ।

अधमस्याधमं प्रोक्तं शीतकुम्भं शृणुष्वथ ॥ १८

इति वीरतन्त्रे षट्सहस्रसंहितायां

नवकलश स्नपन विधि त्रिशीतिपटलः ।

[पञ्चाशीतिपटलः] ?

In Public domain. Digitization Muthulakshmi Research Academy

पटलः ४६

॥ अथ शीतकुम्भविधिपटलः ॥

शीतकुम्भं कथं देव तस्यो साधनमेव च ।
एतत्सर्वं समासेन भगवान् वक्तुमर्हसि ॥ 1

तत्सर्वमखिलं वक्ष्ये शृणुष्व कमलासन ।
ज्वरमारीविनाशाय सर्वारिष्टविनाशनम् ॥ 2

द्वात्रिंशत्प्रस्थ संपूर्णमुत्तमं कुम्भमुच्यते ।
त्रिंशं मध्यमं प्रोक्तं अष्टाविंशति चाधमम् ॥ 3

अष्टाङ्गुलन्तु विप्रेन्द्र वक्त्रं विस्तारमुच्यते ।
बिम्बप्रभान्वभायुक्तं भिन्नं काळञ्च वर्जयेत् ॥ 4

त्रिगुणीकृतसूत्रेण वेष्टयेत्कुञ्जराक्षवत् ।
क्षाळयेद्धृदयेनैव दर्भैरुपरि विन्यसेत् ॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 86

शिवाग्रे स्थण्डिलं कृत्वा अष्टद्रोणेन शालिना ।
शाल्यर्धं तण्डुलं न्यस्य तण्डुलार्धं तिलान् न्यसेत् ॥ 6

P. 226. पद्ममष्टदलं लिख्य दर्भैश्चैव परिस्तरेत् ।
वस्त्रपूतेन तोयेन पूरयेत् घटमेव च ॥ 7

एलालवङ्ग तक्कोलन्ति बुजाति फलैर्युतम् ।
उशीरञ्चन्दनञ्चैव कुम्भमध्ये हृदा न्यसेत् ॥ 8

वस्त्रयुग्मेन संवेष्ट्य विणिकाभिरलंकृतम् ।
वज्रञ्च पद्मरागञ्च वैडूर्यं मौक्तिकन्तथा ॥ 9

प्रवालेन समायुक्तं कुम्भमध्ये विनिक्षिपेत् ।
सकूर्चं सापिधानञ्च पुष्पमालासमन्वितम् ॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प. ८६

शाल्योपरि न्यसेत्कुम्भं व्योमव्यापि समुच्चरन्।
पञ्चब्रह्मषडङ्गेन अर्चयेत् गन्धपुष्पकैः॥ 11

कुम्भस्थमुदकञ्चैव अमृतञ्च विचिन्तयेत्।
(घु)?
पूर्वे::रधिवास्याथ नृत्तगेयसमन्वितम्॥ 12

हविर्निवेदयेत् पश्चात् ताम्बूलं दापयेत्ततः।
एवमेव न्यसेत्कुम्भं शिवस्तत्राधिदैवता॥ 13

वास्तुहोमं दिवा कुर्याल्लक्षणेन समन्वितम्।
कुम्भस्य सन्निधौ विप्र शान्तिहोमन्तु कारयेत्॥ 14

चतुर्दिक्षु चतुर्वेदैः कुर्यादध्ययनन्द्विजः।
एवमेव प्रकारेण उपकुम्भञ्च विन्यसेत्॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

प. ८६

ततः प्रभाते विमले स्नानं कृत्वा तु देशिकः।
मन्त्रन्यासोक्तमार्गेण सृष्टिन्यासन्तु कारयेत्॥ 16
त्रिपादीन्तत्र संकल्प्य याज्ञिकैर्वृक्षसंभवैः।
लिङ्गस्योपरि विप्रेन्द्र हस्तमात्रोच्चमुच्यते॥ 17
द्वादशाङ्गुलनाहं स्यान्मात्राङ्गुलेन कारयेत्।
अवक्रन्निर्व्रणं कृत्वा विष्टरत्रयसंयुतम्॥ 18
तालमात्रेण तन्मध्ये सुषिरं कुर्याच्च देशिकः।
द्वौ पार्श्वौ पृष्ठतश्चैव विन्यसेच्च त्रिपादिकान्॥ 19
कुम्भस्यैव तु पृष्ठे तु सुषिरं कारयेत्ततः।
नाळं तत्रैव विन्यस्य चतुरङ्गुलदैर्घ्यकम्॥ 20

In Public domain. Digitization Muthulakshmi Research Academy

प. 86

स्वर्णेनैव तु कर्तव्यं घटाधस्तान्तु योजयेत्।

व्योमव्यापिं समुच्चार्य कुम्भमारोपयेत्ततः॥ 21

त्रियहे वापि पञ्चाहे सप्ताहे वापि कारयेत्।

अहोरात्रं स्रुवं मूर्ध्नि सर्वदोषनिकृन्तनम्॥ 22

महाहविर्ददेत् पश्चात् ताम्बूलं दापयेत् ततः।

सन्ध्यायां पूजयेत्पश्चात् पूर्वोक्तविधिना सह॥ 23

उपकुम्भात् जलं विप्र शीतकुम्भं विनिक्षिपेत्।

P. 227. दिनान्तेऽपि च विप्रेन्द्र कुम्भावरोहणं कुरु॥ 24

स्नपनं तत्र कर्तव्यं पूर्वोक्तविधिना सह।

आचार्य दक्षिणां दद्याद्वस्त्रहेमाङ्गुलीयकैः॥ 25

In Public domain. Digitization Muthulakshmi Research Academy

ब्राह्मणान् भोजयेत्तत्र पर्याप्ति परिचारकान् ।

शैवान् शं (सं?) भोजयेत्तत्र समिधान् भोजयेत्ततः ।। 26

शीतकुम्भविधि प्रोक्तमद्भुतान् विधिं शृणु ।

इति वीरतन्त्रे शीतकुम्भविधि

[षडशीति]?

चतुरशीति पटलः ॥

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 87

॥ अथ अद्भुतशान्तिपटलः॥

. . . . ।

भूमिकम्पे दिशाहे धूमकेतावुपस्थिते ।
सहस्रकलशं स्नात्वा तद्दोषशमनाय च॥ 1

अनावृष्ट्यादिकाले तु ग्रहशान्तिं समाचरेत्।
शिवाग्रे मण्डपं कुर्यात् पूर्वोक्तविधिना सह॥ 2

शालिना स्थण्डिलं कृत्वा तण्डुलान् विन्यसेत्ततः।
तालमात्रोच्चमानेन कुशैर्वा कूर्चमेव वा॥ 3

स्थापयेच्चैव विप्रेन्द्र त्रयश्चैव तु मध्यमे।
पूर्वादीशानपर्यन्तन्त्रयाणां कूर्चमुच्यते॥ 4

त्रयाणां मध्यमे चैव ग्रहाणाञ्चैव विन्यसेत्।
आदित्यं मध्यमे स्थाप्य शुक्रं पूर्वे तु विन्यसेत्॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 87

चन्द्रमाग्नेय दिग्भागे अङ्गारकन्तु दक्षिणे।

राहुञ्च नैरृते न्यस्य वारुण्यान्तु शनैश्चरः॥ 6

केतुञ्च वायुदिग्भागे उत्तरे तु बृहस्पतिम्।

ऐशान्याञ्च बुधञ्चैव विन्यसेद्देशिकोत्तमः॥ 7

? भास्करस्येश्वरो देवः (पूर्वाभिमुखमेव च) (इन्द्र)

उमा चन्द्रस्य देवस्तु स्कन्दोऽङ्गारक एव च॥ 8

राहो कालंग देवस्तु यमदेवो शनिस्तथा।

केतोश्च चित्रगुप्ताश्च बृहस्पति ब्रह्मदेवताः॥ 9

बुधश्च विष्णुदेवस्तु इत्येते ग्रहदेवताः।

अग्निरापश्च भूमिश्च विष्णु इन्द्रश्च एव च॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

पृ. ८७

इन्द्राग्निश्च प्राजापत्यस्सर्पा ब्रह्माधिदेवताः।
सद्येन भूर्भुवैर्युक्तमावाह्ये देवतान्ततः॥ ११

तेषां पूर्वे तु विप्रेन्द्र सिकतैः स्थण्डिलं कुरु।
अग्निमुखन्तु संकल्प्य गन्धपुष्पादिनार्चयेत्॥ १२

आदित्यस्य च वृत्तं स्यात् च शुक्रस्य पञ्चकोणकम्।
सोमे तु चतुरश्रन्तु अङ्गारकन्त्रिकोणकम्॥ १३

P. 228. राहोश्शूर्पाकृतिश्चैव धनुश्चैव शनैश्चरः।
ध्वजवत्केतुरश्रन्तु चतुरश्रन्तु दैर्घ्यकम्॥ १४

बृहस्पतिस्तु विज्ञेयो बुधश्च (भगवान् भवेत्)। बाणमेवञ्च।
एवमेव प्रकारेण कुण्डं वा स्थण्डिलं कुरु॥ १५

In Public domain. Digitization Muthulakshmi Research Academy

प.87

तत्तद्वर्णानि पुष्पाणि पूजयेद्देशिकोत्तमः।

आदित्येऽर्के विजानीयात् पलाशं सोम एव च॥ 16

अङ्गारका खदिरमपामार्गं बुधाय च।

बृहस्पतेस्तु चाश्वत्थं शुक्रस्योदुम्बरं भवेत्॥ 17

शमिं शनैश्चरं विद्याद्राहो दूर्वाहुति स्मृता॥।

केतोः कुशासमिद्भिस्तु अलाभे पलाशमेव च॥ 18

अष्टोत्तरशतं वापि अष्टाविंशतिरेव वा॥।

प्रत्येकञ्चैव विप्रेन्द्र हूयते क्रमशोऽधुना॥ 19

एवं लक्षणसंयुक्तं होमयेच्छिवदीक्षिताः।

प्रासादेन तु मन्त्रेण आसत्येन समन्विता॥ 20

In Public domain. Digitization Muthulakshmi Research Academy

प. 87

आकृष्णेनेति मन्त्रेण आदित्यस्य तु हूयते ।

मिन्द्राहो विश्वतस्पथश्च इन्द्र नैऋति स्ततः ॥ 21

शुक्रहोममिति प्रोक्तमाप्यायस्सोम मब्रवीत् ।

गौरीमिमाय मन्त्रेण सोमहोमं प्रकीर्तितम् ॥ 22

अग्निमूर्द्धा सोमेना अङ्गारकस्य हूयते ।

गौरीयत्नेन देवी न्यतिरापद्य चैव राहु-च ॥ 23

शन्नोदेवी प्रजापते शनिहोमं प्रकीर्तितम् ।

केतुं कृत्वा ब्रह्मयज्ञानं होमं केतुरिहोच्यते ॥ 24

आदित्यस्यो ब्रह्मजज्ञानं आचार्य होममुच्यते ।

उद्बुध्यस्वेति विष्णोश्च बुधस्याहुतिरुच्यते ॥ 25

In Public domain. Digitization Muthulakshmi Research Academy

प.87

पञ्चब्रह्मषडङ्गेन प्रासादेन समन्वितम् ।
शिवबीजेन होमन्तु ग्रहशान्तिरिहोच्यते ॥ 26
क्षीरस्नानं प्रकर्तव्यं श्रीरुद्रेण विशेषतः ।
आचार्यं पूजयेत्पश्चात् ग्रहदोषाद्विमुच्यति ॥ 27
अतिवृष्टिर्भवेत्तत्र साभिक्षं कुरुते ततः ।
पुच्छनक्षत्रं दृश्यन्ते रात्राविन्द्रधनुर्ध्वतः ॥ 28
महामारि प्रवर्त्ते तु स्नपनन्तु सहस्रकम् ।
ज्वरादि पवनो मारी शीतकुम्भञ्च कारयेत् ॥ 29

- - - - - -
- - - - - -
- - - - - -

In Public domain. Digitization Muthulakshmi Research Academy

प. 87

P. 229.

॥ पुच्छनक्षत्रादि ॥

रक्तकन्या समुत्पन्ने शृणु तत्त्व पितामहः ।

पिण्डिकालिङ्गमध्ये तु रक्तकन्या समुद्भवत् ॥ 30

राज्ञां ग्रामं क्षेत्रं वा विनाशो भवति ध्रुवम् ।

प्राणिनाशं भवेदैन्द्रे अग्नौ धान्यक्षयं भवेत् ॥ 31

वाहनानां क्षयं याम्ये भार्यानाशन्तु नैरृते ।

वारुण्यान्तु पदे चैव चतुष्पाद्नाशनं भवेत् ॥ 32

ज्वरायुस्मार वायव्यां सौम्ये व्याधिमवाप्नुयात् ।

राजा मन्त्री क्षयं कुर्यादैशान्यान्तु विशेषतः ॥ 33

निर्माल्यकुण्डे दृश्येत राजराष्ट्रविनाशनम् ।

पचनालये चाग्निशालां याम्याचार्ययवदोषकृत् ॥ 34

In Public domain. Digitization Muthulakshmi Research Academy

पृ. 87

धान्यशालाय नाशं स्यात् द्वारे द्वेश्म शून्यकम्।
एवमेव प्रकारेण पञ्चप्रकारमुच्यते ॥ 36

ब्राह्मणक्षत्रियाणांच अन्तर्मण्डलके भवेत्।
वैश्यनाशकरश्चैव अन्तर्हारेऽपि दृश्यते ॥ 37

मध्यहारे विदृश्यन्ते शूद्राणां क्षयमाप्नुयात्।
चतुष्पन्नाशनश्चैव मर्यादिभित्तिके ततः ॥ 38

अन्यजातिक्षयश्चैव महामर्यादिभित्तिके।
शर्यादेशे समुत्पन्ने मरणं तद्विनिर्दिशेत् ॥ 39

एवमेव प्रकारेण अद्भुतं दृश्यते भयम्।
तद्दोषशमनार्थाय खानयेत्तत्प्रदेशतः ॥ 40

In Public domain. Digitization Muthulakshmi Research Academy

प.87

व्यपोह्य सकलं तत्र पञ्चगव्येन प्रोक्षयेत् ।

कपिला दोषहृयेत्तत्र पुण्याहं वाचयेत्ततः ॥ 41

चनं कृत्वा तु तद्देशं शान्तिहोमं तदूर्ध्वतः ।

क्षीरस्नानं प्रकर्तव्यं श्रीरुद्रेण विशेषतः ॥ 42

पूर्ववद्विधिना युक्तं होमं कुर्यात्तु देशिकः ।

पञ्चाहे सप्तरात्रे वा नवाहे वापि तारकः ॥ 43

प्लावं कृत्वा महाशान्तिं सर्वदोषहराय च ।

वल्मीकन्तु समुत्पन्ने प्रासादे मधुकृत् भवे ॥ 44

व्यपोह्य सकलं तत्र दिशाहोमन्तु कारयेत् ।

दिवा नक्षत्र दृश्ये तु सहस्रकलशान्ततः ॥ 45

In Public domain. Digitization Muthulakshmi Research Academy

प. 87

स्नापयेद्देव देवेशं महाहविर्निवेदयेत् ।

विमानोर्ध्वे तु ल्कादि दृश्यते वापि तत्र च ॥ 46

पुण्याहं कारयेत्तत्र पवमानेन प्रोक्षयेत् ।

स्नपनं तत्र कर्तव्यं शान्तिहोमं तु कारयेत् ॥ 47

P. 230 अन्ये वा चात्भुतोत्पन्ने स्नपनं कारयेत्ततः ।

शान्तिहोमं प्रकर्तव्यं तद्दोषशमनाय च ॥ 48

अद्भुतानां विधिः प्रोक्तं कृत्तिकादीपमुच्यते ।

इति वीरतन्त्रे अद्भुतशान्तिविधि
(सप्ताशीति?)
पञ्चाशीति पटलः ॥

In Public domain. Digitization Muthulakshmi Research Academy

पटलः ४४

॥ कृत्तिकादीपविधिपटलः ॥

कृत्तिका तु तथा मासे नक्षत्रं कार्त्तिकायुतम् ।
कृत्तिकादीपकर्मन्तु कर्तव्यं देशिकोत्तमः ॥ 1
कृत्तिकादीपहीने तु ज्वरमारी प्रवर्तते ।
अनावृष्टिर्भवेत्तत्र तस्माद्दीपं प्रयुज्यते ॥ 2
नववस्त्रेण कृत्वा तु वर्त्तिं कार्पाससंयुतम् ।
शतानि धाचि तालोच्चं परिणाहन्तु तद्द्वयम् ॥ 3
शिवप्रपूरिते पात्रे विन्यसेद्धृदयेन तु ।
गोघृतेन समायुक्तं शङ्खतैलेन वा पुनः ॥ 4

In Public domain. Digitization Muthulakshmi Research Academy

प. ४४

प्रासादं मूर्ध्नि विन्यस्य हृदयेन तु मन्त्रतः।
दीपदण्डं प्रवक्ष्यामि शृणुष्व चतुरानन॥ 5
जाति चम्पकं वापि क्रमुकं वेणुवन्तु वा।
कदली नालिकेरं वा आसनं बिल्वमेव वा॥ 6
प्रासादसदृशं वापि गळान्तं वापि कारयेत्।
कपोदोत्सेधमानं वा पञ्चहस्तोच्चमेव वा॥ 7
शतदीपेन संयोज्य पञ्चाशत्पञ्चविंशतिः।
चत्वार चाष्टपङ्क्तिर्वा कर्तव्यं शिल्पिना सह॥ 8
वस्त्रेण वेष्टयेत्तत्र घृतेन च परिप्लुतम्।
पुण्याहं वाचयेत्तत्र यथाविभव विस्तरम्॥ 9

In Public domain. Digitization Muthulakshmi Research Academy

प. ४४

दीपं संयोज्य विप्रेन्द्र सद्योजातेन मन्त्रतः।
वामदेवेन शिरसा धारयेत्तु विशेषतः॥ 10
विमानप्रदक्षिणं कुर्यात् गर्भगेहं प्रवेशयेत्।
पूर्ववन्मण्डले स्थाप्य प्रोक्षयेदम्भसा ततः॥ ॥
आचार्यदक्षिणान्दद्याद्वस्त्रहेमाङ्गुलीयकैः।
प्रासादं मूर्ध्नि विप्रेन्द्र शिवदीपेन योजयेत्॥ 12
दीपदण्डन्तु विप्रेन्द्र विष्णुदीपेन योजयेत्।
गर्भगेहादिदीपानां ब्रह्मदीपेन योजयेत्॥ 13
प्रासादेन तु मन्त्रेण दीपात्सर्वत्र योजयेत्।
ग्रामं वा नगरं वापि दीपात्सर्वत्र योजयेत्॥ 14

In Public domain. Digitization Muthulakshmi Research Academy

P. 231 नैवेद्यं दापयेद्देवो ताम्बूलं दापयेत्ततः।
नानादीपसमायुक्तं रात्रौ महोत्सवं कुरु॥ 15
नृत्तगेयसमायुक्तं नानापिञ्छसमायुतम्।
नानादीपैस्समायुक्तं गणिका-दासिभिस्सह॥ 16
आलयं प्रविशेत्तत्र परिवेषक्रमन्ततः।
एवं यः कुरुते मर्त्यश्शिवलोकमवाप्नुयात्॥ 17
वृक्षतैलेन कर्तव्यमुत्सवादौ विशेषतः।
कृत्तिकादीपमेवोक्तमग्राशनमत शृणु॥ 18

इति वीरतन्त्रे कार्त्तिकादीपविधि
[अष्टाशीतिपटलः]?
षडशीतिपटलः

In Public domain. Digitization Muthulakshmi Research Academy

पटलः ८९

॥ अथ अग्राशनविधिपटलः॥

प्रणम्य शिरसा देवं परिपृच्छत पितामहाः।
अग्राशनं कथं देव तत्सर्वं ब्रूहि मे प्रभो॥ 1
तत्सर्वमखिलं वक्ष्ये शृणुष्व चतुराननं।
शुभे मुहूर्ते मङ्गलये भूरि संग्रहणं कुरु॥ 2
उत्तरेषु मघायान्तु स्वातौ पुष्यानुराधयोः।
चैत्रे चार्द्राप भरणी कुर्यात् भूमिप्रवेशनम्॥ 3
अयुग्मे तिथय ज्ञेया नवमी मथ वर्जिता।
द्वितीया दशमी ग्राह्या वृषवृश्चिककर्कटा॥ 4
वारमङ्गारकं श्रेष्ठं बुधजीवार्च मद्यमम्।
भूमिप्रवेशनं प्रोक्तं कृषिकर्ममिहोच्यते॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 89

पुण्याहं वाचयेत्तत्र गन्धपुष्पादिनार्चयेत् ।
मूला पुनर्वसू चैव रोहिणी चोत्तरा त्रयः ॥ 6
रेवती पुष्यहस्ता च कृषिकर्मसु पूजिताः ।
नवमीं चैव विप्रेन्द्र वर्जयेत्कृषिकर्मसु ॥ 7
शुक्रार्कबुधाजीवानां बुधवारं प्रशस्यते ।
वृषभे कर्कटे मीने मिथुने सिंहलग्नके ॥ 8
कृष्यारम्भमिति प्रोक्तं नक्षत्राणां विशेषतः ।
श्वेतौ रक्तौ च कपिलौ नागच्छिन्नौ वृषौ तथा ॥ 9
युग्मेन सह बध्वा च बल्‌ ना मध्यमेव वा ।
गोचर्मरज्जुना नैव हलश्चैव तु बन्धयेत् ॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प -89

हृदयेन तु मन्त्रेण सर्वकर्म समाचरेत् ।
प्राग् उत्सयेत् भूमिं सद्योजातेन मन्त्रतः ॥ 11
बीजानां वापनं कुर्यात् शुभनक्षत्रसंयुते ।
मूलानुराधा हस्ता च मघा रोहिणि रेवती ॥ 12
विशाखा त्रिरुत्तरा स्वाती पुष्य श्रवणमेव च ।
P. 232. षट् चैत्र शतभि नक्षत्रा प्रशस्ता बीजकर्मसु ॥ 13
पञ्चमी सप्तमी चैव पौर्णमासी त्रयोदशी ।
एकादशी तृतीया च प्रशस्ता बीजकर्मणि ॥ 14
नाग सिंहार्क कुमीनाश्च मकरश्चैव पूजिता ।
यम कुम्भन्तुला मध्या श्शेषान्तु परिवर्जयेत् ॥ 15

In Public domain, Digitization Muthulakshmi Research Academy

प. 89

शुक्रेन्तु जीवसौम्यानां द्रेक्काणा दिवसा शुभा ।
एवमेव प्रकारेण बीजावापनमुच्यते ॥ 16
प्रतिमं शिबिकोर्द्ध्वे वा हस्त्यश्वरथमेव वा ।
भूमिप्रवेशनं कृत्वा पूर्वाभिमुखमास्थितः ॥ 17
तस्याग्रे तु समं कृत्वा दिक्दैवानां बलिं क्षिपेत् ।
अमृतेन भूमिरूपन्तु प्राक्शिरं कारयेत् बुधः ॥ 18
द्विहस्तञ्च द्विपादाञ्च सुस्तनाञ्च सुयौवनाम् ।
पुण्याहं वाचयेत्तत्र ताम्बूलं दापयेज्जनैः ॥ 19
षष्ठवर्गाश्चतुर्थन्तु प्रथमात् षष्ठमं युतम् ।
बिन्दुनादसमायुक्तं मूलमन्त्रमिहोच्यते ॥ 20

In Public domain. Digitization Muthulakshmi Research Academy

प. ४१

इति मन्त्रं समुच्चार्य गन्धपुष्पादिनार्चयेत् ।
नैवेद्यं पायसं दद्यात् लाजापूप समन्वितम् ॥ २१
ताम्बूलं दापयेत् पश्चात् सर्वतोद्य समायुतम् ।
अञ्जलिं शालिपूर्णन्तु मूलमन्त्रं समन्वितम् ॥ २२
वसुन्धरेतिश्रीदेवी पद्मपुष्पाञ्जलेऽर्पिता ।
नमोऽस्तु सुभगे नित्यं कृषिकर्मोऽक्षयतामिह ॥ २३
इति मन्त्रं समुच्चार्य कर्तव्यं बीजवापनम् ।
आचार्यं पूजयेत् पश्चात् दैवज्ञं पूजयेत्ततः ॥ २४
बीजानि दापयेत्तत्र जनान् सर्वान् विशेषतः ।
ततो भक्तजनैस्सार्धं प्रविशेदालयं प्रति ॥ २५

In Public domain. Digitization Muthulakshmi Research Academy

प. 89

बीजस्य वापनं प्रोक्तं अग्राशनमिहोच्यते ।

चण्डेशप्रतिमं युक्तं सर्वातोद्यसमन्वितम् ॥ 26

धान्यक्षेत्रमनुप्राप्य धान्यच्छेदनमारभेत् ।

हस्तार्द्रयोर्द्वयायाश्च रोहिण्याश्च विशेषतः ॥ 27

वृश्चिके कर्कटे वापि .... लपवं कुर्याच्च... बुधः ।

शूकं ग्राह्यास्त्रमन्त्रेण शिवासा धारयेत्ततः ॥ 28

ग्रामप्रदक्षिणं कुर्यात् सर्वातोद्यसमन्वितम् ।

रविरश्मिभि सन्तप्तान् व्रीहीन्निक्षिप लूखले ॥ 29

हृदयेन तु मन्त्रेण सर्वकर्म समाचरेत् ।

हस्तश्च श्रवणश्चैव रेवत्यश्वतिरेव च ॥ 30

In Public domain. Digitization Muthulakshmi Research Academy

प. ८९

P.233 मूला च रोहिणी स्वाती विशाखा च पुनर्वसु।

श्रविष्ठा शतभिषग् चैव अनुराधा तिरुत्तरा॥ 31

मृगशीर्षञ्च पुष्यञ्च भोजने च प्रशस्यते।

मेषवृश्चिकमीनास्तु वर्ज्याश्शेषास्तु पूजिता॥ 32

एवमेव प्रकारेण शिवे द्याद्विशेषतः।

तण्डुलान् शर्करैर्युक्तं नालिकेरफलैर्युतम्॥ 33

व्योमव्यापिं समुच्चार्य शिवे दद्याद्विचक्षणः।

प्रतिमाणा(ना?)ञ्च सर्वेषामेवमेवान्नमन्ददेत्॥ 34

आचार्याय प्रदातव्यं पर्याप्तिपरिचारकान्।

एवं निवेदयेत् पश्चात् ताम्बूलं दापयेत्ततः॥ 35

आचार्यदक्षिणान्दद्यात् वस्त्रहेमाङ्गुलीयकैः।

अन्नाशनमिदं प्रोक्तं बालस्थापनं शृणुष्वथा॥ 36

इति वीरतन्त्रे अन्नाशनविधि
[एकोननवति]?
सप्ताशीतिपटलः॥ 89.

In Public domain. Digitization Muthulakshmi Research Academy

पटलः ९०

॥ अथ बालस्थापन विधिपटलः॥

नमस्कृत्वा जगन्नाथं ब्रह्मा पृच्छति शंकरम्।
बालस्थानं कथं देव तत्सर्वं ब्रूहि मे प्रभो ॥ 1

बालस्थानमहं वक्ष्ये शृणुष्व कमलासन।
द्वारमानेन वा कुर्यात् भित्तिमानेन वा पुनः॥ 2

लिङ्गमानेन वा कुर्यात्तालमानेन वा पुनः।
शैलजं दारुजं वापि बाललिङ्गं करोति हि॥ 3

द्वारोच्चं नवधा भज्य एकैकं प्रतिमोच्छ्रयम्।
पूजांशोच्चन्न वा कुर्यात् द्विगुण भागान्वितन्तु वा॥ 4

तालमानं प्रवक्ष्यामि चतुस्तालन्तु चोत्तमम्।
त्रिताल मध्यमं प्रोक्तं अधमन्तु द्वितालकम्॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. ९०.

एवमेव प्रकारेण बाललिङ्गन्तु कारयेत्।
तेन मानेन कर्तव्यं लिङ्गस्य भागमुत्तमम्॥ 6
लिङ्गतारन्त्रिभागन्तु पीठविस्तारमुच्यते।
अर्द्धमो ब्रह्म भागं स्या मध्यमो विष्णुमुच्यते॥ 7
ऊर्ध्वे तु शिवभागं स्याच्छत्राकारं शिवो भवेत्।
लिङ्गसूत्रं तु कर्तव्यं नाकं चैव तु कल्पयेत्॥ 8
अश्वत्थोदुम्बरं वापि बिल्वञ्चैव शमी तथा।
बाललिङ्गं प्रकर्तव्यं एवमेव क्रमेण तु॥ 9
प्रासादस्यैशदिग्भागे आग्नेय्यां पुरतोऽपि वा।
वारुणे वापि कर्तव्य बालस्थानमिहोच्यते॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प. ९०

कूटं वा मण्डपं वापि प्रासादं वापि कारयेत्।

P.234 त्रिहस्तं पञ्चहस्तं वा सप्तहस्तमथापि वा॥ 11

समं त्रिपादमर्धं वा मुखमण्डपमिष्यते।

बालस्थानस्य चाग्रे तु प्रपां कृत्वा तु पूर्ववत्॥ 12

मध्यमे वेदिकां कुर्यात् परितः कुण्डमुच्यते।

वृत्तं वा चतुरश्रं वा अष्ट कुण्डानि कारयेत्॥ 13

मूलप्रासादपूर्वन्तु स्थण्डिलं कारयेत्ततः।

स्थण्डिलस्योपरि विन्यस्य शिवकुम्भञ्च वर्धनीम्॥ 14

सवस्त्रं सहिरण्यञ्च सकूर्चं सापिधानकम्।

आवाह्य देवदेवेशं गन्धपुष्पादिनार्चयेत्॥ 15

In Public domain. Digitization Muthulakshmi Research Academy

प. ९०

व्योमव्यापिं समुच्चार्य ब्रह्ममङ्गसमन्वितम्।
पूर्ववत्स्थण्डिले विप्र यात्राहोमन्तु कारयेत्॥ १८
अग्निमुखवत्सं संकल्प्य शिवाग्नौ हूयते क्रमात्।

— — — — — —

— — — — —

— — — —

— — — — — — — —

— — — — — — — —

In Public domain. Digitization Muthulakshmi Research Academy

पटलः 91

॥ अथ नागप्रतिष्ठाविधिपटलः ॥

अथ वक्ष्ये विशेषेण शेषस्थापनं वरम् ।
सर्वशत्रुक्षयकरं सर्वोपद्रवनाशनम् ॥ 1
सर्वसिद्धिकरं पुण्यं सर्वव्याधिनिवारणम् ।
भक्तिमुक्तिप्रदं सर्वदानयज्ञफलप्रदम् ॥ 2
अयने दक्षिणे त्वेष्टं प्रशस्तश्चोत्तरायणम् ।
शुक्लपक्षे च तत्रापि चैत्रे वैशाखमुत्तमम् ॥ 3
पुष्य फाल्गुन ज्येष्ठं च मध्यमं समुदाहृतम् ।
कार्तिकाश्वयुजे मासे श्रावणे चाधमं भवेत् ॥ 4
मार्गशीर्ष माषाढं माघप्रोष्ठ विवर्जयेत् ।
शुक्लपक्षे शुभर्क्षे च सुतिथौ सुमुहूर्तकौ ॥ 5

In Public domain. Digitization Muthulakshmi Research Academy

प. 91

अयनं पक्षनक्षत्रं तिथिर्वारश्च राशयः।

मुहूर्तं तत्र संवीक्ष्य स्थापनञ्च समारभेत्॥ 6

पुष्यमासादि षाण्मासं देवानां दिवा स्मृताः।

तत्राषाढादि षाण्मासं देवानान्तु ·· स्मृताः॥ 7

दिवाकाले प्रकर्तव्यं देवस्थापनमुत्तमम्।

शुक्लपक्षे चतुर्थीच अष्टमीच चतुर्दशी॥ 8

नवमी प्रतिपच्चैव पञ्चदश्या शुभा स्मृताः।

यामान्तश्लेषान्तश्र्पाणि श्रविष्ठाश्चैव वारुणम्॥ 9

ज्येष्ठा च त्रीणि पूर्वाणि वर्जयेत्तु विशेषतः।

शेषाश्च तिथियोगानि शस्तस्थापनकर्मणि॥ 10

In Public domain. Digitization Muthulakshmi Research Academy

प. ९१

च?
राशिकेषु धनुश्चैव शतसप्तमराशयः।
अप्रशस्ता इति ख्याता शेषाश्च शुभदा स्मृताः॥ ११

सितसौम्येक बुद्धीन्दु वारा श्रेष्ठतमा स्मृताः।
अशुभा रवि सौराश्च शुभयोगे शुभप्रदा॥ १२

रोहिण्यानिलसंयुक्ते शरिवारस्त्वशोभनम्।
पूषा सावित्रिसंयुक्तं सूर्यवारो वर स्मृतः॥ १३

विश्वेदेवाश्विनीयुक्तां कुजवारो वर स्मृतः।
शुभानां होरकांशश्च द्रेक्काणां दर्शना शुभा॥ १४

शुभानामुदयं शस्त तत्रारशशरदयं विना।
लग्नस्य नैधने स्थाने ग्रहान्य सर्वांश्च वर्जयेत्॥
१५

In Public domain. Digitization Muthulakshmi Research Academy

प.91

द्वारुन्येकादशी चैव पञ्चमी च द्वितीयका ।

षष्ठाष्टमी च नवमी सूर्यादिभि क्रमाद्युता ॥ 16

दग्धिवारा. इति ख्याता स्थापनादिषु वर्जयेत् ।

पूषार्ची सप्तमीत्युक्ता चाश्विनी च द्वितीयया ॥ 17

P.236 पुष्य वैष्णव संयुक्ता सितवारोत्तरेण तु ।

सौम्येन गुरुवारन्तु उत्तराषाढ संयुतः ॥ 18

सोमवारे च हस्तेन चाश्विनी युक्कुजवारकः ।

? इतै शोभनका प्रोक्ता कुर्याद्धि प्राणिनाशनम् ॥ 19

पापग्रह समायुक्तं उक्तं कांक्षित मध्यमम् ।

षण्डण्ड स्थूण व्यतीपातं विषुमेणञ्च संक्रमम् ॥ 20

In Public domain. Digitization Muthulakshmi Research Academy

प. 91

कण्टका ब्रह्मदण्डञ्च उल्कापातञ्च विद्यकम्।
ग्रहणं वधनक्षत्रं शूलञ्च भूमिकम्पकम्॥ 21
ध्वजञ्चैव विशेषेण वर्जयेत्तु प्रयत्नतः।
प्रतिष्ठां वर्जयेत् जीवभार्गवास्तमितेऽपि च॥ 22
अर्धनक्षत्रकादीनां कांक्षितं वर्जयेत् बुधः।
एवं परीक्ष्य बहुधा देवस्थापनमारभेत॥ 23
पूजांशोच्च प्रमाणेन कर्तव्यं प्रतिमां प्रति।
तेन गर्भन्तथा हित्वा ऽकैकप्रतिमोच्छ्रयम्॥ 24
चतुर्वा पञ्च षट् तालं प्रतिमां कारयेत्ततः।
सहस्राशिरसा वापि शतंवापि तदर्धकम्॥ 25

In Public domain. Digitization Muthulakshmi Research Academy

प. 91

दशकं सप्तकं वापि पञ्चकञ्चैकमेव वा ।

दंष्ट्राकरालवदनं जिह्वाद्वयसमायुतम्॥ 26

चिक्रीणी दीर्घपृष्ठञ्च जिह्वाला कुण्डलाकृतिम् ।

षड्वर्गो पञ्चमञ्चैव पञ्चवर्गो स्तृतीयकम्॥ 27

षष्ठस्वरसमायुक्तं नागमूलमिति स्मृतम् ।

प्रासादस्योत्तरे भागे वायव्ये वा विशेषतः॥ 28

पुरतु पूर्वदिक्भागे पुष्करिण्यास्तटंकके ।

एवमुक्तप्रकारेण स्थापनं विधिपूर्वकम्॥ 29

तिष्ठन्तं रूपसंयुक्तं तन्मोक्षणमिहोच्यते ।

रत्नन्यासं प्रकर्तव्यं लक्षणेन समन्वितम्॥ 30

In Public domain. Digitization Muthulakshmi Research Academy

प. 91

शैलजे लोहजे वापि दारुणे[जे?] वापि कारयेत् ।
स्थितमूर्तिं प्रतिष्ठाप्य रत्नन्यासन्तु कारयेत् ॥ 31
नयनोन्मीलनं कुर्यात् नेत्रावययुते [त्रद्वय]? दिने ।
स्वर्णसूचिकया चैव भ्रूरेखा शिल्पिना लिखेत् ॥ 32
मण्डलञ्च समालिप्य प्रच्छन्नपटसंयुतम् ।
स्वर्णसूचिसमायुक्तं मध्वाज्यञ्चैव तर्पयेत् ॥ 33
अक्षिहोमन्तु नेत्रेण आज्येनैव शताहुतिम् ।
कपिलां दर्शयेत् पश्चात् नेत्रद्वययुते दिने ॥ 34
P. 237 ब्राह्मणान् दर्शयेत्तत्र ब्रह्मजज्ञानमन्त्रतः ।
धामप्रदक्षिणं कुर्यात् लोहजस्य विधीयते ॥ 35

In Public domain. Digitization Muthulakshmi Research Academy

प. 91

जलाधिवासनं कुर्यात् पञ्चगव्येन स्नापयेत् ।

प्रतिमां कण्ठलग्नन्तु जलञ्चैवाधिवासयेत् ॥ 36

वस्त्रयुग्मेन संवेष्ट्य प्रच्छन्नपटसंयुतम् ।

मूलमन्त्रेण विप्रेन्द्र जले चैवाधिवासयेत् ॥ 37

अभितः कलशानष्टौ लोकपालाधिदेवतान् ।

गन्धपुष्पादिना पूज्य पायसान्नं बलिं ददेत् ॥ 38

एकरात्रि त्रिरात्रिं वा पञ्चरात्रिमथापि वा ।

जलादुत्तीर्य पूर्वेद्यु स्नापयेत् पञ्चगव्यकैः ॥ 39

मण्डपं कारयेत्तत्र सप्ताष्टनवहस्तकम् ।

तन्मध्ये वेदिकां कुर्यात् परितः कुण्डमुच्यते ॥ 40

In Public domain. Digitization Muthulakshmi Research Academy

चतुरश्राणि कुण्डानि पूर्ववत् होममाचरेत्।

शयनं पञ्चभिः कल्प्य मूलेन प्रतिमां न्यसेत्॥ 41

प्रच्छन्नपटसंयुक्तं गन्धपुष्पादिनार्चयेत्।

अभितः कलशानष्टौ विन्यसेत् नागबीजतः॥ 42

सवस्त्रान् सापिधानाञ्च सहिरण्यान् सकूर्चकान्।

अनन्तो वासुकिश्चैव तक्षः कार्कोट एव च॥ 43

शङ्खश्चैव महाशङ्खः शङ्खपालस्तथैव च।

गुळिकाद्यष्टनागानां वेदिकुम्भेषु पूजयेत्॥ 44

मध्यकुम्भेषु संपूज्य नागराजं प्रपूजयेत्।

तत्तत्स्वनाममन्त्रेण पूजयेच्च यथाक्रमम्॥ 45

In Public domain. Digitization Muthulakshmi Research Academy

प. 91

दद्याद्गुलोदनं चैव ताम्बूलं दापयेत्ततः।
ततो होमं प्रकर्तव्यं पलाशसमिधा सह॥ 46
समिदाज्यचरूंल्लाजान् सर्षपांश्च यवांस्तिलान्।
शालिनीवारगोधूमं मुद्गेनैव समन्वितम्॥ 47
पञ्चब्रह्मषडङ्गेन क्रमाद्धुत्वा तु देशिकः।
इदं विष्णुरिति मन्त्रेण आज्येनैव शताहुतिम्॥ 48
विष्णोर्नुकञ्च मन्त्रेण चरुणा च शताहुतिम्।
हुत्वा हुत्वा स्पृशेत् मूर्तिं व्याहृतिं जुहुयात्ततः॥ 4[9]
वेदना वेदनत्वा तु गणानान्त्वेति हूयते।
ततः प्रभाते विमले स्नानं कृत्वा तु देशिकः॥ 50

In Public domain. Digitization Muthulakshmi Research Academy

प. 91

स्थितिन्यासं प्रकर्तव्यं पूर्ववत् लक्षणान्वितम्।
ततो वसनहोमं तु समिदाज्यचरुस्सह ॥ 51

P.238. नागमूलेन हृदये मन्त्रेणैव क्रमान्न्यसेत्।
सर्वद्रव्यसमायुक्तं हव्यवाह् समुच्चरन् ॥ 52
स्विष्टमग्नेति मन्त्रेण जुहुयात्तदनन्तरे।
ब्राह्मणान् भोजयेत्तत्र यागकुम्भाभिषेचयेत् ॥ 53
महाहविर्निवेद्याथ ताम्बूलं दापयेत्ततः।

इति वीराख्ये महातन्त्रे नागप्रतिष्ठा-
पटलः (एकनवतितमः)?

In Public domain. Digitization Muthulakshmi Research Academy

पटलः ९२

॥ कूपप्रतिष्ठाविधिपटलः॥

प्रतिष्ठा च यथाशास्त्रं पुष्करण्या निगद्यते।

तन्त्रादौ पूजयेद्वास्तुं वेदाश्रे रुद्रभाजिते॥ ।

कोणेषु त्रिपदा पूजां ईशादि पितृवायवः।

ऽकैकं पदमारूढां ..